॥ श्रीमन्मूलरामो विजयते ॥

श्रीकोलाहल कट्टे नृसिंहचार्यविरचिता

नवकोटिविभेदिनी

श्रीयादवाद्रिवास्यनन्तार्यविरचित

णत्व-तत्व-विभूषण

सहिता

श्रीहयवदनपुराणिकाचार्यरचिताभ्यां

टिप्पणीभ्यां समलङ्कृता च

सम्पादक :

राष्ट्रपतिप्रशस्तिभूषितः

विद्वान्. के. हयवदनपुराणिकाः

प्रकाशकाः

श्रीगुरुसार्वभौमसंशोधनमन्दिरम्

जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्,

श्रीराघवेन्द्रस्वामिनां मठः,

मन्त्रालयः - 518 345. (आन्ध्रप्रदेशः)

॥ श्रीमन्मूलरामो विजयते ॥

श्रीकोलाहल कट्टे नृसिंहचार्यविरचिता

नवकोटिविभेदिनी

श्रीयादवाद्रिवास्यनन्तार्यविरचित

णत्व-तत्व-विभूषण

सहिता

श्रीहयवदनपुराणिकाचार्यरचिताभ्यां

टिप्पणीभ्यां समलङ्कृता च

सम्पादक :

राष्ट्रपतिप्रशस्तिभूषितः

विद्वान्. के. हयवदनपुराणिकाः

प्रकाशकाः

श्रीगुरुसार्वभौमसंशोधनमन्दिरम्

जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्,

श्रीराघवेन्द्रस्वामिनां मठः,

मन्त्रालयः - 518 345. (आन्ध्रप्रदेशः)

श्रीकोलाहल कट्टे नृसिंहचार्यविरचिता **नवकोटि विभेदिनी** श्री यादवद्रिवास्यनन्तार्य विरचित **णत्व तत्व विभूषण** सहिता श्री हयवदनपुराणिकाचार्य रचिताभ्यां टिप्पणीभ्यां समलङ्कृता च

सम्पादक :

विद्वान्. के. हयवदनपुराणिकः

प्रकाशनम्

श्री गुरुसार्वभौम संशोधनमन्दिरम्

जगद्गुरु श्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीराघवेन्द्रस्वामिनां मठः, मन्त्रालयः

Pages : 194

Price : Rs.

Typeset by : R. S. Premkumar, Ph. 9964334285

Printed at : SREE RAGHAVENDRA SWAMY PRINTING PRESS, YEMMIGANUR. PH. : 9247188605

।। श्रीमूलरामो विजयते ।। ।। श्रीगुरुराजो विजयते ।।

श्रीमत्परमहंसपरिव्राजकाचार्यपदवाक्यप्रमाणपारावारपारङ्गतसर्वतन्त्रस्वतंन्त्र
श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनाचार्य श्रीमन्मूलरघुपति-
वेदव्यासदेवदिव्यश्रीपादपद्माराधकजगद्गुरुश्रीमन्मध्वाचार्य
मूलमहासंस्थानाधीश्वरश्रीराघवेंद्रस्वामिमठीयवेदान्तसाम्राज्य
दिग्विजयविद्यासिंहासनाधीश्वर श्रीमत्सुशमीन्द्रतीर्थश्रीपादकरकमलसञ्जात
श्रीमत्सुयतीन्द्रतीर्थ श्रीपादकरकमलसंजात

श्रीमत्सुबुधेन्द्रतीर्थश्रीपादानाम्

अनुग्रहाशंसनम्

नारायणशब्दः शिवपरः इत्यस्मिन्विषये बहु कालादारभ्य चर्चाः वाक्यार्थगोष्ठ्यः प्रचलन्त्यः वर्तन्त एव । श्रीविजयीन्द्रतीर्थानां तथा अप्पय्यदीक्षितानां मध्ये अमुमेव विषयमधिकृत्य बहु प्रकारेण चर्चाः बभूवु । तथाऽपि नारायणशब्दः शिवपर इति बहुप्रकारेण साधितवन्तः अप्पय्यदीक्षिता अपि वाक्यार्थवेलायां नारायणशब्दस्यान्ते णत्वसमर्थने असमर्थाः भूत्वा "णत्वं परं बाधते" इति ऊचुः । एवं सति सगुणशिवमतानुयायिनः माधवस्य मतमनुसृत्य कुणिगल् प्रान्तीयः रामशास्त्रीति सुगृहीतनामधेयोऽद्वैतविद्वान् "नवकोटिग्रन्थम्" प्रणिनाय । तत्र स शिवस्यैव आदिकारणत्वं प्रतिपादयति । तत्र नारायणशब्दः शिवपरः शिववृत्तिधर्मावच्छिन्नप्रतिपादकत्वात् । इतीयं प्रथमा कोटिः ।

अत्र नारायणशब्दस्य केवलयौगिकत्वेन संज्ञात्वाभावात् णत्वं कथं प्राप्नोति? इति । एवंरीत्या शिवस्य जगत्कारणत्वनिरूपणकाले बहुप्रकारेण नारायणशब्दस्यान्ते नस्य णत्वसमर्थनप्रयत्नं कृतवान् । एवं नवसंख्याककोटिभिः युक्तत्वात् अस्य ग्रन्थस्य नवकोटिरिति प्रसिद्धिः । एतद्ग्रन्थकर्तृकालीनः कोलाहल कट्टे नरसिंहनामको विद्वान् नवकोट्याः विभेदनपरं अर्थात् खण्डनपरं ''नवकोटिविभेदिनी'' नामकं ग्रन्थं जग्र । अयं हस्तलिखितरूपतया अस्मत्सकाशे बहुकालादासीत् । अन्यत्र स्थितानां मातृकाणां साहाय्येन ग्रन्थमिमं शोधयितुं अस्मन्मठीयास्थानविदुषः हयवदनपुराणिकान् आदिष्टवन्तः स्म । ते तु अत्यन्तश्रद्धया महता श्रमेण प्रयत्नेन च सम्पाद्य, संशोधनकाले एतद्ग्रन्थविषयसंवादिणत्वतत्वविभूषणग्रन्थमातृकाश्च लब्ध्वा अनेनैव ग्रन्थेन सार्धं सम्पाद्य तदुपरि स्वयं टिप्पणीद्वयं विरच्य बहु सुन्दरतया सम्पादितवन्तः । एतेषां पुराणिकमहाभागानां परिश्रमेण सारस्वतप्रपञ्चे निविष्टग्रन्थसमूहे अयमपि प्रवेशितः । एतादृशग्रन्थसंशोधनं कृतवतां हयवदनपुराणिकमहोदयानां सारस्वतसेवया प्रीतः अस्मदुपास्यः श्रीमद्राघवेन्द्रतीर्थगुर्वन्तर्गतभारतीरमणमुख्यप्राणान्तर्गतश्रीमन्मूल-रघुपतिवेदव्यासदेवः इतोऽप्यतिशयायुरारोग्यैश्वर्याभिवृद्धिकरणद्वारा ज्ञानभक्तिवैराग्यं ददात्विति प्रार्थयामहे ।


इति

नारायणस्मरणनि




श्रीदिग्विजयरामदेवः श्रीमन्मूलरामदेवः श्रीजयरामदेवः

श्रीमदानंदतीर्थभगवत्पादाचार्यो विजयते ।।



ब्रहान्ता गुरवः साक्षादिष्टं दैवं श्रियः पतिः ।
आचार्याः श्रीमदाचार्यास्सन्तु मे जन्मजन्मनि ।।

श्रीटीकाकृत्पादरु




यस्य वाक्कामधेनुर्नः कामितार्थान्प्रयच्छति ।
सेवे तं जययोगींद्रं कामबाणच्छिदं सदा ।।

श्रीविजयीन्द्रतीर्थरु



भक्तानां मानसांभोजभानवे कामधेनवे ।
नमतां कल्पतरवे जयींद्रगुरवे नमः ॥

श्रीराघवेन्द्रतीर्थगुरुसार्वभौमाः



मूकोऽपि यत्प्रसादेन मुकुन्दशयनायते ।
राजराजायते रिक्तो राघवेन्द्रं तमाश्रये ॥

श्रीमत्सुजयीन्द्रतीर्थाः



सुयमीन्द्रकराब्जोत्थं सुविद्याबोधकं सदा ।
सुमूलरामपूजाढ्यं सुजयीन्द्रगुरुं भजे ॥

श्रीमत्सुयतीन्द्रतीर्थाः



सुशमीन्द्रकराब्जोत्थं राघवेन्द्रगुरुप्रियम् ।
सुयतीन्द्रगुरुं वन्दे मूलरामार्चने रतम् ॥

श्रीमत्सुबुधेन्द्रतीर्थाः



प्रस्तुतपीठाधिपतयः

श्रीराघवेन्द्रस्वामिमठः मन्त्रालयः

प्रस्तावना

व्यासेन व्युप्तबीजः श्रुतिभुवि भगवत्पाद लब्धाङ्कुरश्रीः
प्रत्नैरीषत् प्रभिन्नोऽजनि जयमुनिना सम्यगुद्भिन्नशाखः ।
मौनीश व्यासराजादुदित किसलयः पुष्पितोऽयं जयीन्द्राद्
अद्य श्रीराघवेन्द्राद् विलसति फलितो मध्वसिद्धान्तशाखी।।

चतुर्विधपुरुषार्थफलवत्यां वेदवाङ्मयवसुमत्यां वेदतात्पर्य-निर्णायक ब्रह्मसूत्राख्य बीजमुवाप परमाप्तो वेदपुरुषो नारायणावतारो भगवान् बादरायणो व्यासः । तच्च बीजं श्रीमदानन्दतीर्थभगवत्पाद मुख निःसृत सर्वमूलग्रन्थामृतरससेचनेन लब्धांकुरं विरेजे ।

प्राचीनटीकाकार श्रीपद्मनाभादि मुनिकृत टीकावचनामृत-रसपरिपुष्टं तदेव श्रीमज्जयमुनिमुखनिःसृत टीकारससन्दोहमेदुरः सम्यक्शाखोपशाखोपेतः सर्वाश्रयो महा शाखी भूत्वा शुशुभे । मौनीश श्रीव्यासराजेन्द्रमृतकिरण परिपुष्ट उदितकिसलयः, चतुरधिकशत ग्रन्थरत्न प्रणेतृ श्रीविजयीन्द्रकृतिभिः पुष्पितश्च, कलियुगकल्पतरु श्रीराघवेन्द्रयतिकृत टिप्पणीभिश्चतुर्विधपुराषार्थफलपुष्पसमृद्ध्याऽद्य विराजतेऽयं प्रेक्षावतां सतामीक्षणीयो मध्वसिद्धान्तकल्पभूरूह इतरूरिति साधूक्तं श्रीगुरुगुणस्तवनकारैः ।

‘‘श्रीगुरुभ्यो नमः हरिः ॐ’’ इति हि सर्वैर्वेदपाठकैरारभ्यते, ‘‘हरिः ओमि’’ति च समाप्यते वेदपाठः पाठिनाम् ।

सर्वे वेदा यत्पदमामनन्ति

तपांसि सर्वाणि च यद्वदन्ति ।

इत्याद्युदीरयन्ती काठकोपनिषत्,

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।

इत्युपसंहरति ।

वेदैश्च सर्वैरहमेव वेद्यः ।

इति च श्रीमद्भगवद्गीतावचनमस्ति ।

वेदे रामायणे चैव पुराणे भारते तथा ।

आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते ।।

इति च हरिवंशवचनम् । अतोऽखिलाम्नायैक वेद्यो हरिरिति हि मध्वसिद्धान्त डिण्डिमः ।

ननु कथमग्नीन्द्रवरुणवाय्वादिसूक्तानां विष्ण्वर्थता स्यादित्याशंकायामाह मन्त्रार्थमंजर्यां श्रीमन्मन्त्रालयकृतमन्दिरो राधवेन्द्रो यथा–

''अग्न्यादिशब्दानां निगमनिघंट्वादिरूपानुशासनबलेन आग्नेयादिकर्मादि सिद्धिरूप प्रयोजनबलेन च प्रसिद्धाग्न्यादाविव ''चमसवदविशेषादि''त्यादौ भाष्योक्तदिशा ''नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परममुदाहरन्ती''ति,

''हन्तैतमेव पुरुषं सर्वाणि नामान्यभिवदन्ती''ति,

''सर्वनामा सर्वकर्मा सर्वलिंग'' इति

''यो देवानां नामधा एक एव'' इती चैवमादिभिः श्रुतिभिः,

''सर्वच्छन्दोऽभिधो ह्येष सर्वदेवाभिधो ह्यसौ'' इत्यादि स्मृतिभिश्च सामान्यतः,

''इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्'' इति,

''यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुः'' इत्यादि श्रुतिभिः ।

बृंहणाद् ब्रह्मनामासौ ऐश्वर्यादिन्द्र उच्यते ।

एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः ।

वेदेषु सपुराणेषु गीयते पुरुषोत्तमः ।

इत्यादि स्मृतिभिश्च विशिष्यानुशासनरूपाभिर्विष्णावपि शक्तेः सिद्धत्वेन विष्ण्वर्थत्वस्यापि मन्त्रेषु न्याय्यत्वात्'' इति ।

अयं भावः । अग्नीन्द्रादि नामानि मुख्यतो विष्णुनामानि । तदाश्रितत्वादिना अग्नीन्द्रादीनामपि तानि नामानि भवन्ति । यतस्तानि पूर्वं तेनैव तेभ्यो दत्तानि ।

तदुक्तं स्कान्दे -

ऋते नारायणादीनि नामानि पुरुषोत्तमः ।

प्रादादन्यत्र भगवान् राजेवर्ते स्वकं पुरम् ।। इति ।

''यथा सम्राट् माण्डलिकानां पुराणि दददपि निजपुरवर्जमन्यान्येव ददाति, एवमेव राजराजेश्वरो भगवान् विष्णुः स्वनाम

नारायणादि विहायान्यानि अग्नीन्द्रादीनि नामान्येव तेभ्यो ददौ । यथा च माण्डलिकानामिमानि पुराणि मुख्यतः सम्राज एवैवमेव देवानां नामान्यपि तानि मुख्यतो विष्णोः स्वीयान्येव। न चैतावता अग्नीन्द्रादयोऽग्नीन्द्रादिनाम्नाममुख्यार्था इति मन्तव्याः । मुख्यार्था एव हि तेसन्ति । परममुख्यस्त्वर्थो विष्णुरिति न कोऽपि दोषः ।

न च योगाद्रूढिबलीयस्त्वसिद्धान्तव्याकोपः। योगप्रतिपादकोक्तस्मृतीनामादरणीयत्वात्। अन्यथा तासां वैयर्थ्यप्रसंगात्। आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेन तासां बलवत्त्वाच्च । न ह्याण्नद्या इत्यादौ रुढिबलीयस्त्वमाद्रियते। अपितु ''यू स्त्रियाख्यौ नदी''ति व्याकरणस्मृतिः ।

एवं च न विष्णोरग्नीन्द्रादिनामभिरुपासनमयुक्तं, न वा देवानां विष्णुनामभिः। अग्नीन्द्रादिनाम्नां हि अग्नीन्द्रादिषु प्रवर्तमानानां, विष्ण्वधीनान्येव प्रवृत्तिनिमित्तानि निमित्तानि भवन्ति । विष्णौ तु स्वतन्त्राणीति भेदः । एवमभिसन्धाय हि देवगुरुब्राह्मणानामभिवादनं क्रियमाणमन्ततः केशवाभिवादनं भवत् परमपुरुषार्थाय कल्पते । यथोक्तम्-

आकाशात् पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेव नमस्कारः केशवं प्रति गच्छतीति ।।

नाम्नामैदंपर्यवेदिभिर्महात्मभिः कार्तयुगैर्जनैर्निखिलैरपि वेदादिभिर्विष्णोरेवोपासनं क्रियमाणमासीत्। तेषां हि देवो नारायणः श्रीशो देवी मंगलदेवता । ब्रह्मादयस्तु गुरवो गुरुत्वेनैवार्हणीया, न तु देवतया ।

गच्छता तु कालेनायं मुख्यो धर्मोऽन्तरितः। अमुख्यश्चाविष्कृतः। मुख्योऽमुख्यतामनीयत। अमुख्यश्च मुख्यताम्। देवनामभिर्देवा देवत्वेनापूज्यन्त । तदुक्तं नारायणसंहितायां यथा -

नैव चेन्द्रादिनामानि विष्णोरन्यत्र कुत्रचित् ।
ब्रह्मरुद्रेन्द्रपूर्वैस्तु नामभिः प्रोच्यते हरिः ।
देवतात्वेन चेज्यः स, ब्रह्माद्या मनुनामकाः ।
वक्तृत्वेन पितृत्वेन कारित्वेनैव चादरात् ।
इज्यन्ते देवताः सर्वा, न तु देवतया क्वचित् ।
अनन्य याजिनस्ते तु तस्मात् कार्तयुगा जनाः ।।

इति ।

कारणं चात्र सत्वरजस्तमसां वृद्धिह्रासौ । तदुक्तं भागवते-

सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ।
न तेषां युगपद् राजन् ह्रास उल्लास एव वा ।
जयकाले तु सत्वस्य देवर्षीन्, रजसोऽसुरान् ।
तमसो यक्षरक्षांसि तत्कलानुगुणोऽभजत् (७.७.७८)

इति ।

कृतयुगे हि यथा सत्वोल्लासो न तथा युगान्तरेषु स समस्ति। युगचक्रावृत्त्या हि त्रैगुण्यवृद्धिह्रासावपि स्याताम्। अतः प्रवाहतोऽनादितैवेष्टाऽद्यतनानां वैष्णव शैवादीनां समेषामपि समयानाम्। नैषामैदंप्राथम्येन कदाप्युद्भवो, नाप्यात्यन्तिकः समुच्छेदः। तदुक्तमनुव्याख्याने-

अनादि कालतो वृत्ताः समया हि प्रवाहतः ।
न चोच्छेदोऽपि कस्यापि ।। इति ।

जगदपि हि प्रवाहतोऽनादि, जगति मतान्यपि तथा। स्थिते चैवमनादित्वे यत् पुनः पाश्चात्त्यैर्दुराग्रह विषदोष प्रमुषित शेमुषीकैर्विमर्शकैरुक्तम्-

"भारत मूलनिवासिनो जना द्रविडा आसन्। आर्यास्तु यौरोपीयास्तत्रागत्य निवासं चक्रुः। द्रविडानामाराध्यः शिवः। विष्णुश्च तथार्याणाम्। पुराप्यार्यागमनाद् भारते व्यलसत् शैवं मतमतो भारतीयं प्राचीनतमं चैतदेव मतं मन्तव्यम्। अत एव प्रथमे ऋग्वेदे नास्ति शिवनाम्नो वार्तापि। यदा त्वार्या द्रविडैः सम्मिलितास्तदा तत्कालीनरचनासु यजुरादिषु श्रुतिषु शिव उन्नतं स्थानमनीयत। ऋग्वेदीयो यः "शिश्नदेवः" स एव यजुषि "महादेवो जात" इत्यादि। तदिदमार्याणां मूलतो भारतीयतावेदक ऋड्मन्त्रविरोधादुपेक्ष्यम्। तथाहि। ऋग्वेदीयेषु नदीसूक्तेषु भारतीयानां गंगायमुनादीनामेव हि नदीनां दृश्यते संकीर्तनम् -

इमं मे गंगे यमुने सरस्वति
श्रुतुद्रि स्तोमं सचता परुष्णिया ।
असिक्निया मरुद्वृधे वितस्तया-
र्जीकीयेशृणुह्या सुषोमया ।। इति । (ऋ- १०.७५.५)

सरस्वत्या नद्यास्तु स्तोत्राणि सन्ति बहूनि ऋग्वेदे ।

नमो गंगायमुनयोर्मध्ये ये वसन्ति

ते मे प्रसन्नात्मानश्चिरं जवितं वर्धयन्ति ।
नमो गंगायमुनयोर्मुनिभ्यश्च नमः ।

(सहवा उपनिषत् २४)

इति सन्ध्योपासासु समस्ति नमस्कारः संप्रदायागतः ।

यदपि ऋग्वेदे नास्ति शिवस्य किमपि स्थानमिति तत् साहसमात्रम्। यतो हि मृत्युञ्जय त्र्यम्बकमन्त्रोऽयं ऋग्वेदे दृश्यते यथा-

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।। इति ।

(ऋ.७.५९.१२)

अत्र मृत्युञ्जय शिवस्येज्यत्वमुक्तम्। मन्त्रान्तरे च यष्टृत्वं यज्ञतोषित विष्णुप्रसादादवाप्त विभवत्वं च । तद्यथा-

अस्य देवस्य मील्हुषो वया
विष्णोरेषस्य प्रभृथे हविर्भिः ।
विदे हि रुद्रो रुद्रियं महित्वम् ।। इति ।।

अम्भ्रणीसूक्तेऽपि देवीप्रसादादाप्तपदत्वं शिवस्योक्तं यथा-

यं कामये तं तमुग्रं कृणोमीति ।

अतस्त्र्यम्बकरुद्रोग्रादि नामभिरार्य्यैराराध्यो रुद्रो नार्हति द्रविडदेवव्यपदेशम् ।

यच्च वेदानां सादित्वाभिधानम् अन्यथा चैषामर्थग्रहणं तदितिहास

पुराण स्मृतिसम्प्रदाय प्रत्यनीकमित्युपेक्ष्यम्। तथाचाह महाभारतं याज्ञवल्क्यस्मृतिश्च-

इतिहास पुराणाभ्यां वेदं समुपबृंहयेत् ।

बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति ।। इति ।

इदं तु तत्वम् । भारतीयेष्वेवार्येषु केचन कर्मभ्रष्टा देशान्तरं गताः कालक्रमेण विस्मृत शुद्धवेदधर्मपरंपरा आंग्लम्लेच्छादीन्यद्य प्रसिद्धानि धर्मान्तराण्यारभन्त । भाषान्तराणि चांग्लादीनि । आह च च्छन्दोगानामियं वाक्-

''वाचारम्भणं विकारो, नामधेयं मृत्तिकेत्येव सत्यम्'' इति ।

''मृत्तिकैव सत्ये'' ति वक्तव्ये इतिकरणमिहार्थविपर्यासं गमयति । मृत्तिकेति पदमेव सत्यं नामधेयम्, अनादिनित्यं संस्कृतं नामेति यावत् । मण्णु मट्टि मिट्टी मड्ड् इत्यादयो भाषाशब्दा मृदिति संस्कृतशब्द तद्भवा विकारा एव, न नित्याः । संस्कृतमेव च नित्यमित्याह सेयमुपनिषत् । यथान्यभाषा वैदिकभाषाविकारास्तथान्यधर्मा अपि वैदिकधर्मविकाराः । अतस्तथ्यमाह मनुस्मृतिः । (२-२०)

एतद्देश प्रसूतस्य सकाशादग्रजन्मनः ।

स्वंस्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।। इति ।

या च पंचरात्रमवैदिकमिति, तत्प्रभाव निमित्तो वैदिक वैष्णव धर्मोद्भव इति च कल्पना निर्मूलैवैषा । यतो हि,

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।

इत्यादिषु ऋक्ष्वपि सन्ति त्रिविक्रमपराक्रमादीनि दशावतारचरितानि ।

येन देवाः पवित्रेण आत्मातं पुनते सादा ।

तेन सह साधारेण पावमान्यःपुनंतुमा ।।

प्राजापत्यूं पवित्रं शतोद्यामं हिरण्मयम् ।

तेन ब्रह्मविदो वयं पूतं ब्रह्मपुनीमहे ।।

पवित्रं ते वितत्तं ब्रह्मणस्पूते प्रभुर्गात्राणि पर्येषि विश्वतः ।

अतप्ततनूर्नतदामो अश्नुते शृतासहद्वहन्तस्तत् समाशत ।।

लोकस्य द्वारमार्चिमत् पवित्रं ज्योतिष्मद्
भ्राजमानं महस्वते ।

अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके
सुधितात् धधातु।।

इत्याद्यासु श्रुतिषु तप्तचक्र धारणविधिरप्यस्ति ।

वेदेतिहासपुराणेषु सर्वत्र जेगीयमानानि च तानि स्फुटमावेदयन्ति वैष्णवधर्मस्य परमवैदिकताम् । किं बहुना, नारायणशब्दनिर्वचन पुरःसरमादावेव नारायणस्यादिकारणतामाह सादरं मनुरपि -

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।

अप एव ससर्जादौ तासु वीर्यमवासृजत् ।

तदण्डमभवद्धैमं सहस्रांशु समप्रभम् ।

तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।

ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ।। इति ।

ये पुनः पुराणादीनां क्रिस्तोरेकादशशतकादर्वाचीनतां मन्यन्ते अधुनातना विमर्शकंमन्याः तान् प्रति क्रि.श.१०३० तमवर्षमध्ये एवाष्टादशपुराणानां परिगणन कर्ता अल्बरूनिरेव प्रतिवक्ता। सत्यमावापोद्वापादिभिरतिमात्र विलुलितानि विकृतानि कृतानि सन्ति पुराणानीति। नैतावता मूलं स्वरूपमेव तेषामाधुनिकमिति वक्तुं युक्तम्। सन्ति हि गीता सहस्रनाम शांकरभाष्ययोरपि परःशतानि पुराणवचनोदाहरणनि ।

यत्तु शिवकूर्मादि पुराणेषु शिवपारम्यवचनं तद् विष्णु-सहस्रनामशांकरभाष्य एवोक्तार्थम् ।

यथा -

''स ब्रह्म स शिव इत्यभेदोपदेशात् शिवादि नामभिर्हरिरेव स्तूयते'' इति । तस्मात्,

वेदाक्षराणि यावन्ति कथितानि द्विजातिभिः ।

तावन्ति हरिनामानि कीर्तितानि न संशयः ।

इति सम्प्रदायः। न चेयमतिशयोक्तिः। अपितु श्रुत्युक्ता-प्यस्त्यत्र युक्तिः । तथाहि-

तस्यै वा एतस्यै संहितायै णकारो बलम् ।

षकारः प्राण आत्मा । स यो हैतौ णकारषकारा-

वनुसंहितमृचो वेद, सबलां सप्राणां

संहितां वेद । आयुष्यमिति विद्यात् (ऐत.आर.३.२)

अस्यार्थ उक्तो भगवत्पादैर्यथा-

विष्णुनाम्नि णशब्देन विष्णोर्बलमुदीर्यते ।

ण इत्याक्रियमाणत्वात् णकारोऽस्य बलं मतम् ।

विष्णुनाम्नि षकारेण रमा ब्रह्मेश पूर्विणः ।

प्रणेतृताखिलस्यैव विष्णोरुक्ता तथात्मता ।

वर्णद्वय समायोगे ष्णु शब्दस्यार्थमेव तु ।

विष्णोः प्राणत्वमात्मत्वं बलं चैवात्र वेत्ति यः ।

स एव विष्णोर्बलवित् तथा प्राणत्वविद् भवेत् ।

स एव मुक्तः संसारान्नित्यायुष्मान् भविष्यति ।। इति ।

एवं हि स्थिते विष्णोः सर्वनामत्वे, शिवस्यापि तत् किं न स्यादिति शंका स्यात्। अथापि मिथ्यैषा शंका। प्रमाणमूर्धन्यतया शिवशरणैः परिगृहीता सूतसंहिता ह्येवमाह -

शिव रुद्र महादेव ब्रह्मेशानादि नामतः ।

विष्ण्वादिदेवताः पश्यन् क्रमान्मुच्येत बन्धनात् ।

शिवं सर्वोत्तमं विप्रा हरिविष्ण्वादिनामतः ।

चिन्तयन् घोर संसारे पतत्येव न संशयः ।

यथाऽमात्यादिबुद्धिस्तु राज्ञि बन्धाय देहिनाम् ।। इति ।

अत्र विद्यारण्यव्याख्या-

उत्कृष्टेऽपकृष्ट बुद्धिरनर्थाय । अपकृष्टे पुन -

रुत्कृष्टबुद्धिः श्रेयसे । ब्रह्मदृष्टिरुत्कर्षात् ।। इति ।

ब्रह्मसूत्रशांकरभाष्येऽप्युक्तम् -

उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यवसितव्येति लैकिको न्यायः ।

यथा राजदृष्टिः क्षत्तरि । विपर्यये प्रत्यवाय प्रसंगात् ।

नहि क्षत्तृदृष्टिपरिगृहीतो राजा निकर्षं नीयमानः

श्रेयसे स्यादिति ।।

एवं च स्वावर विष्णोर्नाम्ना शिवस्योपासने तस्य निकर्षप्राप्त्या उपासकोऽनर्थमियादिति भिया शिवस्य नारायण नामतां न शैवा एव सहन्ते । शिवनाम्ना विष्णूपासने च तस्योत्कर्षप्राप्त्या उपासको मुक्तिमियादिति धिया विष्णोः शिवनामतां ते सामोदमाद्रियन्ते । तत्र या वा का वा भवतु तदुपस्थापिता कुयुक्तिः । सिद्धं तु नः समीहितं यद् विष्णोः सर्वनामत्वम् । शिवस्य च तदभावः । यतः पूर्वोक्तरीत्या परममुख्यवृत्त्या विष्णोः स्वावरदेवनामवाच्यतायां न कापि स्यादस्य हानिः । मुधा भीतिरिह या शैवानां, साऽस्माकं मुदे स्यादहो वैष्णवानाम् ।

शिवः केवलोऽहमिति गृणन्नपि शंकरः -

लक्ष्मीनृसिंह मम देहि करावलम्बम् ।

इति संप्रार्थ्यान्त एवमाह -

लक्ष्मीनृसिंह चरणाब्ज मधुव्रतेन

स्तोत्रं कृतं शुभकरं भुवि शंकरेण ।। इति ।

अद्वैतसिद्धिकारोऽपि मधुसूदनसरस्वती श्रीकृष्णमेव परमं तत्वं मन्यते । तथाह्याहासौ -

अद्वैत वीथी पथिकैरुपास्याः

स्वाराज्यसिंहासन लब्धदीक्षाः ।

शठेन केनापि वयं हठेन

दासीकृता गोपवधू विटेन ।। इति ।

वंशीविभूषित करान्नव नीरदाभात्

पीताम्बरादरुणविम्बफलाधरोष्ठात् ।

पूर्णेन्दु सुन्दर मुखादरविन्दनेत्रात्

कृष्णात् परं किमपि तत्वमहं न जाने । इति च ।

विद्यारण्यस्तु शैवाद्वैते कृतनिष्ठो बभूव । स हि सूतसंहिता-व्याख्योपक्रम एवमाह -

श्रीमत्काशीविलासाख्य क्रियाशक्तीशसेविना ।

श्रीमत्त्र्यम्बक पादाब्जसेवा निष्णात चेतसा ।

वेदशास्त्र प्रतिष्ठात्रा श्रीमन्माधवमन्त्रिणा ।

तात्पर्यदीपिका सूतसंहिताया विधीयते ।। इति ।

श्रीमत्काशीविलास क्रियाशक्ति शिवदेशिकाधिष्ठितेन शुद्धशैवाम्नायवर्त्मना निजेष्टलिंगकृताधिष्ठानं देवदेवं श्रीमत्‌त्र्यम्बकनाथं नित्यनैमित्तिकात्मभिः क्रिया-कलापै र्यथाकालं यजन्... ।।

इत्यादिर्हि माधवाचार्यस्य प्रशस्तिः । क्रियाशक्तिरयं माधवश्चो-भावपीमौ गुरुशिष्यौ अद्यतनाराध्यब्राह्मणवंशीयौ । आराध्य-ब्राह्मणाश्चान्ध्रे श्रीशैलप्रान्तवासिनः । तत्संप्रदाये गोलकीमठसम्बन्धी ब्रह्मसूत्र श्रीकण्ठभाष्यकर्ता श्रीकण्ठशिवाचार्यः शक्तिविशिष्टाद्वैत-सिद्धान्तस्य प्रवर्तक आसीत् । अन्यश्च ब्रह्मसूत्र श्रीकरभाष्यकर्ता श्रीपतिपण्डित शिवाचार्यो ब्रह्मजगतोः द्वैताद्वैतात्मक विशेषाद्वैतसिद्धान्तप्रवर्तक आराध्य ब्राह्मण एवासीत् ।

एतदुभयभाष्यसिद्धान्तमूलभूतं तु सूतसंहितादि । न पुनः शांकरसिद्धान्तमूलं तत् । यतस्तत्र नास्ति निर्गुणवार्तापि । सर्वत्र ह्यत्र ''उमार्धविग्रहः श्रीमान् सोमार्धकृतशेखरः'' एव गीयते ।

यं प्रपश्यन्ति वेदान्तैः स्वरूपं सर्वसाक्षिणम् ।

तमेव शंकरं साक्षात् ददृशुः सुरसत्तमाः ।

अथ देवो महादेवः साम्बो देवैरभिष्टुतः ।

विलोक्य देवानखिलान् प्रीतोऽस्मीत्यब्रवीद्धरः ।।

इति सगुण एव शिवोऽत्र वर्ण्यते । माधवस्तु अत्रापि निर्गुण साक्षात्कार तत्प्रीत्युत्पत्तिपरतामेव पश्यति । तन्मतमनुसृत्य कुणिगल् रामशास्त्रीति सुगृहीत नामधेयोऽद्वैतविद्वान् ''नवकोटि'' ग्रन्थं प्रणिनाय । यत्र शिवस्यैवादिकारणत्वमुपपाद्यते ।

तत्र नारायणशब्दः शिवपरः शिववृत्तिधर्मावच्छिन्न प्रति-पादकत्वात् इति **प्रथमा कोटिः** । नारायणशब्दस्यैव केवल यौगिकत्वे संज्ञात्वाभावेन ''पूर्वपदात् रांज्ञायामगः'' हति णत्वं न प्राप्नोतीति **द्वितीया कोटिः** । ''अट्कुप्वाङ्नुम् व्यवायेऽपी'' ति सूत्रेणैव णत्वसिद्धिः, समस्तपदत्वेन समानपदत्वनिर्वाहादिति **तृतीया कोटिः** । नेदं समानपदत्वं सूत्रे विवक्षितम् । गन्धर्वगानं रामनामेत्यादावतिप्रसक्तेः । अपि तु निमित्तानधिकरण निमित्तिमत् पदाघटितत्वात्मकं तदिति **चतुर्थी कोटिः** । उत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षण प्रतिषेध इति वार्तिकेन प्रत्ययलक्षण प्रतिषेधेनायनेत्यस्य पृथक्पदत्वाभावात् समानपदत्वनिर्वाह इति **पंचमी कोटिः** । वार्तिकेऽपदादिविधिरिति पदान्तविधिरेवेष्टः । अतो नायनशब्दे प्रत्ययलक्षण प्रतिषेधसिद्धिरिति **षष्ठी कोटिः** । अपदादीति पदान्ताभिधानं वक्रम् । अतः पदमध्यविधावपि णत्वे कर्तव्ये प्रत्ययलक्षणप्रतिषेध एवेति **सप्तमी कोटिः** । पदादिविधिर्नाम ''पदादि'' शब्दमुच्चार्य यो विधिः क्रियते स एव । अडिति सूत्रस्यातादृशत्वेन प्रत्ययलक्षणप्रतिषेधे द्रुणस खरणसेत्यादावप्यडिति सूत्रेण णत्वसिद्धौ पूर्वपदात् संज्ञायामिति पुनरारम्भो नियमार्थः ।

अतोऽसंज्ञायामनेन णत्वं निवार्यत इति **अष्टमी कोटिः** । पदादिविधिरिति पदादिशब्दोच्चारणलाक्षणिकत्वे वार्तिकास्वारस्यापत्त्या यथाश्रुतार्थ एवादर्तव्यः । प्रत्ययलक्षणप्रतिषेधश्च कर्तव्यः । णत्वविधिश्चानेतव्य इति **नवमी कोटिः** ।

कोटीनां चासां भेदिनीयं नवकोटिविभेदिनी । ''लध्वीयं नवकोटिविभेदिनी, गुरु नवकोटिविभेदिनी चान्या मयैव रचितास्ती''ति तत्रतत्र अस्मिन् ग्रन्थे स्पष्टमाह ग्रन्थकारः ।

ग्रन्यकारश्चायं कोल्लापुरवासी कट्टे नृसिंहाचार्य इति सुगृहीतनामधेयो द्वैतपण्डितः । नवरत्नकुलावतंसस्य सत्यबोधाचार्यस्य शिष्यः । अत एव स ग्रन्थान्ते स्वयमेव स्वात्मनः परिचयमेवमाह-

नृसिंह पाद पूजार्थं कोलाहलपुरौकसा ।
कट्टे नृसिंहेन कृता नवकोटिविभेदिनी ।।

इति श्री नवरत्नसत्यबोधार्यशिष्येण कोलाहल कट्टे नृसिंहेन कृता नवकोटिविभेदिनी समाप्ता । इति ।

नवकोटि ग्रन्थः शिवस्यादिकारणत्वं सर्वोत्तमत्वं च प्रथममनेन मङ्गलपद्येनैवं प्रस्तौति-

शर्वाण्याश्लिष्टवर्ष्माणं जगज्जन्मादिकारणम् ।
विष्णवाद्यर्चित पादाब्जं वन्देऽहं सर्वदा शिवम्।। इति ।।

एवं शिवस्यादिकरणत्वं प्रस्तूय तत्साधयितुमनाः सर्वाण्यपि

कारणवाक्यानि शिवपराणि नेष्यन् ''एको ह वै नारायण आसीदि''ति महोपनिषद्वाक्यस्थ नारायणशब्दस्य शिवनामतां साधयितुं यतते ।

तत्रेयमनुपपत्तिरवतरति । शुद्धाद्वितीयब्रह्मवादिनामद्वैतिनां सगुणस्य गौरीपतेरादिकारणत्ववादः कथं संगच्छतामिति ।

ननु गौरीपतेरादिकारणत्वं सूतसंहितादौ सिद्धम् । सूतसंहितां च मूलीकृत्याद्वैतभाष्यं प्रवृत्तम् ।

तामष्टादशधा दृष्ट्वा शंकरः सूतसंहिताम् ।
चक्रे शारीरकं भाष्यं सर्वश्रुतिमनोहरम् ।।

इत्यभियुक्तोक्त्या भाष्यकारादृता सूतसंहिता भाष्यानुमतेत्यनुमीयते । अतो भाष्यमपि शिवकारणतापरमिति । मैवम् । भाष्ये तदनभिधानात् । प्रत्युत नारायणस्यादिकारणतामेवाह भाष्यकारो गीताभाष्यारम्भे यथा-

नारायणः परोऽव्यक्तादण्डमव्यक्तसम्भवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ।।

स भगवान् वासुदेवः सृष्ट्वैवं जगत्...

स आदिकर्ता नारायणाख्यो विष्णुः इत्यादि ।

''भज गोविन्दं भज गोविन्दम्'' इत्यादरेणोपदिश्य,

भगवद्गीता किंचिदधीता
गंगाजललव कणिका पीता ।

सकृदपि येन मुरारि समर्चा

क्रियते तस्य यमेन न चर्चा ।

इति भगवद्गीतायास्तारकत्वं चाह । विष्णुसहस्रनाम भाष्यारम्भ एवैवमाह -

सहस्रमूर्तेः पुरुषोत्तमस्य

सहस्रनेत्राननपादबाहोः ।

सहस्रनाम्नां स्तवनं प्रशस्तं

निरुच्यतेजन्मजरादि शान्त्यै ।। इति ।।

प्रत्युत शिवस्य न क्वापि भाष्यादावादिकारणत्वमाह । ''शरीरमेव शरीरकम् । तत्प्रभवः शारीरको जीवः । तमधिकृत्य कृतो ग्रन्थः शारीरकमि''ति निर्वक्ति । न पुनः शिवमधिकृत्येत्यादि। अतो नास्ति शिवकारणतानैर्भर्यमस्येत्युन्नीयते । इयं हि तदनुयायिनामुक्तिः -

शिवं वा विष्णुं वा यदभिदधति शास्त्रस्य विषयम् ।

विरोधो नास्माकं स्फुरति नहिनिन्दानयविदाम् ।

इत्यादिः ।

न च शिवविष्ण्वोरभेदाभिप्रायाऽस्तु विष्णुकारणतोक्तिः । शिवस्यैवादि कारणतेत्यवधारणानानुगुण्यात् ।

किंच शिवकारणत्वं न निमित्तत्वरूपं शक्यं वक्तुम् । पत्युर-

सामंजस्यात् इत्यधिकरणेऽद्वैतभाष्ये तन्निराकरणात् । नाप्यभिन्न निमित्तोपादनत्वरूपं तत्। ब्रह्मणः परिणाम्युपादानत्वानंगीकारात्। निर्गुणे विवर्तोपादानताङ्गीकारेऽपि सगुणे तदभावात् । सगुणे निमित्ततास्तु, अस्तु च निर्गुणे विवर्तोपादनता । द्वयोरभेदादभिन्ननिमित्तोपादनता भविष्यतीति चेन्न । एवं हि वदता सगुणनिष्ठस्य निमित्तत्वस्य शुद्धे आरोप उक्तो भवति । बाढमिति चेन्मिथ्यात्वेनानादित्वायोगः । जीव ईशो विशुद्धा चिदित्युक्तदिशा मिथ्यात्वेऽप्यनादितेति चेत् जीवस्याप्यनादितयाऽऽरोपाधिष्ठानस्य ब्रह्मण इव कल्पकस्य जीवस्याप्यारोपे आवश्यकत्वेनादिकारणतापत्तिः । जीवेशशुद्धानामभेदात् सामञ्जस्याभिप्राये शिवस्यैव सेत्यवधारणानुपपत्तिरिति ।

किं च शिववृत्तिधर्मावच्छिन्न प्रतिपादकत्वमात्रेण न नारायणशब्दस्य कारणवाक्ये शिवपरत्वाध्यवसायः शक्यो विज्ञातुम् । नहि वाचकत्वं तात्पर्यलिङ्गम् । उपक्रमादिना तु तात्पर्ये गृहीते विनापि वाचकत्वं संकेत लक्षणादिना शिवपरत्वं सुवचम् । तत्वमस्यादावियमेव हि गतिः । विष्णुसहस्रनाम भाष्येऽपि ''स ब्रह्म स शिवः स हरि'' रितिवत् शिवनाम्नामभेदोपचारेण विष्णुपरतोक्ता । तत्र ह्युमया सहितः शिवः सोम इति व्युत्पत्तिमुपेत्यैव कार्यकारणाभेद विवक्षया सोमशब्द समन्वयः कृतः । एवमेव प्रकृते नारायणशब्दस्यापि कार्यवाचिताविवक्षयोपपत्तौ किं मुख्यवृत्त्याश्रयणेन? एवं हि कृते ''ऋते नारायणा-दीनी'' त्याद्यागमोऽनुकूलितो भवति । ''शिवं सर्वोत्तमं विप्रा'' इत्यादि सूतसंहितावचनमप्यनुकूलितं भवति ।

किंचापो नारा इति प्रोक्ता इत्यादि स्मृत्या तावन्नारायणशब्दस्य जलशायित्वं प्रवृत्तिनिमित्तमुक्तम् । तस्य शिववृत्तिधर्मत्वे किं मानम्? ननु,

ब्रह्माणं दक्षिणे तस्य कृतांजलिपुटं स्थितम् ।

वामे विष्णुं महाबाहुं कृतांजलिपुटं तथा ।

मध्ये लिङ्गं महाघोरं महाब्धेरम्भसि स्थितम् ।

इति शिवपुराणमेव मानम् । न । आसुरजनानामन्यथाकारोपासनार्थेयं हि वाचोयुक्तिः । ''त्वं च रुद्र महाबाहो मोहशास्त्राणि कारये'' त्यादि वचनसिद्धोऽयमर्थः । वस्तुतस्तु ''दशकल्पं तपश्चीर्णं रुद्रेण लवणाम्भसी'' त्यादि भारतोक्तरीत्या शिवोऽत्र महाब्धेरम्भसि तपः कुर्वाण उपवर्ण्यते । तपोऽर्थे गुरुतदेवतयोर्ब्रह्मविष्ण्वोः पार्श्वे स्थितताप्युच्यते । तौ प्रति शिवस्य कृतांजलिपुटता च । कृतांजलिपुटमिति हि लिङ्गविशेषणं, न ब्रह्मविष्ण्वोः । यल्लिङ्गं कृताञ्जलिपुटं मध्ये स्थितं, तस्य दक्षिणे ब्रह्माणं, वामे विष्णुमिति । किमत्र विनिगमकमिति चेत्, शिवकारणतावचनस्य मोहार्थतया सावकाशत्वं विष्णुकारणतावचनस्य च निरवकाशत्वमिति वदामः । नैवमद्वैते वक्तुं शक्यम् । तन्मते मोहनीयाधिकारिभेदाभावात् ।

किंचानेन शिवस्य जलशायित्वमात्र सिद्धावपि न प्रलय-जलशायित्वसिद्धिः। नहीदं प्रलयजलवर्णनम् । मूर्तित्रयावस्थानोक्तेः। एको नारायण आसीन्न ब्रह्मा न च शंकर इति वाक्ये तु न तथा ।

ब्रह्मशंकरयोर्निषेधात् । अपि च भागवते सत्यव्रतेन, भारतभागवतयोश्च मार्कण्डेयेन, प्रलयदिदृक्षया विष्णुरेव प्रार्थ्यते । इदमेव हि प्रलयकारिताया विष्ण्वेकनिष्ठत्वे लिङ्गम् । तत्र भारत-भागवतयोरुभयत्राप्यापो नारा इत्यादि वचनमस्ति । तदेव वचनं मनुस्मृतावपि दृश्यमानं न विष्णुपरतां विना शोभते ।

स्पष्टं च सहस्रनाम शांकरभाष्ये उक्तम्-

''नर आत्मा । ततो जातान्याकाशादीनि नाराणि कार्याणि । तानि कार्याणि अयते कारणात्मना व्याप्नोति । अतश्च तान्ययनमस्येति नारायणः ।

यच्च किंचिद् जगत्सर्वं दृश्यते श्रूयतेऽपि वा ।

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।।

इति मन्त्रवर्णात् ।

नराज्जातानि तत्वानि नाराणीति विदुर्बुधाः ।

तान्येव चायनं तस्य तेन नारायणः स्मृतः ।।

इति वचनात् ।

अयनत्वान्नाराणां प्रलये ह्ययं नारायणः । यत् प्रयन्त्यभि-संविशन्तीति श्रुतेः ।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।

ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ।।

इति वचनाद्वा नारायणः । किंच,

रजोगुणं समाश्रित्य विरिंचाद्यात्मना यतः ।
स भूतानि करोतीति भूतकृत् कथ्यते हरिः ।
तामसं गुणमास्थाय रुद्ररूपी जनार्दनः ।
कृंततीति क्षिणोतीति हिनस्तीत्यथ भूतकृत् ।।

इत्यादिभिः सहस्रनामशांकरभाष्योदाहृत वचनैर्ब्रह्मशिवाख्ये अपि रूपे विष्णोर्भवतः । अतो रूपत्रयेण लीलया उपास्योपासकभावेनाब्धिस्थितितापि युज्यत एव विष्णोः । अतो नानेन शिवस्य जलशायित्वं सिध्यति ।

अस्तु वा शिवस्य जलशायित्वम् । तथापि तस्य शिवे नारायणशब्दप्रवृत्तौ निमित्तता केनावसीयते? प्रयोगसत्वे निमित्तानुसरणं भवति । नहि निमित्तमस्तीति प्रयोगः । अन्यथा-

''अराणां चक्रशंकूनामयनं श्रीविष्णुचक्रम् । न विद्यतेऽरायणं धार्यतया यस्य स नारायणः । यद्वा अराणां जीवगत दुःखित्वादि दोषाणामयनमाश्रयः शिवः । वृकासुराय गिरिशो वरं दत्वाप संकटमिति भागवतोक्तेः । एतादृशः शिवो नो नेता यस्य सः नारायणः । इत्यादि व्युत्पत्त्या नवकोटिग्रन्थकारोऽप्ययं नारायणनामा भवन्नादिकारणं च किं न स्यात्? तस्याचक्रधारित्वे हि न विवादः । न वा तस्य शिवनेतृकत्वे । अथापि यदि तस्मिन् नारायणशब्दप्रवृत्तौ नेदं निमित्तमतो न तस्यादिकारणत्वापत्तिः तर्हि समं प्रकृतेऽपि ।

विष्णोस्तु आपो नारा इत्यादिना नारायणशब्दप्रवृत्तिनिमि-

त्तत्वेनैव जलशायित्वमुच्यते । अम्भस्यपार इत्युपक्रमे यमन्तः समुद्र इति मध्ये च यत्र महोपनिषदि जलशायित्वमुक्तं तत्र प्रयुक्तो नारायणशब्दः,

नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ।

इति वासुदेवविष्णुपद सामानाधिकरण्यात् शिवरुद्रादिपद समानाधिकरण्याभावाच्च विष्णुपर एवावसीयते । नैवं शिवपरतायां किंचिल्लिंगमुपतिष्ठते । यद्यपि,

ततः स भगवान् प्रीतः कपर्दी वृषवाहनः ।
संहृत्य परमं रूपं प्रकृतिस्थोऽभवद् भवः ।
ते भवं भूतभव्येशं पूर्ववत् समवस्थितम् ।
दृष्ट्वा नारायणं देवं विस्मिता वाक्यमब्रुवन् ।।

इति कूर्मपुराणे शिवनृत्यवर्णनपूर्वक शिवस्तुतिवर्णने शिवे नारायणशब्दः प्रायोजि । तथापीदं स्तुतिमात्रमवगन्तव्यम् । तथाहि । तत्रैव शिवेनावादि पाशविमोक्षणयोगवर्णने-

ममैषा परमा मूर्तिर्नारायण समाह्वया ।।

इति । न च स्तुतिवाक्ये प्रयोगदर्शनमात्रेण पदवाच्यत्वसिद्धिः ।

त्वमग्न इन्द्रो वृषभः सतामसि
त्वं विष्णुरुरुगायो नमस्यः ।

इति वेदे अग्नेरिन्द्रविष्णुनामभिः स्तुतिरस्ति । न तावताऽग्ने-

रिन्द्रविष्णुनामता। अतः कूर्मपुराणे नारायणभक्तत्वान्नारायण-स्यायमित्यणि शिवे नारायणशब्दो द्रष्टव्यः। वैष्णवानां यथा रुद्र इत्यादिनायमर्थः सिद्धः।

किंच नारायणशब्दस्य केवलयौगिकत्वे णत्वं दुरुपपादम्। पूर्वपदात् संज्ञायामग इति हि पाणिनिस्मृतिः। अट्कुप्वाङ्-नुम्व्यवायेऽपीति सूत्रेण णत्व साधनं तु साहसमात्रम्। समान-पदत्वाभावात्। समासोत्तर विभक्त्या सुबन्तत्वात्मकैकपद्य सम्भवेऽपि सूत्रे तदविवक्षणात्। निमित्तानधिकरण निमित्तिमत् पदाघटितत्वरूप पारिभाषिक समानपदत्वत्वस्य विवक्षितस्य चाभावात्। रामनाम गन्धर्वगानमित्यादौ णत्ववारणाय पारिभाषिकं समानपदत्वं ह्याश्रयणीयम्। अन्यथा प्रनिरन्तरित्यादिसूत्रम्, अग्रग्रामाभ्यामिति च वार्तिकं व्यर्थमापद्येत। प्रवणमग्रणीरित्यादावडिति सूत्रेणैव णत्व सम्भवात्।

ननूत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षण प्रतिषेध इति वार्तिकस्य जागरूकत्वेन प्रत्ययलक्षणप्रतिषेधात्, अन्तर्वर्तिनीं विभक्तिमाश्रित्य भिन्नपदत्वायोगः, समानपदत्वसम्भवश्च। न। अपदादिविधावित्यस्य हि पदान्तविधावित्यर्थः। तेन णत्वस्य पदमध्यविधित्वेनेह वार्तिकाप्रवृत्त्या न समानपदत्वनिर्वाहः शक्यः। यथाश्रुतार्थे तु गन्धर्वगानादिषु णत्वस्यावारणात् तद्वारणार्थं सूत्रे समानपददानं न युज्येत।

यद्वाऽपदादिविधावित्यस्य सात्पदाद्योरिति सूत्रमारभ्य यो

विधिस्तदन्यविधावित्यर्थः। अन्यथा माषकुम्भवापेनेत्यत्र प्रत्यय-लक्षणप्रतिषेधे कुम्भेत्यस्यापदत्वे पदव्यवायेऽपीति णत्वनिषेधः कथमुपपद्येत? तथाचाडिति सूत्रस्य सात्पदाद्योरित्यतोऽनंत-रपठितत्वेन अपदादिविधित्वाभावान् न प्रत्ययलक्षणप्रतिषेधः।

यदि परमबुधावित्यादौ एकाचो बशो भषिति भष्त्ववारणाय पदादिविधिर्नाम पदादिशब्दमुच्चार्य यो विधिः क्रियते, यथा सात्पदा-द्योरिति, स एव विवक्षणीयः। तथाचाडिति सूत्रस्यापदादिविधित्वेन वार्तिकप्रवृत्तिर्न शक्यवारणेत्युच्यते तर्हि विभक्तीतरानपेक्षतया लोकेऽर्थप्रत्यायकत्वरूपं पदत्वमयनशब्दस्य भविष्यति। अन्यथाऽऽ-चार्यादणत्वं चेति वार्तिकं व्यर्थमापद्येत। आचार्यानीत्यत्र निमित्तिमत् प्रातिपदिकभिन्न समुदाय वृत्तित्वेन नकारस्य णत्ववारण सम्भवात्।

एवं च केवल यौगिकत्वे नारायणशब्दे णत्वं दुरुपपादम्। एवं स्थिते नवकोटिकारैः पुनरन्या व्युत्पत्तयोऽपि प्रदर्श्यन्ते यथा-

''न विद्यते राः यस्य अराः दरिद्रः। स न भवतीति नाराः श्रीमान्। स चासावश्च नारायः श्रीमान् विष्णुः। तस्य णः सुखं यस्मादिति शिवो नारायणः। स्वनेत्र सहित सहस्र कमलार्चन तोषितेन शिवेन विष्णोश्चक्रप्रदानेन सुखजननादि'' त्यादि।

एतच्च नवकोटिकारस्याप्येवंविध व्युत्पत्तिभिर्नारायणनाम तापादनेन पूर्वमेव प्रत्युक्तम्। या च चक्रप्रदानादिकथा पुराणेषु साऽसुरजनमोहनार्था। शिवार्चनादिकर्मसाध्य प्रयोजनवत्ताया जीवत्वा-

विनाभूताया आदिकारणे जीवविलक्षणे विष्णौ असम्भवात् । शिव एव च तत्सम्भवत् ।

“यं कामये तं तमुग्रं कृणोमि ।”

“अस्य देवस्य मील्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः । विदे हि रुद्रो रुद्रियं महित्वम् ।।”

“सोऽरोदीद् यदरोदीत् तद् रुद्रस्य रुद्रत्वम् ।।”

“स एव भगवान् राजन् व्यतनोद् विततं यशः ।

रुद्रस्य देवदेवस्य मयेनानन्त मायिना ।।”

“तस्य विश्वेश्वरस्येदं चक्रं दुर्विषहं हि नः ।।”

इत्यादि श्रुतिपुराणैः रुद्रस्य विष्णुदत्तपदादिमत्व विष्णुचक्रसह-नाक्षमत्वादि बहुशो वर्ण्यते । गीताशांकरभाष्येऽपि नानवाप्तमवाप्त-व्यमित्यत्र विष्णोः प्राप्तप्राप्तव्यत्वमुक्तम् ।

मधुसूदन सरस्वतीकृतायां गीतागूढार्थप्रदीपिकायामपि “अव्यक्तं व्यक्तिमापन्नं” “नाहं प्रकाशः सर्वस्य” “मामात्मपरदेहेषु” इत्या-दिश्लोक व्याख्यावसरे कृष्णस्याप्राकृतविग्रहत्वाद्युक्त्वा तद्विरुद्ध-भाषिणामनर्थप्राप्तिश्चोक्ता । एवं च शिवपारम्यवचनानामसुरमोहनार्थतैव युक्ता । अयुक्ता च विष्णुपारम्यवचनानां तथाविधता । तदुपदेष्टृ-स्वाचार्याणां प्रतारकत्वप्रसंगात् ।

नवकोटिकारोऽन्ते स्वग्रन्थं शिवपादाम्बुजे समर्प्य निर्मत्सराणां विदुषामनेन सन्तोषजननमाशास्ते ।

नवकोटिरयं ग्रन्थः शिव पादाम्बुजेऽर्पितः ।

निर्मत्सराणां विदुषां सन्तोषं तनुतां चिरम् । इति ।।

एतदप्ययुक्तम् । हरिवंशे श्रीकृष्ण कैलासायात्रायां हि श्रीकृष्णं प्रति शिववचनं यथा-

यश्च त्वां द्वेष्टि भो देव स मां द्वेष्टि न संशयः । इति ।

अतो विष्ण्वसाधारण नाम्नो नारायणशब्दस्य सकल श्रुति-स्मृतीतिहास पुराणवचन स्वाचार्यवचन विरोधेन केवल स्वोत्प्रे-क्षितव्युत्पत्तिबलेन शिवनामत्वस्थापने प्रवृत्तस्यास्य ग्रन्थस्य कथं शिवपादाम्बुजेऽर्पणयोग्यता स्यात्? कथं वा निर्मत्सर विद्वत्सं-तोषजनकता स्यादित्युक्त्वा अलमतिनिर्दल तत्पक्षप्रतिक्षेप क्रियाविस्तरेणेत्युपसंहरति विभेदिनीकारः ।।

●●●

नवकोटि भंजनायात्र द्वितीयोऽप्यस्त्यद्वितीयो ग्रन्थोऽनन्तार्येण ग्रथितो नवकोटिविभंजनाभिधः, णत्वतत्वविभूषणेति णत्वतत्व-विनिर्णयेति चापरनामधेयः, यत्र पुनरन्या अपि युक्ता युक्तयो रुचिराः समुल्लसन्ति । यथा- आदावेव मङ्गलपद्ये उक्तं—

यत्पाद निःसृतात् तीर्थात् शिवस्तु शिवतां गतः ।

तमहं सर्व वेदान्तसारं नारायणं भजे ।। इति ।

अयं भावः-

यच्छौच निःसृतसरित्प्रवरोदकेन

तीर्थेन मूर्ध्न्यधि धृतेन शिवः शिवोऽभूत् ।

इति श्रीमद्भागवतोक्तदिशा शिवस्य शिवत्वमपि हरिपादोदक-प्रभावलब्धं, तस्य हरिप्रभृति संकल जगत्कारणत्वोक्तिः कथं संगच्छतामिति ।

किंच शुद्धकारणतावादिनामद्वैतिनां शबलशिवैककारण-तावादोऽयं नैव शोभां बिभर्ति । केवल शैवजन सबहुमानावलोकन लिप्सया तन्मतं प्रविश्यायं नवकोटी रचितोऽद्वैतिना सता रामशास्त्रिणेत्यूह्यते ।

यद्यपि कारणवाक्यस्थ नारायणपदस्य शिवपरत्वं लक्षणयापि वक्तुं शक्यते । अथापि नवकोटिकारो योगेन तत्साधयति महता यत्नेन । किं तेन ?

न च योगसम्भवे न लक्षणाऽऽश्रयणीया । बहुव्रीहावन्य-पदार्थलक्षणाया अनिवारणात् ।

योगसम्भवे लक्षणानाश्रयणं शास्त्रिणः स्वसिद्धान्तविरुद्धमपि, आकाशादि शब्दानां ब्रह्मणि योग सम्भवेऽपि गौण्या लक्षणाया वाऽद्वैतभाष्यादावाश्रयण दर्शनात् ।

किं चेदं नारायणशब्दस्य शिवपरत्वं न तावत् शिव-वाचकत्वरूपं साधनार्हम् । तदेकदेशायन शब्दस्याधिकरणसामान्य वाचकस्य शिववाचित्वानपायात् एकदेशिनस्तदभावायोगात् । नहि विशेष्यवृत्तेर्विशिष्टानुयोगिकोऽभावोऽभ्युपगम्यते ।

न च शक्तिभ्रम लक्षणाग्रहानधीन शिवविषयित्वावच्छिन्न शाब्दबोध जनकतावच्छेदक विषयताश्रयत्वरूपं तत् । पर्याय पदान्तर जन्य बोधे व्यभिचार वारणाय अव्यवहितोत्तरत्वस्य जन्यता-

वच्छेदकत्वे विषयितायाः प्रयोजनविरहेणानिवेशेन शिवविषयित्वा-वच्छिन्न बोधजनकतावच्छेदक विषयताया नारायणशब्देऽयोगात् । तत्साधने बाधप्रसंगात् ।

शुद्धकारणतावादिनामद्वैतिनां शिवकारणतावादानुसरणं न स्वाचार्यसम्मतं भवितुमर्हति । न च वाच्यं शिवकारणत्वं सूत-संहितोक्तं, सा च सूतसंहिताऽद्वैतभाष्यमूलम् ।

तामष्टादशधा दृष्ट्वा शंकरः सूतसंहिताम् ।

चक्रे शारीरकं भाष्यं सर्वश्रुतिमनोहरम् ।।

इत्यभियुक्तोक्तेरिति । अंशविशेषे तत्तत्पुराणविरुद्धार्थके व्याकरण समानार्थत्वाभाववति च महाभारते,

अष्टादश पुराणानि अष्ट व्याकरणानि च ।

दृष्ट्वा सत्यवतीसूनुश्चक्रे भारतसंहिताम् ।।

इत्याद्युक्तिवत् अद्वैतभाष्यस्य सूतसंहितामूलकत्वाभावेऽपि तामष्टादशधेत्युक्तेरुपपत्तेः ।

नारायणशब्द प्रवृत्तिनिमित्तभूतं जलशायित्वं शिवे दुर्लभं च । नच,

मध्ये लिंगं महाघोरं महाब्धेरम्भसि स्थितम् ।

इति शिवपुराणवचन प्रामाण्यात् सुलभमेव तदिति वाच्यम् । सात्विकपुराण विरोधेनास्य प्रामाण्याभावात् । प्रामाण्येऽपि,

ध्यायन् प्रदोष समये शिवसायुज्यमाप्नुयात् ।

इति ध्यानाकारसमर्पण परत्वेन, ध्यानस्य च भ्रमत्वेऽप्युपपत्त्याऽस्य वचनस्य विषय सत्वासाधकत्वात् । वस्तुतोऽस्य वचनस्य तामसस्य ब्रह्मविष्ण्वोर्लिंगाग्रमूलान्वेषणासामर्थ्य प्रदर्शनाय प्रवृत्तत्वेन शिवस्य जलशायित्वाबोधकत्वात् । स एवाधस्तादित्यादेरिवाम्भसि स्थित-मित्यस्य सम्बन्धमात्र प्रतिपादकत्वात् न तेन शिवस्य जलशायित्व सिद्धिः ।

नारायणशब्दस्य केवल यौगिकत्वे णत्वासम्भवेन जल-शायित्वावच्छिन्न प्रतिपादकत्वासम्भवात् तदर्थं णत्वं यथाकथंचित् साधनीयमेवेति मन्यते नवकोटिकारः । तन्मिथ्या । णत्वाभावेऽपि योगेनार्थ बोधकत्वसम्भवात् । न हि संज्ञानिमित्तं णत्वं योगेनार्थप्रतिपादने उपयुज्यते । अपि तु रूढ्या प्रतिपादने । असंज्ञात्वे णत्वमसाध्वित्यन्यदेतत् ।

नारायणशब्देऽन्तर्वर्तिनीं विभक्तिमाश्रित्य अयनेत्यस्य पदत्वप्राप्त्या तद्घटक नकारस्य भिन्नपदस्थितत्वान्न णत्वमिति स्थिते नवकोटिकारेण उत्तरपदत्वे चापदादिविधाविति वार्तिकबलेन प्रत्ययलक्षणप्रतिषेध उच्यते । नेदं युज्यते । उत्तरपदस्य पदत्वप्रयुक्ते हि कार्ये प्रत्ययलक्षणप्रतिषेधो वक्तव्यः । न चात्र णत्वकार्यमुत्तर पदस्य पदत्वप्रयुक्तं भवितुमर्हति । पदत्वाभावे हि तत् सम्भवति ।

अस्तु वा प्रत्ययलक्षणप्रतिषेधः । तथापि नेह सुप्तिङन्तं पदं विवक्षितम् । गन्धर्वगानमित्यादौ गतिकारकोपपदानामिति परि-

भाषया सबुत्पत्त्यभावेन गानस्यापदत्वेन णत्वापत्तेः । अपि तु विभक्तीतराव्यवधानाधटिताकांक्षावत्वरूपं पदत्वं विवक्षणीयम् । तथासति हि गानमित्यस्य विभक्तीतराव्यवधाननियमाभावाद्, भिन्न पदस्थत्वेन नस्य न णत्वमिति युज्यते । रामेणेत्यत्रेनेत्यस्य विभक्तीतर प्रातिपदिकाव्यवधान नियमसत्वेनापदत्वात् नस्य णत्वमिति च । एवं चायनेत्यस्य उक्तनियमाभावेन न णत्वमिति।

''न विद्यते राः यस्य स अराः दिरद्रः । स न भवतीति नाराः श्रीमान् । स चासावश्च नारायो विष्णुः । तस्य णः सुखं यस्मादिति व्युत्पत्त्या नारायणशब्दस्य विष्णुसुखजनके शिवे शक्तिसिद्धिः । शिवस्य विष्णुसुख जनकत्वं च शिवपुराणोक्तया चक्रप्रदानादिकथया सिद्ध्यती''ति नवकोटावुक्तम् । दुरुक्तं तत् । बहुव्रीहावन्यपदार्थ लक्षणानियमेन शक्तिसिद्ध्यभावात् ।

किं च शिवपुराणे शिवेन विष्णोश्चक्रप्रदानोक्तावपि विष्णुना तत्स्वीकारः शिवस्यैव सुखाय । वराहपुराणे शिवेन तथा वरप्रार्थनस्य, विष्णुना च तत्प्रदानस्योक्तेः ।

एवमादीर्युक्तीरभिधायानन्तार्य उपसंहरत्यलं पल्लवितेनेति । स्वग्रन्थस्यादावन्ते च स्वात्मनः परिचयमप्येवं दिशति -

शेषार्य वंश वार्धीन्दुरनन्ताचार्य कोविदः ।

करोति विदुषां प्रीत्यै णत्व तत्व विभूषणम् ।। इति ।।

शेषार्यवंश रत्नेन यादवाद्रि निवासिना ।

अनन्तार्येण रचितं नवकोटि विभंजनम् ।। इति च ।।

अन्यत्र ''श्रीशैलानन्तपुरुषकुलतिलकेन यादवाद्रिवासिनानन्तार्येणे''त्यपि ग्रन्थसमापनं दृश्यते । अनेनायमनन्तार्यः श्रीशैलवासिनां अनन्तपुरुषाणां शेषार्यापरनामधेयानां कुलतिलकायमानः यादवाद्र्यपरनामधेये कर्णाटकस्थ मेलुकोटेनामक गिरौ उवासेति ज्ञायते । कर्णाटकदेशीय महीशूराधीश्वरस्य श्रीकृष्णराजओडेयर् महाराजस्यास्थानसभामण्डनायमानोऽप्यासीदेषोऽनन्तार्यः । भगवद्रामानुजसंप्रदाये कवितार्किकसिंहस्य वेदान्तदेशिकस्य चण्डमारुतादिग्रन्थप्रणेतुर्महाचार्यस्य चानन्तरं नवीनन्यायमार्गेण विशिष्टाद्वैतवेदान्तप्रतिपादकानां न्यायभास्कराद्यनेक ग्रन्थानां रचयिताऽयमनन्तार्यः अल्पेऽपि जीवनकाले (क्रि.श.१८२२-१८६२) अनल्पग्रन्थेष्वनल्पपरिष्कारवैभवं प्रदर्श्य सुप्रसिद्धो बभूव । एष स्वीये दृश्यत्वानुमाननिरासवादे पुनरधिकं स्वात्मपरिचायकमेवमादौ निर्दिशति

श्री श्रीनिवास परकाल यतीश्वराणां
विद्वद्वरिष्ठ कलिते किल सन्निधाने ।
योऽभूत् प्रसंगवशतो विषयः स एष
संलिख्यते क्रमवशेन कुतूहलेन ।।

स्वामिनस्तत्र मध्यस्था वादिनो रामशास्त्रिणः ।
अनन्तार्यश्च कुतुकात् प्रपेदे प्रतिवादिताम् ।। इति ।

अनेन नवकोटि ग्रन्थकारस्य मूलतः कुणिगल् इति प्रसिद्धे कर्णाटकदेशीये पत्तने वासिनो रामशास्त्रिणः समकालीनोऽयमनन्तार्य इति ज्ञायते । तेन रामशास्त्रिकालोऽप्युक्तप्राय एव । नवकोटिविभेदिनीकारः कट्टे नरसिंहाचार्योऽपि तस्मिन्नेव कालेऽवर्तत ।

●

नवकोटिविभेदिन्या एका मातृका तिरुपतिस्थ राष्ट्रियसंस्कृत विद्यापीठीय ग्रन्थालयस्थाऽऽचार्यगोविन्दन्महाभागानां सूचनानुसारेण लब्धा । द्वितीया मातृका महीशुर प्राच्यसंशोधनकेन्द्रीय ग्रन्थालयस्था । तृतीया मातृका डा । प्रभंजनाचार्याणां संग्रहस्था । प्रथमां मातृकां विद्यापीठस्य माननीय कुलपति महाभागाः, द्वितीयां मातृकां विद्वांस आनन्दतीर्थनागसंपिगे माहाभागाः तथा तृतीयां मातृकां डा । प्रभंजनाचार्यमहाभागाश्च दत्वा महान्तमुपकारं चक्रुः ।

णत्वतत्त्व विभूषणग्रन्थमातृका त्वेकैव लब्धा । तामपि डा । प्रभंजनाचार्या एव दत्वा उपकृतवन्तः । एतेभ्यः सर्वेभ्योऽपि कार्तज्ञपूर्वकाणि नमांसि वितीर्यन्ते । ग्रन्थास्यास्य गणकयन्त्रारोपणकर्म साधु कृतवतां विदुषां श्रीमाधवाचार्याणां तथा श्री प्रेमकुमाराणा मप्यधमर्णोऽयं जनः ।

-के. हयवदन पुराणिकः

विषयानुक्रमणिका

नवकोटि विभेदिनी

णत्व तत्व विभूषणम्

।। श्री वेङ्कटेशाय नमः ।।

श्रीकोलाहल कट्टे नरसिंहाचार्येण कृता परकृत नवकोटि निरसनी

नवकोटि विभेदिनी

श्रीमदानन्दतीर्थगुरुभ्यो नमः । श्री हयग्रीवाय नमः । गुरवे नमः ।

विष्णोरेवादिकरणत्वं श्रुत्यादिसिद्धम्

ॐ यं विष्णुं कवयोऽवयन्ति जलधावग्रेऽस्य यश्चाप्यये
न ब्रह्मा न च लिंगमूर्तिरबुधैः कूर्मादिवाक्यैर्मितः ।
यस्यापस्तनुजाः पुरा यदयनं ता यो नरो नेतृतः ।
तं नारायणसंज्ञमागममितं नालीकनाभं नुमः ।।
नत्वा मध्व जय व्यास सत्यबोधादि सद्गुरून् ।
कट्टे नृसिंहस्तनुते नवकोटि विभेदिनीम् ।।

इह खलु संसाराकूपारपारं जिगमिषताम् अर्थनीयस्य श्रीभगवत्प्रसादस्य तज्ज्ञानमन्तरेण असम्भवात् तदर्थं प्रवृत्तानां कालादिबलादपपाठादिना तिरोहितशक्तिकानाम् अनन्ताम्नायानां शक्त्युद्बोधनार्थं ब्रह्मरुद्रेन्द्रादिभिरर्थितो भगवान् नारायणो व्यासत्वेन अवतीर्योच्छिन्नान् वेदान् उद्धृत्य विभज्य च तदुपबृंहकत्वेनेतिहास पुराण पंचरात्र मूलरामायणादीन्यन्यावताररूपैश्च निर्माय तदर्थनिर्णायक ब्रह्मसूत्राणि च निर्माय प्रकृतसदागमानां सूत्राणां च

"ब्रह्मसूत्रपदैश्चैव हेतुमद्भिः सुनिश्चितैः"

इत्यादि गीतावाक्येन करणेतिकर्तव्यताभावं च प्रदर्श्य, गतिसामान्यन्यायेन सर्ववेदान्तप्रत्ययन्यायेन च सर्ववेदोत्पाद्यज्ञानानां कारणवाक्यस्थों ब्रह्म नारायण सदात्म वासुदेव रुद्र शिवादिशब्दानां विष्णुसमन्वयेनैकविषयत्वं प्रदर्श्य "जन्माद्यस्य यत" इति सूत्रेण जगज्जन्मादिकारणत्वं पूर्वसूत्रे जिज्ञास्यत्वेन प्रसक्तस्य नारायणस्य विष्णोः परब्रह्मणः समर्थितवानिति तत्वम् ॥

उक्तार्थे श्रुतयः स्मृतयश्च -

"ओमित्येतदक्षरमिदं सर्वं" "ब्रह्मैवेदमग्र आसीत्" "एको नारायण आसीन्न ब्रह्मा नच शंकरः" "सदेव सोम्येदमग्र आसीत्" "आत्मा वा इदमेक एवाग्र आसीत्" "वासुदेवो वा इदमग्र आसीत्" "एको रुद्रो न द्वितीयाय तस्थे" "न सन्न चासीच्छिव एव केवलः"

"ब्रह्माख्यमस्योद्भवनादिहेतुभिः स्वलक्षणैर्लक्षितभावनिर्वृतिम्"

"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा"

इत्याद्याः सूत्रोपात्ता एवानन्ताः सन्ति ॥

विशिष्टाद्वैतिभिरपि-

यन्मूलकारणमबुध्यत सृष्टिवाक्ये
ब्रह्मेति वा सदिति वात्मशिवेति वा तत् ॥
नारायणस्त्विति महोपनिषद् ब्रवीति
सौबालकीप्रभृतयोऽप्यनुजग्मुरेनाम् ॥

निस्साधारण्य नारायण पद विषये निश्चयं यान्त्यबाधे
सद्ब्रह्माद्याः समानप्रकरणपठिताः शंकितान्यार्थशब्दाः ॥
अन्तर्यन्ता च नारायण इति कथितः कारणं चान्तरात्मे-
त्यस्मादप्यैककण्ठ्यं भजति निरुपधिस्तत्र शंभ्वादि शब्दः ॥

इति वदद्भिः विष्णोरेव आदिकारणत्वं तत्रैव कारणवाक्यस्थ नारायणादिशब्दानां प्रवृत्तिरिति च समर्थितम् ॥

भगवद्गीताशांकरभाष्येऽपि -

"नारायणः परोऽव्यक्तादण्डमव्यक्त सम्भवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥

स भगवान् वासुदेवः सृष्ट्वैवं जगत् तस्य स्थितिं चिकीर्षुः मरीच्यादीनग्रे सृष्ट्वे"त्यारभ्य "स आदिकर्ता नारायणाख्यो विष्णुः" इत्याद्यष्टादशाध्यायीभाष्ये नारायणाख्य विष्णोरादिकारणत्वं, कारणवाक्यस्थ नारायणशब्दस्य विष्णुपरत्वं च प्रतिपादितम् ॥

एवं सहस्रनाम शांकरभाष्येऽपि विष्णोरादिकारणत्वं परब्रह्मत्वादिकं च प्रतिपाद्य विश्वशब्दव्याख्यावसरे ओंकारादि घटित सकल कारणवाक्या॥ ब्रह्मसूत्राणां च विष्णुपरत्वेन उदाहरण पूर्वकं कार्यवाचि विश्वविरिंचादि शब्दानां कारणीभूत विष्णुपरत्वं, शर्व शिवादि शब्दैश्च "स ब्रह्म स शिव" इत्याद्यभेदोपदेशात् विष्णोरेव स्तूयमानत्वं चोक्तम् ॥

एवं च मतत्रयेऽपि विष्णोरादिकारणत्वे न विप्रतिपत्तिः ।
कारणवाक्यस्थ नारायण शब्दस्य विष्णुपरत्वेऽपि ॥

परन्तु पूर्वोदाहृत मतद्वये विष्णोरेवादिकारणत्वं, ब्रह्मशिवादीनां तत्परिवारत्वं, परस्परं भगवतश्च भिन्नत्वं, तत्रैव सर्वसदागमानां तात्पर्यं चाभिप्रेतम् ।। तार्तीयीकमते तु-

विष्णोरादिकारणत्वादिकं सर्वमभिप्रेतमेव, किन्तु ''शंकर हिरण्यगर्भौ विष्णोर्भिन्नाविति न मन्तव्या'' विति तदुक्तेः शिवाद्यभेदोऽप्यर्थतया अभिप्रेतः । न तु शिवस्यैवादिकारणत्वं, नारायणशब्दस्य शिवपरत्वं, शिवजगत्कारणत्वस्य तत्सिद्ध्यधीनत्वं च । तत्र तद्वाक्यादर्शनादिति ।

एवं स्थिते मतत्रयसिद्धान्ते योगरूढिभ्यां विष्णुपरत्वेनैव उदाहृतभाष्यकार त्रयाभिप्रेतं कारणवाक्यस्थ नारायणशब्दं शिवपरं नेतुमुत्कण्ठितमनाः कश्चित् तदर्थप्रतिपादके सौवे ग्रन्थे नान्दीपद्यमकार्षीत्-

नवकोटि नान्दीपद्यम्

शर्वाण्याश्लिष्टवर्ष्माणं जगज्जन्मादिकारणम् ।
विष्णवाद्यर्चित पादाब्जं वन्देऽहं सर्वदा शिवम् ।। इति ।।

अद्वैतिनां शिवोत्कर्षवादानौचित्यम्

एतत्पद्योक्तोत्तरविशेषणद्वयस्य मतत्रयभाष्योदाहृत प्रमाणविरुद्धत्वात् उपेक्षणीयत्वं स्पष्टमेव । तथापि अद्वैतिमते शिवाख्य देवताविशेषस्यादिकारणत्ववादः स्वाचार्यवचन लोक वेद विरुद्ध इत्यालोच्य तत्प्रकारं लेशतः प्रसंगात् प्रदर्शयिष्यामः ।।

अत्रोक्तं जगत्कारणत्वं किं विवर्तोपादानत्वमुत निमित्तत्वम् आहोस्वित् अभिन्ननिमित्तविवर्तोपादानत्वम्? तत्र नाद्यः कल्पः शोभां बिभर्ति । जगदुपादानाविद्यायाः चिन्मात्राश्रितत्वेन तस्यैव तदुपपत्तेः । आश्रयत्वविषयत्वभागिनीति तदुक्तेः । केवल विवर्तोपादानतायाः शुक्तिसाधारण्येन कल्पक ज्ञातृचैतन्याधीनतया अधिष्ठाने माहात्म्याधायकत्वाच्च । विशिष्टस्याप्युपादेयत्वेन आदिकारणत्वासम्भवाच्च ।

न द्वितीयः । शुद्ध चैतन्याश्रित मूलाविद्याविवर्तजगत्प्रति तदन्तः प्रविष्टस्यापूर्वभाविनः कुलालवन्निमित्तमात्रत्वायोगात् । आविद्यके रजतादाविव ज्ञातृमात्र सापेक्षे ईश्वररूपनिमित्तकारणानपेक्षत्वाच्च । केवल निमित्तकारणत्वपक्षस्य ''पत्युरसामञ्जस्यात्'' इत्यधिकरणे तद्भाष्यकारैः निराकृतत्वेन अपसिद्धान्तापत्तेश्च ।।

अत एव न तृतीयः । विवर्तोपादानस्य कार्य गूहिततया कुलालवत् कल्पकातिरिक्त बहिष्ठनिमित्त तादात्म्यानुपपत्तेः अद्वैतिमते शुद्धाद्वितीय चैतन्यस्यैव कारणत्वेन कारणवाक्य बोध्यत्वे शिवाख्यविशिष्टकारणत्वस्य मानाप्राप्तत्वाच्च । उभयकारणतापरत्वस्य अप्रामाणिकत्वात् कारणवाक्यस्थैकशब्दैवकारैकवचनाद्वितीयपदानुपपत्तेश्च । विना साधकं सति च बाधके युगपत् वृत्तिद्वयेनार्थद्वयबोधायोगाच्च । सदेवेत्यादि कारणवाक्योक्तादिकारणत्वस्य कथंचित् चिद्विशिष्टोभयवृत्तित्वे उभयोरप्यनादित्वप्राप्त्या यतोवेत्यादि वाक्येन सृष्टिकारणस्यैव लयकारणत्वोक्त्या आदिकारणत्वेन सर्वलयाधिकरणत्वेन च प्रसक्तयोरनादिनित्यत्वापत्त्या सदद्वैतहानेश्च ।

न च अनादेरपि ''जीव ईशो विशुद्धा चिदि'' त्युक्त षट्-पदार्थान्तर्गतेशापरपर्याय शिवशब्दवाच्यस्य मिथ्यात्वेन न सद-द्वैतहानिरिति वाच्यम् । समानानुपूर्वीक कारणवाक्यबोध्ययो-श्चिद्विशिष्टयोरन्यतर मिथ्यात्वे साधकाभावात् । सति च साधके जीवाविद्यादिवत् मिथ्यात्वाविशेषेण शिवाख्य विशिष्टाकारस्य आदिकारणत्वमयुक्तमेवेति ।

न च मायाविद्यावैलक्षण्यात् जीवे अविद्यमानमेवादिकारणत्वमीशे युक्तमेवेति वाच्यम् । अधिष्ठानत्वेनेशवत्, कल्पकत्वेन जीवस्यादि-कारणत्वापरिहारात् । कल्पकसापेक्षत्वात् विवर्तोपादानत्वस्य ।

किंच शांकर गीता सहस्रनामभाष्ययोः सकलकारण पर श्रुतिस्मृतीतिहासपुराणसूत्रैः विष्णोः कारणत्वप्रतिपादनेन, शिवादि-शब्दानां विष्णुपरत्वप्रतिपादनेन, ईश्वरद्वयांगीकारे व्यवहारानुपपत्ति-प्रदर्शनेन च, स्मृत्यधिकरणे विष्ण्वात्मककृष्णपर विष्णुपुराण गीता वाक्योदाहरणपूर्वकं सगुणस्य जगत्कारणत्वप्रतिपादनेन च, विष्णोः सगुणब्रह्मतया जगत्कारणत्वस्य तद्भाष्यकारैः व्यवस्थापनात् शिवजगत्कारणताङ्गीकारे अपसिद्धान्तापत्तेश्च ।।

नच अद्वैतिमते शिवविष्ण्वोरैक्याभिप्रायेण तदुक्तिरुपपन्नेति वाच्यम् । तर्हि शिवस्यैव कारणत्वसाधनस्य, तत्र अद्वैतभाष्यकृतां तात्पर्यकल्पनस्य च अयुक्तत्वात् । विशिष्टवेषेणैक्यस्य विरुद्धत्वेना-नङ्गीकारात्, अंगीकारे च महावाक्ये लक्षणाऽयुक्तेः, चिन्मात्र-लक्षणायाश्च जीवसाधारण्येन शिवस्यैव कारणत्वाप्रयोजकत्वात् ।

तस्मात् अद्वैतमते शुद्धचिद्भिन्नस्य, अत एव मिथ्याभूतस्य अविद्याकार्यस्य तत्वज्ञानविनाश्यस्य शिवाख्यविशिष्टस्य, आदि-कारणत्वेन सर्वोत्तमत्वेन च स्वभाष्यकारोदाहृत प्रमाणसिद्ध विष्ण्वन्यस्य आदिकारणत्वविष्ण्वाद्यर्चितपादाब्जत्वे न युक्ते स्तः इति सद्भिः सन्तोष्टव्यम् ।।

अत्र शांकर गीता सहस्रनाम भाष्योदाहरणपूर्वकं विम-र्शोऽस्मत्कृत **गुरुभेदिन्यां** स्फुटमनुसन्धेयः ।।

नारायणशब्दस्य शिवपरत्वोपपादनानौचित्यम्

''तत्र शिवस्य जगत्कारणत्वसिद्धेः कारणवाक्यघटक नारायणशब्दस्य शिवपरत्वसिद्ध्यधीनत्वात् नारायण शब्दस्य शिवपरत्वमेव प्रथममुपपादनीयम् । उपपादनं च स्वपक्षसाधन परपक्षनिराकरणाभ्यां भवतीति तदुभयं वाद जल्प वितण्डानामन्यतमां कथामाश्रित्य संपादनीयम्।।''

यदुक्तं ''तत्र शिवस्य जगत्कारणत्वसिद्धे''रित्यारभ्यो ''पपादनीयमि''त्यन्तेन, तदविमर्श सुन्दरम् ।

तथाहि– यत् शिवकारणत्वस्य कारणवाक्यस्थ नारायणशब्दस्य शिवपरत्वसिद्ध्यधीनत्ववर्णनं, तदर्थे नारायणशब्दस्य शिवपरत्वे एव प्रथममुपपादनीयत्व प्रतिपादनं च, तत्, शिवजगत्कारणत्वे सम्यक् साधकसत्वे तस्य नारायणशब्दस्य शिवपरत्वाभावमात्रप्रतिबद्धत्वे च परं स्यत् । न चैतदस्ति । पूर्वोक्त प्रकारेण मतत्रय भाष्यकारत्रयोदाहृत

प्रमाणैरादिकारणत्वस्य विष्णुनिष्ठत्वावधारणात्। उभयकारणत्वस्य व्यवहारानुपपत्तिप्रसंगेन शांकरभाष्ये दूषितत्वात्। शिवस्यैव कारणत्वे साधकवानुक्तेश्च।

यच्च ''वाद जल्प वितण्डानामन्यतमामि''ति तदयुक्तम्। वितण्डायाः स्वपक्षसाधनहीनत्वात्। यच्चो''पपादनीयमि''ति तदपि पूर्वमुपपाद्यायुक्तेरयुक्तम्। एवमन्यदपि ऊहनीयम्। तत्र यदुक्तम् ''उपपादनं चेत्यारभ्य संपादनीयमि''त्यन्तेन, तच्च स्वपक्षसाधक परपक्षनिरासक मान सत्तादशायां खलु स्यात्। तच्च नास्तीत्ययुक्तमेवेति ॥

विप्रतिपत्ति प्रदर्शनानौचित्यम्

''तत्र विप्रतिपत्तिजन्यसंशयस्य विचारांगत्वात् मध्यस्थेनादौ विप्रतिपत्तिः प्रदर्शनीया। तत्र विप्रतिपत्तिः नारायणशब्दः शिवपरो न वेति। विधिः सामानाधिकरण्येन। निषेधस्त्ववच्छेदकावच्छेदेन ॥''

यदुक्तं विप्रतिपत्तिजन्येत्यारभ्य प्रदर्शनीयेत्यन्तं, तत् स्वपर-पक्षयोः विप्रतिपत्तिप्रदर्शनस्य आवश्यकत्वं नास्तीति न्यायामृतादौ सम्यक् निराकृतमिति नास्माभिरत्र प्रयतितव्यम् ॥

यदपि विधिः सामानाधिकरण्येनेति, तदपि न। तस्य तु प्रकृतपक्षतावच्छेदकावच्छिन्ने यत्र क्व वा नारायणशब्दे शिवा-न्यपरत्वांगीकार एवोपपन्नत्वेन, सामानाधिकरण्येनेति वदता

शिवान्यपरत्वमपि प्रकृतस्याङ्गीकृतमिति, ''यत्परत्वं स क'' इति प्रश्ने ''विष्णु''रिति वक्तव्ये, स केन प्रमाणेन सिद्ध इति चेत् अतीन्द्रियेऽतर्क्ये तस्मिन्नागमानामेव प्रामाण्ये वक्तव्ये, प्रकृत-भाष्यकृत्त्रयोदाहृतागमानां स्वसिषाधयिषित शिवैककारणत्वविरोधि विष्णुकारणत्वपरतया तदवगत नारायणाख्य विष्णोस्तत एवादिकारणत्वमवगम्य तद्विरोधि शिवकारणत्व साधनाय प्रकृत विधिकोटि साधने धर्मिग्राहक विरोधात्, स्वाभ्युपगत प्रामाण्यकानां तद्विरुद्धगामानां च प्राधान्येन शिवप्रतिपादकानामनुवादकतया गुणीभूत विष्णुप्रतिपादकत्वेऽपि तत्स्वरूपग्रहार्थमन्ततः संप्रतिपन्नानामेव पूर्वोक्तागमानां धर्मिग्राहकत्वे पुनस्तद्विरोध तादवस्थ्याच्च विधिः सामानाधिकरण्येनेत्ययुक्तमिति।

यच्च निषेधकोटिस्त्ववच्छेदकावच्छेदेनेति, तच्चानुमान विचा-रावसरे निराकरिष्यते ॥

विधिकोटेः कस्याप्यनपेक्षितत्वम्

''तत्र विधिकोटिरद्वैतिनां शैवानां च। नच अद्वैतिनां कथं शिवकारणतावादित्वं, तन्मते शुद्धाद्वितीय ब्रह्मण एव जगत्कारणत्व प्रतिपादनादिति वाच्यम्।

तामष्टादशधा दृष्ट्वा शंकरः सूतसंहिताम्।
चक्रे शारीरकं भाष्यं सर्वश्रुतिमनोहरम् ॥

इत्यभियुक्तोक्त्या निखिलाद्वैतग्रन्थमूलभूत शारीरक-

मीमांसामूलत्वस्य सूतसंहितायां प्रसिद्धत्वात्, तत्र च शिवस्यैव जगत्कारणतायाः प्रतिपादनात्, तस्य च अद्वैतवादिभिरवश्यं स्वीकर्तव्यत्वात्। अद्वैतिसिद्धान्ते सगुणनिष्ठस्यैव जगत्कारणत्वस्य शुद्धब्रह्म तटस्थ लक्षणत्वांगीकरात् सगुणस्य च शिवरूपत्वात्। अस्य ब अर्थस्य विद्यारण्यैः सूतसंहिताव्याख्यावसरे बहुशः प्रपंचितत्वेन नास्माभिरत्र प्रतिपादनीयमस्तीति॥''

यच्च विधिकोटिरद्वैतिनामित्यारभ्य प्रतिपादनीयमस्तीत्यन्तेनाभाणि तदतीवासारम्। तथाहि– विधिकोटेः कथंचित् शैवसम्बन्धित्वेऽपि अद्वैतिनां शुद्धाद्वितीय ब्रह्मवादित्वेन शिवकारणत्व साधने अपसिद्धान्तात् न तत्सम्बन्धित्वम्। न च ''सर्वाद्वैतग्रन्थमूलभूत शारीरकमीमांसामूलभूत सूतसंहितायाः शिव जगत्कारणतापरत्वेन तन्मूलकत्वेन प्राप्त शारीरकमीमांसाया अपि तत्परत्वेन तन्मतावलम्बिनामपि शिवकारणतासाधनं युक्तमेव, तन्मूलकत्वं च तामष्टादशधा दृष्ट्वेत्यभियुक्तोक्ति सिद्धमिति'' वाच्यम्। शारीरकमीमांसायाः सूतसंहितामूलकत्वे अभियुक्तोक्तेरनुपयोगात्। नहि शारीरकमीमांसा सूतसंहितादर्शनोत्तरभाविनीति सूतसंहिता वा शारीरकमीमांसामूलिकेति निर्णयोऽभियुक्तवाक्यात् भवति। किन्तु शारीरकमीमांसाभाष्यस्यैव सूतसंहितादर्शनोत्तरभाविता प्रतीयते।

तस्मात् शारीरकमीमांसापदेन तद्भाष्यस्यैव विवक्षायां तस्य सूतसंहितामूलकत्वे शिवस्यैव जगत्कारणत्वपरत्वे च मानाभावः। नच सैवाभियुक्तोक्तिरत्र मानमिति वाच्यम्। तस्याः तद्दर्शनानन्तर्यपरायाः कण्ठतस्तदुपजीवनानवगमकत्वात्। न च तद्दर्शनानन्तर्यं ग्रन्थरचनस्य तन्मूलतां विनानुपपद्यमानं तद् गमयतीत्यर्थात्तन्मूलत्वपरत्वमभियुक्तवाक्यस्येति वाच्यम्। दूष्यत्वेनापि पूर्वदर्शनसम्भवेन अन्यथोपपत्तेः। न च भाष्ये तद्दूषणादृष्टेर्नान्यथोपपत्तिरिति वाच्यम्। तर्हि शिवस्यैव कारणत्वमित्यनुक्तेः तदुपजीवित्वस्याप्ययुक्तिः।

अस्तु वा तदुपजीव्यत्वम्। अद्वैतांश एवैतत्सम्भवात्। नहि विवक्षितग्रन्थरचनार्थं प्रवृत्तस्य भाष्यकारस्य ग्रन्थान्तरदर्शनं सर्वांशेऽप्यैककण्ठ्यव्यवस्थापकम्। तथात्वे वेदान्तग्रन्थरचनार्थं प्रवृत्तानां तदुपयोगित्वेन तर्कव्याकरणमीमांसा दर्शनं सर्वांशेऽपि तदैककण्ठ्य व्यवस्थापकं स्यादिति शास्त्रभेदानुपपत्तिः। तस्मान्नेदमभियुक्तवचनमद्वैतभाष्यकर्तरि शिवकारणत्व तात्पर्य व्यवस्थापकम्।

किंच भाष्यकारस्य विष्णूत्कर्ष तात्पर्य कल्पनमेव युक्तम्। तथाहि– अद्वैतभाष्यकारस्य श्री विष्णुसहस्रनाम भाष्य करणानन्तरमेव बह्वृषिच्छन्दःसम्मतिपूर्वक ब्रह्मसूत्रोक्तहेतुकरणक निर्णय विषयीभूत विष्णूत्कर्षार्थक भगवद्गीताभाष्यकरणे शारीरकभाष्यनिर्माणे च प्रवृत्तेः करणेतिकर्तव्यतयोरेक विषयत्वस्य न्याय्यत्वात् गीतासूत्रयोश्च करणेतिकर्तव्यताभावस्य ब्रह्मसूत्रपदैश्चैवेति प्रकृतोभयकर्तृ बादरायण वचनादेवावगतेः अतन्मूलकत्वे व्याख्येय सूत्राननुसारि भाष्यस्याभाष्यत्व प्रसंगात्।

किंच अद्वैतभाष्यकारस्य विष्णोः सगुणत्वासम्मतौ

''भज गोविन्दं भज गोविन्दम्''

''लक्ष्मीनृसिंह मम देहि करावलम्बमि'' ति

भजन करावलम्बप्रार्थने न स्याताम्। तत्र विष्णुकारणत्वपर भगवद्गीता सहस्रनाम तारकत्वयोरेव प्रतिपादनात्। शिवकारणत्व-नैर्भर्ये सूतसंहिता शिवगीता शिवसहस्रनाम भाष्यरचन शिवकारणत्वपर तत्तारकत्वप्रतिपादने एव प्रथमतः संगते स्याताम्।

किंच वैष्णवादि परभाष्यकाराणामिव देवताविशेष जगत्कारणत्व नैर्भर्येण अद्वैत भाष्यकारस्य प्रवृत्तौ तत्तद्देवतानतिस्तुति ग्रन्थरूप नान्दीपद्य रचनानन्तरं तत्तद्भाष्यकरणवत् शिवाख्यदेवता-विषय नान्दीपद्य रचनानन्तरमेव भाष्यकरणमुपपन्नं स्यात्। ''शरीरमेव शरीरकम्। तत्र भवः शारीरको जीवः। तमधिकृत्य कृतो ग्रन्थः शारीरकमि''ति व्याख्यानमपि अयुक्तं स्यात्। अतो ज्ञायते नैवैकस्यां देवतायां जगत्कारणत्वनैर्भर्येण प्रकृतभाष्यकाराणां प्रवृत्तिरिति। अत एव अद्वैतभाष्ये यत्रक्वचन तत्तद्देवतापर कारणवाक्योदाहरणं तदन्यतमानिषेधेन परस्पर तादात्म्येन अविरोधविवक्षयोपपन्नमित्युक्तं तद्व्याख्यातृभिः। अतएव ''शिवं वा विष्णुं वे''ति तदीयाभियुक्तोक्तिः संगच्छते ॥

किंच अद्वैतमते शिवपारम्य एव तात्पर्ये तत्तद्देवतापारम्य-वादिनामिव स्वाभिमत देवतोच्छिष्टग्रहणं तत्संस्कारस्तल्लिंगधारणं पंचायतनपूजाभावश्च स्यात्। केशवादि वैष्णव नामभिराचमन

न्यासादिकं च न स्यात्। किन्तु शैवानामिव शिवनामभिरेव न्यासादिकमुपपन्नं स्यात् ॥

किंच अस्मदादि मतेषु विष्ण्वादि सर्वोत्तमत्व जगत्कारण-त्वादिविषये प्रसिद्धश्रुत्याद्युदाहरण तदितरनिषेधेतरकारणत्वपरश्रुति-स्मृत्यादि प्रतीतार्थ प्रच्यावनाप्रामाण्यमोहकत्वादिप्रतिपादन तदर्थक स्मृत्याद्युदाहरणान्यदेवतासर्वनामत्वनिषेध सर्वनाम वाच्यताप्रति-पादकागमगत पद्मनाभत्वाद्यसाधारण लिंगावगमक स्मृत्याद्युदाहरणा-द्यनेक स्वपक्षसाधक परपक्षनिरासक सामग्रीविशेषैर्भाष्यकाराणामेव व्यवस्थापकतया प्रवृत्तत्वात्, तेषां च अनन्त शाखा द्रष्टृत्वेन विजय तूणीर गताक्षयाविच्छिन्न बाणपरम्परावन्मानपरंपरायाः स्वाभिमतार्थ साधिकाया जागरूकतया तन्मतावलम्बिनामस्माकमपि स्वपक्षसाधने परपक्षनिरासे च न काप्यनुपपत्तिः, नवा अपसिद्धान्त इति प्रकृत विष्णुसर्वोत्तमत्व साधनमितरनिराकरणं चोपपन्नम्। न तथा प्रकृतस्य परपक्षावलम्बिनः स्वभाष्यकारीयं स्वसिषाधयिषित शिवकारणतासाधकं विष्णुकारणत्वबाधकं च निरवकाशमस्ति। तदतिरिक्त तद्विरुद्ध मतत्रयभाष्यकारान्यतमानुदाहृत प्रमाणोपन्यासे तस्यानिर्णीत प्रामाण्यकत्वात् अनादर्तव्यतैवेति सन्तोष्टव्यम् ॥

यच्च अद्वैतमते सगुणनिष्ठस्यैव जगत्कारणत्वस्य शुद्धब्रह्म तटस्थ-लक्षणत्वांगीकारादिति, तदपि यतो वेत्यादि श्रुतिसूत्रा-क्षरेभ्योऽनवगतमित्युपेक्ष्यम् ॥

यच्च सगुणस्य च शिवरूपत्वादिति, तदपि ''स आदिकर्ता नारायणाख्यो विष्णुरि''ति गीताशांकरभाष्य विरुद्धम् ॥

किंच सिषाधयिषित शिवकारणत्वं किमादिकारणत्वमुत अवान्तरकारणत्वम्?आद्ये, विष्णुकारणत्वाद्यविरोधि, उत तद्विरोधि ? अविरोधपक्षे सोऽविरोधो विष्ण्वादि तादात्म्येन वा, भेदेऽप्यनेक कारणत्वेन वा ? विरोधपक्षेऽपि विष्णोः प्रकृतकारणत्वनिषेधेन वा, अनास्थया वा?

नाद्यः। विष्णुतादात्म्येन साध्यमान कारणत्वस्य नारायण-शब्दस्य शिवपरत्वसाधनं विनापि उपपत्तेः। विधिः सामानाधि-करण्येनेति स्वोक्त्ययुक्तेश्च। सूतसंहितायां हरिविष्ण्वादि विहीन-नामतः सर्वोत्तम शिवदर्शन ध्यानादेः साम्यदर्शनस्य च निषिद्धत्वेन तन्मतावलम्बिनां विहीन विष्णु तादात्म्यस्य तद्वाचक नारायणशब्द शिवपरत्वस्य च अभ्युपगमे अपसिद्धान्तापत्तेश्च। न द्वितीयः। आदिकारणद्वयानुपपत्तेः । तस्य व्यवहारानुपपत्तिप्रसंगेन शांकरभाष्ये दूषितत्वेन अपसिद्धान्तापत्तेश्च। द्वितीयेऽपि नाद्यः। श्रुत्यादि विरोधात् स आदिकर्ता नारायाणाख्यो विष्णुरिति शांकरगीताभाष्य विरोधात् अपसिद्धान्ताच्च। तत्रैव न द्वितीयः। ''न ब्रह्मा न च शंकरः'' इति श्रुतावधारणेनानास्थाया अनुपपन्नत्वात्। विवेकपूर्वकं गीतार्थस्य वक्तव्यत्वं प्रतिज्ञाय प्रकारान्तर व्याख्यानानां विरुद्धत्वावधारणपूर्वकं विष्णुकारणतापरत्वेन गीतायाः शांकरभाष्ये व्यवस्थापितत्वेन अपसिद्धान्ताच्च। न द्वितीयः। अवान्तरकारण-त्वस्य कारणवाक्यस्थ नारायणशब्दस्य शिवपरत्वं विनाप्युपपत्तेः। तस्य निषेधकोटिवादिनाभ्युपगतत्वेन सिद्धसाधनत्वाच्च। सूतसंहिता तट्टीकयोः आदिकारणत्वस्यैव प्रतिपादनेन अपसिद्धान्ताच्च।

अपि च शिवस्यैव सगुणब्रह्मत्वं, तन्निष्ठमेव जगत्कारणत्वं निर्गुणतटस्थलक्षणमिति वदता विष्ण्वाख्य नारायणस्य ईशत्वा-नंगीकारेण जीवत्वे वाच्ये, सर्वजीवसाधारणं तस्य व्यष्टित्वं प्रमाण विरोधापसिद्धान्ताभ्यां वक्तुमयुक्तमिति, समष्टित्वस्य विराडाख्य हिरण्यगर्भनिष्ठत्वेन प्रमितत्वापसिद्धान्ताभ्यां विष्णुनिष्टत्वासम्भवे तदुभयव्यापक जीवत्वानुपपत्तौ, ईशत्वजीवत्व रहित चैतन्यस्य निर्गुणत्वेन शिवस्य तदर्चित पादाब्जत्वाद्युक्तिरयुक्तैवेति ।। व्यष्टित्वसमष्टित्वानुपपत्त्या जीवत्वानुपपत्तिं च विष्णोस्तदीयैरेव व्यवस्थापितामुत्तरप्रबन्धे दर्शयिष्यामः ।।

यच्च ''सगुण निष्ठस्यैव जगत्कारणत्वस्य शुद्धब्रह्मतटस्थ-लक्षणत्वांगीकारात् सगुणस्य च शिवरूपत्वात्'' इति तद् बालजनमनोहरम्। तथाहि– सगुणनिष्ठस्यैवेत्यवधारणेन निर्गुण-निष्ठत्वं व्यावर्तत उत न? आद्ये न निर्गुण तटस्थलक्षणत्वम्। सर्वथा निर्गुणव्यावृत्तस्य तत्तटस्थत्वासम्भवात्। तटस्थं हि काकादि यदाकदाचित् गृहरूपलक्ष्यवृत्त्येव तटस्थलक्षणं दृष्टम्। तटस्थत्वो-क्तिस्तु व्यवहारकाले असतोऽपि व्यवहार प्रयोजकत्वनिबन्धना। तच्च काकादि यदा लक्ष्यवृत्ति तदा अन्यस्मिन्नास्त्येव, यदा अन्यवृत्ति तदा न लक्ष्यवृत्तीति तटस्थलक्षणमुपपन्नम्। प्रकृते सगुणनिष्ठस्यैव जगत्कारणत्वस्य निर्गुण तटस्थलक्षणत्वं यदाकदाचित् निर्गुणनिष्ठत्वं विनानुपपद्यमानमवधारणेन व्यावर्तित निर्गुणनिष्ठत्वकं चेत् कथमुपपन्नं स्यादिति सूक्ष्मदर्शिभिर्विभावनीयम्।

इदमपि तुष्यत्विति न्यायेनोक्तम् । वस्तुतस्तु काकादेः मूर्त-द्रव्यस्य कालभेदेनान्यनिष्ठत्व सम्भवेऽप्यद्रव्यस्य धर्मिपरतन्त्रस्य कारणत्वस्यैकनिष्ठस्य अन्यतटस्थत्वमनुपपन्नमेवेति ।।

यदि च नैकमेव कारणत्वं, किन्तु सगुण निर्गुण सम्बन्धिभेदेन द्विविधम्, तत्र सगुणसम्बन्धि यावद्द्रव्यभावीति तन्निष्ठमित्युच्यते, निर्गुणसम्बन्धि तु कादाचित्कत्वेन तटस्थमित्युच्यत इत्यभिप्रायस्तर्हि सगुणनिष्ठस्यैव निर्गुणतटस्थ लक्षणत्वोक्तिः अयुक्ता स्यात् ।

एकस्यैव कारणत्वस्योभयसम्बन्धित्वप्रतीतेः अयावद्द्रव्य-भावितामात्रेण तन्निष्ठत्वानंगीकारे संयोग विभाग पाकजरूपादीनां स्वाश्रयद्रव्यनिष्ठत्वेन निखिल तन्त्रसिद्धानामपि तन्निष्ठत्वाभाव प्रसंगः।

यदि च सगुणनिष्ठस्यैव इत्यादेः ‘‘कारणत्वं सगुणनिष्ठमेव, तदेव निर्गुणनिष्ठतया भासते, अत एव तत्तटस्थत्वमप्युपपन्नम्, आरोपितत्वेन तन्निष्ठत्वाभावोऽप्युपपन्न’’ इत्यभिप्रायः तर्हि सगुणनिष्ठत्वं नारोपितं निर्गुणनिष्ठत्वमेवारोपितम् इत्येतत् विना विनिगमकं परीक्षकेण कथमंगीकर्तव्यं स्यात्? सदेवेति कारणवाक्येन सकृदेव जायमानायां प्रतीतौ विषयभूतस्य कारणत्वस्य धर्मिभेदेन आरोपितत्वानारोपितत्वाभ्यां भ्रमत्वाभ्रमत्वयोः प्रसक्त्या उपनिषदां व्यावहारिक सगुणकारणत्वपरत्वेन तत्वावेदकत्वनियमभंगवत् निर्गुणेऽविद्यमान कारणत्वस्यारोपरूपोक्तप्रतीतिजनकत्वेन अतत्वा-वेदकप्रमाणत्वस्यापि भंगेन सर्वथा वेदाप्रामाण्यवादि सौगतमतप्रवेशा-पत्तिश्च ।

द्वितीये जीवजडयोः परिच्छिन्नशक्त्यादिमत्वजडत्वाभ्यां जगत्कारणत्वेन अप्रसक्तयोः कारणत्वव्यावृत्तेरवधारणार्थत्वासम्भवे अयोगव्यवच्छेदस्य चोक्तदोषानुवृत्त्यावधारणार्थत्वानुपपत्तावन्वधारण-सहित प्रकृतवाक्यासामंजस्यमेवेति सद्भिः सम्यक् विभावनीयम् । न ह्येतदन्यत् तटस्थलक्षणं नामास्तीति ।

या च विद्यारण्यसम्मतिरुक्ता सापि अस्मद्भाष्य टीका टिप्पणी कर्तृणां विष्णुकारणत्व व्यवस्थापक तदितर कारणत्व निषेधकोक्तेरिव शिवकारणत्व साधक तदितर कारणत्व निषेधक विद्यारण्यवाक्यादर्शनात् अयुक्तेति ।

ननु विद्यारण्येन सूतसंहिताव्याख्यानावसरे विष्णूत्कर्ष कारणत्व निषेधपूर्वकं शिवपारम्यादिकारणत्वाद्यपरिमित माहात्म्य प्रतिपादकम्,

विष्ण्वादीनां तु देवानां ध्यानं चाधममिष्यते ।
अतो मोक्षार्थिभिः प्राज्ञैः शिव एकः शिवंकरः ।
ध्येयः सर्वं परित्यज्य शिवादन्यं तु दैवतम् ।
अस्मिन्नर्थे श्रुतिः साध्वी समाप्ता वेदवित्तमाः ।
अपक्वचित्तैर्मोक्षार्थं देवा विष्ण्वादयोऽपि च ।
ध्येयाः पक्वैः शिवो ध्येयः साक्षात् संसार मोचकः ।
रुद्रं विश्वाधिकं विष्णुं ब्रह्माणं चान्यमेव वा ।
समं संचिन्तयन् साक्षात् संसारे परिवर्तते ।।
महापापवतां पुंसां पूर्वजन्मसु सुव्रताः ।

विष्णुः सर्वाधिको भाति न साक्षात् परमेश्वरः ।
विष्णुः सर्वाधिको भाति नारकी स न संशयः ।
विष्णुः सर्वाधिको नान्य इति चिन्तयतां नृणाम् ।
नास्ति संसार विच्छित्तिः कल्पकोटिशतैरपि ।
ब्रह्मादिदेवतानां च विश्वाधिक्यं वदन्ति ये ।
अधोमुखोर्ध्वपादास्ते यास्यन्ति नरकार्णवम् ।
विष्णोर्वा ब्रह्मणो वापि तथैवान्यस्य कस्यचित् ।
साम्यं वदन्ति ये तेषां न संसाराद् विमोक्षणम् ।
विष्णुप्रजापतीन्द्रादि देवतासु मुनीश्वराः ।
विहीनासु शिवं पश्यन् मुच्यते भवबन्धनात् ।
शिव रुद्र महादेव ब्रह्मेशानादिनामतः ।
विष्ण्वादिदेवताः पश्यन् क्रमान्मुच्येत बन्धनात् ।
शिवं सर्वोत्तमं विप्रा हरिविष्ण्वादिनामतः ।
चिन्तयन् घोरसंसारे पतत्येव न संशयः ।
यथामात्यादिबुद्धिस्तु राज्ञि बन्धाय देहिनाम् ।
अतः शिवः सदा ध्येयः प्राधान्येन मनीषिभिः ।

इत्यादि सूतसंहितावाक्यजातं शिवकारणत्वविषये पूर्वपक्षं प्रापय्य तन्निरासपूर्वकं व्याख्याय शिवपारम्यं व्यवस्थापितम् ।

तथाहि ''रुद्रमिति । विश्वाधिको रुद्रो महर्षिरिति श्रुतिः । अनया

श्रुत्या रुद्रस्य सर्वेभ्योऽप्याधिक्यस्योद्घोष्यमाणस्यापि कैश्चित् अज्ञाने कारणमाह महापापेति । सर्वाधिको न भातीत्यन्वयः । उत्कृष्टेऽपकृष्टबुद्धिरनर्थाय, अपकृष्टे पुनरुत्कृष्टबुद्धिः श्रेयसे । ब्रह्मदृष्टिरुत्कर्षात्। इत्यतो विष्ण्वादिषु शिव बुद्धिर्युक्तेत्याह ''विष्णुप्रजापतीती'' त्यारभ्य सर्वेष्वपि सूतसंहिताभागेषु विष्ण्वाद्यनुत्कर्ष शिवोत्कर्षयोः, तथा विष्ण्वाद्युत्कर्षज्ञानध्यानादिनानर्थप्राप्तेः शिवोत्कर्ष ध्यानादिनाऽशेषपुरुषार्थप्राप्तेः, विष्ण्वादीनामनुत्कृष्टत्वेन उत्कृष्ट शिवनामभिर्विष्ण्वादि ध्यानस्य पुरुषार्थसाधनत्वं विष्ण्वाद्यपकृष्ट नामभिरुत्कृष्ट शिव ध्यानादेरनर्थ साधनत्वं च सपरिकरं व्यवस्थापितमिति कथं शिवोत्कर्ष विषये विद्यारण्योक्त्यदर्शनमिति चेत् न, तात्पर्यानवगमात् ।

नहि यस्मिन् यस्मिन् व्याख्येय वाक्ये यो योऽर्थ आपततः प्रतीयते तत्तन्मात्र प्रतिपादनेन व्याख्याता कृती स्यात् । किन्तु स्वव्याख्यातेऽर्थे युक्त्यागमस्वाचार्यस्वयूथ्यवचन विरोधे तमपरिहृत्योक्तार्थस्य अनुक्तप्रायतया तत्संमत्युपपादनस्य अयुक्तत्वादिति अभिप्रायात्। अत्रोक्तानां सर्वेषामपि प्रमेयाणां पूर्वोदाहृत श्रुतिस्मृतीतिहाससूत्रविरुद्धत्वस्य स्पष्टप्रतिभासात् । तद्भाष्यकारैर्गीतासहस्रनाम भाष्ययोः तत्स्वयूथ्यैर्गीता भारत भागवत व्याख्यानेषु च निपुणतरं पूर्वोक्तविरुद्धस्यैव प्रतिपादनादिति । विरोधश्च तद्वाक्यानां **गुरु नवकोटिभेदिन्यां प्रदर्शितस्तत्रैव** ज्ञातव्यः । प्रकृतेऽपि तं लेशतो दर्शयिष्यामः ।

पूर्वोदाहृत श्रुति स्मृतीतिहास पुराणेषु शांकर गीतासहस्रनाम

भाष्याद्यद्वैतग्रन्थेषु च विष्णोः सर्वोत्तमत्वम् आदिकारणत्वम् अजीवत्वम् अकर्मफलवत्वम् अवाप्तसर्वकामत्वम् अप्राकृताभौतिकदेहवत्वम् अनादि नित्यविग्रहवत्वम् अजशिवादि परिवार सेवितत्वम् अनवमत्वम् अनन्तफलसाधनोपासनत्वम् अघहरनामवत्वं चेत्येतत्सर्व प्रतिपादितम् । अद्वैतभाष्यादौ च शिवाद्यैक्यमपि । तत्र प्रमाणानि चोपन्यस्तानि । यत्तु तद्विषये काप्यौपचारिकी प्रवृत्तिराश्रिता । सूतसंहितातद्व्याख्यानयोस्त्वेतद्विरुद्धमेव सम्यक् प्रतिपादितम् । व्याख्यात्रा विद्यारण्येन स्वाचार्योक्तिविरोधो वा उदाहृत प्रमाणविरोधो वा नोद्भावितो, नैव परिहृतश्च । एवमव्यवस्थापक विद्यारण्यवाक्यानुरोधेन स्वपूर्वाचार्योक्तीनां सदागमानां च व्यवस्थितार्थविरुद्ध शिवैक कारणता परत्व वर्णनमयुक्तमेवेति ।।

किंच विद्यारण्येन स्वयमेव शैवाद्वैतप्रतिपादकत्वं सूतसंहितायां प्रदर्श्य विष्ण्वनुत्कर्ष शिवोत्कर्षौ प्रतिपादिताविति शैवमतेन प्रवृत्त तद्वचनानुरोधेन शुद्धाद्वितीय ब्रह्मकारणतावादि भाष्यकृत्तदनुयायिनां शिवकारणत्व तात्पर्य कल्पनमयुक्तमेवेति ।

किंच जगतः शिवैक कारणत्व सिद्धये कारणवाक्यस्थ नारायणशब्दस्य शिवपरत्वसाधनोद्योगवतः प्रकृतवादिनो मध्ये प्रसक्तापसिद्धान्त परिहारार्थं सूतसंहितातट्टीकासम्मतिप्रदर्शनं दण्डापूपन्यायेन स्वाभिमतविरोधि निषेधकोटिवाद्यभिमत हरिविष्णुनारायणादिशब्दाबोध्यत्वमेव शिवस्य व्यवस्थापयति, व्यवस्थापयति च शिवरुद्रमहादेवादि शब्दबोध्यतां विष्णोरिति

कारणवाक्यस्थ रुद्रनारायणादि शब्दानां विष्णौ प्रवृत्त्युपपत्तौ विष्णुनारायणादिशब्दानां शिवे प्रवृत्त्यनुपपत्तौ चोद्घोष्यमाणायां तद्घटित कारणवाक्यानां विष्ण्वेकपरत्वप्राप्त्या विष्णोरेव कारणत्वमिति महान् प्रहर्षोऽस्माकम् । परन्तु सूतसंहितातट्टीकयोः प्रतिपादिते विष्णुनिन्दाशिवप्रशंसे एव क्षन्तव्ये भवता फलमुखत्वादिति ।

"तल्लीनमाक्षेपमुपैक्षताफलं वारीव सन्तो हि गुणांश तोषिणः ।" इति न्यायात् ।।

निषेधकोटेःसर्वापेक्षितत्वम्

"निषेधकोटिस्तु तेभ्योऽन्येषां वैष्णवादीनां सर्वेषाम् ।"

यदुक्तं निषेधकोटिस्त्वित्यादि तदयुक्तम् । तथाहि– निषेधकोटेरद्वैति शैवान्य सर्वसम्बन्धित्वमुक्तम् । तत्राद्वैतवादिनां विधिकोटिसम्बन्धाभावस्तु निपुणतरं पूर्वमेवोपपादितः । शैवानां चावैदिकस्मृत्यनुरोधेन शिवकारणत्वमभिलषतां कारणवाक्यस्थ नारायणशब्दस्य शिवपरत्वमनपेक्षितमेव । ये वैदिकंमन्याः शैवास्तैरपि सूतसंहितातद्व्याख्यानयोः सर्वोत्तमे शिवे विहीनवाचि हरिविष्ण्वादिनामभिर्ज्ञानध्यानयो र्निषिद्धत्वोक्त्या विधिकोटिग्रहणासम्भवेऽयमेव वादोऽवशिष्ट इति, मतोऽयमेव सर्वेषामिति वक्तव्ये अद्वैति शैवान्यत्वविशेषणमनुपपन्नमेवेति ।।

प्रथम कोटिभङ्गः

"अत्र विधिकोटिवादिनां प्रयोगः–

नारायणशब्दः शिवपरः। शिवत्तिधर्मावच्छिन्न-प्रतिपादकत्वात्। यः शिवत्तिधर्मावच्छिन्नप्रतिपादकः स शिवपरः। यथा शिवशब्द इति। नावयवेष्वाग्रहः। पक्षे शिववृत्तिधर्मावच्छिन्नप्रतिपादकत्वसत्वात् हेतुसत्वो-पपत्तिः।"

यच्चोक्तं नारायणशब्दः शिवपर इति तत्र यद्यप्येषा शंकाऽ-वशिष्यते– शिवकारणतासिद्धये कारणवाक्यस्थ नारायणशब्दस्य शिवपरत्वमभिसन्धित्सता वेदान्तिना "कामाच्च नानुमानापेक्षा" "तर्काप्रतिष्टानात्" इत्यादि सूत्रैः "नैषा तर्केण मतिरापनेया" इति श्रुत्या "यथाकामानुमा यस्मात् तस्मात् साऽनपगा श्रुतेः" इत्यादि स्मृतिभिश्च शुष्कतर्कस्य वैदिकेऽर्थे प्रयोक्तुमयोग्यतया

"पृष्टेनागम एवादौ वक्तव्यः साध्यसिद्धये"

इत्युक्तिबलाच्चागमस्यैव वक्तव्यतया कथं शुष्कस्यैवानुमानस्य प्रथम प्रयोग इति। अयमपि न्यायः सामान्यतो वैदिकेऽर्थे। प्रकृतस्तु नारायणशब्दः परमवैदिकरूपः शिवादिनिषेधपूर्वकं जगत्कारणपरे कारणवाक्ये घटकतया प्रसक्तः। सकल श्रुतिस्मृतीतिहास पुराणेषु शिवान्यविष्णुपरतया निर्णीतः। प्रह्लाद नारदाजामिल गजेन्द्र भीष्म द्रौपदी प्रभृतिभ्यः स्वोच्चारणमात्रेण स्वस्वामिदत्त महापुरुषार्थः। तथैव स्वपर भाष्यकारैः निर्णीत विष्णुमात्रपरत्वकः। केवलं स्वोत्प्रेक्षित

शुष्कानुमानेन शिवपरतया कथं व्यवस्थापयितुं शक्य इति पण्डितस्यास्य वादिनः कथं बुद्धिर्न जातेति। सूच्यग्रेण मेरूद्धरण प्रयासवदयं प्रयासो वृथैवेति च।

तथापि विनोदार्थं तदनुमानं निराचरीकृमः। तथाहि।

किं तच्छिवपरत्वम्? शिवप्रतीतीच्छयोच्चरितत्वं चेल्लक्षणया संकेतेन वास्य सिद्धत्वात् सिद्धसाधनता। अस्माभिरपि कूर्मपुराण शिवसहस्रनामादौ विष्णुपौत्रत्वादि शक्यसम्बन्धेन प्रकृतस्य शिवे लक्षणाङ्गीकारात्। संकेतस्य च लौकिकाजामिलपुत्रादावपि प्रकृतशब्दस्य दर्शनेन, शिवपित्रा ब्रह्मणा स्वपित्रसाधारण नाम्नः स्वपुत्रे शिवे संकेतकरणस्यौचित्यात्। अन्यथा "ऋते नारायणादीनी" त्यादि प्रमाणविरोधापत्तेः। तस्मान्निषेधो मुख्यया वृत्त्या, पौराणिक प्रयोगाश्च संकेतलक्षणाभ्यामित्यंगीकारे चोभयवाक्यशाबल्योपपत्तेः तन्मात्रस्य कारणवाक्यस्थ नारायणशब्दस्य शिवपरत्वसिद्ध्यनंगतया शिवकारणत्वरूप विवक्षितार्थासिद्ध्याऽर्थान्तरता च।

अपि चेच्छाघटित मूर्तिक शिवतात्पर्यरूप शिवपरत्वस्य वाक्यविशेषघटक सम्बन्धित्वेन तस्योपक्रमादि षड्विधलिंग-ज्ञाप्यत्वान्न प्रकृतहेतुज्ञाप्यत्वमिति तच्छक्तत्वरूपे तस्मिन् वाच्ये तस्य प्रकृत हेतुना कथंचित् सिद्धावपि विवक्षित शिवकारणत्वसिद्धिं प्रत्यनंगतया तत्तात्पर्यस्यैव साधनीयता। तस्योपक्रमादि-लिंगज्ञाप्यत्वेन तत्प्रदर्शनेन तात्पर्यव्यवस्थया शिवकारणत्वे साध्ये प्रकृत साध्यसिद्धेरुद्देश्य प्रतीत्यनङ्गतयार्थान्तरतेति।

विनापि शक्तिं तात्पर्यानुरोधेन लक्षणया तत्वमस्यादि महावाक्य पर्यवसानस्य परैरभ्युपगतत्वात् विना तात्पर्यं शक्तिमात्रस्य व्यवस्थापकत्वानंगीकाराच्च शक्तिसाधनस्य प्रकृतोद्देश्यसिद्ध्यप्रयोजकत्वमेवेति ।

'ऋते नारायणादीनी'त्यादि प्रमाणबाधश्च । प्रमाणाविरुद्धत्वमुपाधिश्च । तद्विरुद्धत्वेन सत्प्रतिपक्षता च ।

किंच विष्णुसहस्रनामभाष्ये विश्वादिशब्दानां कार्यवाचित्वमंगीकृत्य कार्यवाचकपदेन कारणग्रहणमित्युक्तमद्वैतभाष्यकारैः । कार्यविरिंचादिपदैः कारणमेवोच्यत इति च । एवं "सर्वः शर्वः शिवः स्थाणुरि"ति वाक्यव्याख्यावसरे शर्वादिशब्दानां शिवादिविषयकनिर्वचनमेव सप्रमाणं प्रदर्श्य शिवादि शब्दैः "स ब्रह्म स शिव" इत्यभेदव्यपदेशात् विष्णुरेव स्तूयत इत्युक्तम् । नतु शिवादि पदानां विष्णुपरत्वेन निर्वचनमपि कृतम् । अत एव "सोमपोऽमृतपः सोम" इत्यत्रोमया सह वर्तत इतीश्वरः सोमः "सोमः पवते जनिता मतीनाम्" इति श्रुतेरिति तद्भाष्यकारैः व्याख्यातम् । एवं तन्मतावलम्बिनां शिवकारणत्वे साध्ये कारणवाक्यस्थ नारायणशब्दस्य शिवे योगरूढी विनैव कार्यवाचकत्व विवक्षया कारणशिवपरत्वोपपत्तौ तस्य मुख्यवृत्त्या शिवपरत्वसाधनमनुपपन्नमेवेति ।

किंच समन्वयस्य लक्षणया प्रवृत्तिमङ्गीकृत्य निर्गुणपरत्वं वदतां मते कारणवाक्यस्थ नारायणशब्दानां सगुणशिवपरत्वविषयेऽपि तामेव वृत्तिमाश्रित्य समन्वयेन प्रकृतार्थसिद्धौ मुख्यवृत्त्याश्रयणमनुपपन्नमेव ।

न च निर्गुणे मुख्यवृत्त्यनुपपत्त्या लक्षणाश्रयणेऽपि सगुणेऽनुपपत्त्यभावात् तदाश्रयणं युक्तमेवेति वाच्यम् । कारणवाक्येऽन्यपरत्वेन प्रसिद्धानां सर्वेषामपि स्वाभिमत सगुणब्रह्मणि मुख्यवृत्तिराश्रियत उत नारायणशब्दस्यैव? नाद्यः । तत्र श्रुतानां ह्रीलक्ष्मीपतित्वादीनामपि मुख्यतयैव शिवनिष्ठत्वं वक्तव्यं स्यात् । अन्यथा "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपमिति" कारणलक्षणाक्रान्तस्य नामरूपकर्तुः शिवत्वं न स्यात् । अतो न सर्वस्यापि अन्यपरत्वेन लोकवेदसिद्धस्य सगुणे मुख्यवृत्त्या प्रवृत्तिः । किंतु उपचारेणैवेति । अत एव न द्वितीयः । नारायणशब्दस्यापि अन्यपरत्वेनैव लोकवेदसिद्धत्वात् न मुख्यवृत्त्या शिवपरत्वसाधनं प्रकृत शिवकारणत्व साधनोपयोगीत्यर्थान्तरतैवेति । न च लक्षणयैवात्र शिव परत्वं साध्यमिति वक्तुं युक्तम् । तद्वृत्तिधर्मावच्छिन्न प्रतिपादकत्वरूप हेत्वसंगतेः । न चान्यच्छिवपरत्वमस्तीत्ययुक्तैव प्रतिज्ञेत्यास्तां विस्तरः ।

किं चेदं शिववृत्तिधर्मावच्छिन्नप्रतिपादकत्वं नाम? शिववृत्तित्वेन भासमानधर्मावच्छिन्न प्रतिपादकत्वं वा? स्वरूपसच्छिववृत्तित्वविशिष्टधर्मावच्छिन्नप्रतिपादकत्वं वा? आद्ये नारायणशब्दजन्यबोधे शिववृत्तित्वस्याभानात् स्वरूपासिद्धिः । द्वितीये शिववृत्तिरेव यो धर्मस्तदवच्छिन्न प्रतिपादकत्वं वा, शिववृत्तिरपि यो धर्मस्तदवच्छिन्नप्रतिपादकत्वं वा? आद्येऽसिद्धिः । नारायणशब्दबोध्य जलशायित्वस्य शिववृत्तित्वमेवेत्यत्र मानाभावात् । द्वितीये

इच्छाघटित मूर्तिक शिवपरत्वरूपसाध्यं प्रत्यप्रयोजकत्वम्। शिवान्यवृत्तित्वस्याप्यंगीकारेण तादृशधर्मावच्छिन्न प्रतिपादकत्वस्य प्रकृतसाध्यं विनाप्युपपत्तेः।

शिवशक्तत्वरूप साध्यं प्रति प्रयोजकत्वेऽपि तस्योक्तरीत्या शिवकारणत्वाप्रयोजकत्वेन अनुपयुक्तार्थसिध्याऽर्थान्तरतापातेनेच्छा-घटित साध्यस्यैव वक्तव्यत्वे हेतोरप्रयोजकत्वमेवेति। इदं च कथंचिद्धेतोरभ्युपगमेऽपि न विवक्षितार्थसिद्धिरिति भक्षितेऽपि लशुन इति न्यायावकाश इति दूषणेऽपि रीत्यन्तरप्रदर्शनार्थमेवोक्तम्। न तु यः कोऽपि शिववृत्ति धर्मो नारायणशब्दबोध्य इत्यभिप्रेत्य। उत्तरत्र सर्वथाप्यसिद्धेरेव वक्ष्यमाणत्वात्।

किंचेदं शिववृत्तिधर्मावच्छिन्न प्रतिपादकत्वं व्युत्पन्नस्याव-यवार्थ विमर्शे सति यो योऽर्थः प्रतीयते स सर्वोऽपि नारा-यणप्रातिपदिकार्थ इत्यभिप्रेत्य शिववृत्तिधर्मावच्छिन्नोऽप्यवय-वार्थविमर्शवतो नारायणशब्दात् प्रतीयत इति प्रकृतहेतुतयोक्तम्? उत, प्रकृत व्युत्पन्न प्रतीतार्थस्य शिवे नारायणशब्दप्रवृत्तौ निमित्तत्वाभिधायक प्रमाणबलाद्वा?

नाद्यः। शिवभक्तस्य वादिनः स्ववृत्तिधर्मावच्छिन्न प्रतिपादकत्वेन नारायणशब्दस्य स्वपरत्वमपि साधयितुमिष्टं स्यात्। स्ववृत्तिधर्माव-च्छिन्न प्रतिपादकत्वस्यापि अवयवार्थविमर्शे व्युत्पन्नप्रतीतिगो-चरत्वात्। अराणां चक्रशंकूनां अयनं श्रीविष्णुचक्रम्। न विद्यतेऽरायणं धार्यतया यस्य स नारायण इति, अथवाज्ञत्व पारतन्त्र्य

दुःखित्व स्वल्पकर्तृत्वाद्यराणां जैव दोषाणां अयनमाश्रयः शिवः। स यस्य नो नेता स नारायणः इत्यादेः बहोर्व्युत्पत्तिलभ्यार्थस्य व्युत्पन्नप्रतीतिगोचरत्वसम्भवात्। तत्र प्राथमिकेऽर्थे चक्रधारणाभावो वाद्यनुभव सिद्ध एवेति नासिद्धो हेतुः। द्वितीये शिवस्योक्तधर्म वैशिष्ट्ये **प्रमाणानि बहूनि गुरु नवकोटिभेदिन्यां सम्यगुदाहृतानि** द्रष्टव्यानि। उदाहरिष्यन्ते चात्रापि कानिचित्। एवं च व्युत्पन्न प्रतिपत्तौ जीवधर्मविशिष्टशिवस्य नेतृतात्मकेश्वरत्वांगीकर्तुः वादिनोऽपि नारायणशब्दवाच्यत्वप्राप्तेः कारणवाक्यस्थनारायणशब्दस्यापि प्रकृत-वादि परत्व प्राप्त्या तस्यापि जगत्कारणत्वं स्यात्।

न च अनेनानुमानेन नारायण शब्दस्य शिवपरत्वे सिद्धे कारणवाक्य घटकस्यापि शिवपरत्वे बाधकाभावात् तस्य कारणत्वं मानान्तरेण सिध्यतीति वाच्यम्। तन्न्यायस्य प्रकृत वादि विषयेऽपि सम्भवात् तस्यापि कारणत्वं स्यादित्यतिप्रसक्तिः। न च शिवकारणत्व व्यवस्थापक शिवरुद्रादि नाम्नामुपक्रमोपसंहारयोः सद्भावे कथं साधारण नारायणशब्दस्य कारणवाक्यस्थत्वमात्रेण प्रकृतवादिनः कारणत्व-सिद्धिरिति वाच्यम्। नारायण शब्दनिर्वचनन्यायेन शिवनाम्नां प्रकृतवादिपरत्वेन नेतुं शक्यत्वात्। अन्यथा विष्ण्वसाधारण विष्ण्वादिनाम्नां कारण वाक्योपक्रमादि घटकानां शिवपरतया नेतुमशक्यत्वेन नारायणशब्दस्य साधारण्येऽपि न शिवकारणत्व-सिद्धिरिति। तस्मान्नेदं तात्पर्यरूप शिवपरत्वे लिंगम्। किन्तु उपक्रमादिरेव। शक्तत्वरूप शिवपरत्वे च कोशव्याकरणादिरेव। स च नारायणशब्दस्य शिवपरत्वे नास्तीति प्रकृत कारणवाक्यस्थ

नारायणशब्दस्य शिवपरत्वे नायं हेतुः प्रयोजकः। यस्य कस्यचिन्नारायणशब्दस्य शिवपरत्वे नास्माकमनुपपत्तिः। लक्षणया वा संकेतेन वा सम्बन्धार्थकाणुप्रत्ययान्तत्वेन वा प्रकृतवाद्यभिप्रेत वक्ष्यमाण सर्वसाधारणव्युत्पत्त्या वा शिवपरत्वस्य सकलचेतनपरत्व-साधारणस्य सिद्धौ तु तद्वृत्तिधर्मावच्छिन्न प्रतिपादकत्वरूप प्रकृत हेतुः सर्वथा अप्रयोजक एवेति, स्वोत्प्रेक्षित व्युत्पत्तौ णत्वानुपपत्तिः पक्षद्वयेऽपि समैवेति दिक्।

अत एव निषेधकोटिस्त्ववच्छेदकावच्छेदेनेत्यनुपपन्नम्। नारायणशब्दत्वावच्छेदेन निषेध कोटिवादिभिरप्यविशेषित शिव-परत्वाभावानंगीकारात्। साध्ये अविशेषितत्वाच्च।

यच्च नावयवेष्वाग्रह इति तच्च नियमसाधनेऽशक्तेरेवेति।

न च शिवे जलशायित्वमप्रसिद्धमिति वाच्यम्।

लिंगमूर्तिं महाज्वालामालासंवृतमव्ययम्।
लिंगस्य मध्ये रुचिरं चन्द्रशेखरविग्रहम्।
व्योममार्गे तथा लिंगे ब्रह्माणं हंसरूपिणम्।
विष्णुं वराहरूपेण लिंगस्याधस्त्वधोमुखम्।
ब्रह्माणं दक्षिणे तस्य कृतांजलिपुटं स्थितम्।
वामे विष्णुं महाबाहुं कृतांजलिपुटं तथा।
मध्ये लिंगं महाघोरं महाब्धेरंभसि स्थितम्।

इत्यादि शिवपुराणोपबृंहितेन ‘‘यमन्तः समुद्रे

कवयोऽवयन्ती’’ति महोपनिषन्मन्त्रेण च शिवे जलशायित्वप्रसिद्धेस्तदवच्छिन्न प्रतिपादकत्वं च ‘‘आपो नारा’’ इत्यादि मन्वाद्युक्त व्युत्पत्त्यैव सम्भवतीति।

यच्च लिंगमूर्तिमित्यारभ्य मन्वाद्युक्त व्युत्पत्त्यैव सम्भवती-त्यन्तेन नारायाणशब्दस्य शिववृत्ति जलशायित्वावच्छिन्न प्रति-पादकत्वसमर्थनं तदपि शिवलिंगन्यायमनुसरति।

तथाहि लिंगमूर्तिमिति पुराणवाक्यस्य यमन्तः समुद्र इति महोपनिषदुपबृंहकत्वं, तदुपबृंहितया च तया शिवस्य जलशायित्व-सिद्धिः, तया च मन्वाद्युक्त व्युत्पत्त्यनुरोधेन नारायणशब्दस्य शिववृत्ति-धर्मावच्छिन्न प्रतिपादकत्वसिद्धिरिति महता प्रयासेन नारायणशब्दस्य शिववृत्तिधर्मावच्छिन्न प्रतिपादकत्वरूप हेतुसमर्थनं, तत् स्पष्टं स्वभाष्यकारोदाहृत नारायणशब्द विष्णुपरत्वपर प्रमाणानामिव स्वभाष्यकारोदाहृत नारायणनामशिवपरत्वव्यवस्थापक मानानामदर्श-नाद्वा, उत सत्यपि तस्मिन् विशकलिततया विद्यमानानां पुराण श्रुतिस्मृति वाक्यानामैककण्ठ्य समर्थन चातुर्यं पूर्वतनेष्वदृष्टं स्वात्मन्येव प्रदर्शयितुं वा? नाद्यः। तादृश प्रमाणादर्शनेऽ-प्रामाणिकत्वेन तत्साधनानुपपत्तेः। न द्वितीयः। सति च प्रमाणजाते तदुदाहरणानन्तरमेव स्वचातुर्यप्रदर्शनस्य स्वाचार्य बहुमतिसहकृतस्य विद्वन्मनोहरत्वेन तद्विनोक्तैतत्साधनस्यानादर्तव्यत्वात्। तस्मात् परस्परमसंबद्धानामैकण्ठ्य प्रतिपादनेनैतत्साधनमयुक्तम्।

अशक्यं चैककण्ठ्यसाधनम्। तथाहि। लिंगमूर्तिमिति

पुराणवाक्यस्यासुराणां तादृशान्यथाकारोपासनयानर्थप्राप्त्यर्थं प्रवृत्तस्यासुरमोहार्थकत्वेन प्रातीतिकार्थे तात्पर्यायुक्तेः । ''वाचं धेनुमुपासीते'' त्यादाविवारोपिताकारेणोपासनायाः प्रमितत्वात् । अन्यथा बहुश्रुतीतिहासपुराण स्वभाष्यकारवचनविरोधेनाप्रामाण्यापत्तेः । तानि चोदाहृतानि । उदाहरिष्यन्ते चात्र कानिचित् । **विस्तरेण त्वस्मत्कृत गुरु भेदिन्याम्** । जैमिनिरपि ''विरोधे त्वनपेक्षं स्यादि''त्याह ।

तानि च प्रमाणानि- ''एको नारायण आसीत् न ब्रह्मा न च शंकरः'' । ''विष्णोर्नुकम्'' । ''न ते विष्णो'' । ''अथ पुनरेव नारायणः । सोऽन्यं कामं मनसाध्यायत । तस्य ध्यानान्तस्थस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषोऽजायत । अनपहतपाप्मा वाहमस्मि नाम मे धेहि'' । ''अहं कृत्स्नस्य जगतः'' । ''मया ततमिदं सर्वम्'' । ''ब्रह्माणमीशं कमलासनस्थम्'' । ''न वामदेवः किमुतापरे'' । ''सर्वात्मा प्रीयते हरिः'' । ''वरं दत्वाप संकटम्'' । ''रुद्रस्य व्यतनोद् यशः'' इत्यादीनि । मोक्षधर्मे च- ''अत्राप्युदाहरन्तीममि'' त्यारभ्याध्यायद्वयरूपमेकान्ते समासीनेन चतुराननेन तत्वबुभुत्सया स्वात्मसमीपं प्रत्यागतं स्वपुत्रं शिवं प्रति तारतम्यप्रदर्शनपूर्वकं विष्णोरेव शिवब्रह्माद्युत्तमत्वव्यवस्थापकं मानमस्ति । तच्चान्यत्र विस्तरेण द्रष्टव्यम् ।

शिवपुराणस्य मोहत्वे च काशीखण्डे आनन्दकानन माहात्म्ये शिवेनैव सनकादिभ्य उपदिष्टं मानं **गुरु भेदिन्यां** स्पष्टम् । ''त्वं च रुद्र महाबाहो'' ''कुत्सितानि च मिश्राणि'' ''शैवान् पाशुपतांश्चक्रे'' ।

इत्यादीनि बहूनि शिवपुराणानां मोहकत्वानर्थफलकत्वार्थकान्युदाहृतानि तत्रैव द्रष्टव्यानि ।

तस्मात् लिंगमूर्तिवाक्यस्य वाद्यभिमतार्थे न तात्पर्यम् । किन्तु महाब्धेरम्भसि तपःकरण प्रकारप्रदर्शन एव तात्पर्यम् । स च प्रकारः ज्वालामालासमाकुलत्व महाघोरत्वाम्भःस्थितत्व व्योममार्गस्थितत्वादिः । ज्वालामालासमाकुलत्व महाघोरत्वयोरतितपःपरिपाककार्यत्वात् । अब्धिस्थत्व व्योममार्गस्थत्वयोर्जलस्तम्भन प्राणधारणरूप तपःकरण प्रकारविशेषत्वात् । अत एव ''दशकल्पं तपश्चीर्णं रुद्रेण लवणाम्भसि । तप्यमानोऽथ सलिले'' इत्यादि भारते । यत् तस्य पार्श्वयोः ब्रह्मविष्ण्वोरवस्थानवचनं तत् तपसि प्रवृत्तस्य शिवस्य स्वगुरुदेवतयोः ब्रह्मविष्ण्वोरुपासनार्थमवस्थिति प्रतिपादकम् । यच्च कृताञ्जलिपुटमिति द्विर्वचनं तत् तावुभौ प्रति शिवकृताञ्जलिद्वयपरम् । या च तत्रान्वय व्यत्यासप्रतीतिः सा त्वसुरजनायोग्यतानिबन्धना । यच्च विष्णोर्लिंगाधःस्थत्वाधोमुखत्वप्रतिपादनं तत् निराधारलिंगस्य स्वतोऽवस्थानानुपपत्तेः विष्णोस्तदाधारत्वेनाधःस्थितत्वस्य वराहरूपेऽधोमुखत्वस्य च स्वाभाव्येपि विपरीतप्रतिभासोऽसुरजनायोग्यतैकनिबन्धन एवेति । अन्यथा परस्परविरुद्धार्थकानां विष्णुशिव कारणत्व पारम्यप्रतिपादकानां सकल श्रुतीतिहासपुराणादि वाक्यानां अप्रामाण्यप्रसंगेनानादिसिद्ध प्रेक्षावत्प्रवृत्ति विषयत्वानुपपत्तिप्रसंगो दुष्परिहरः स्यात् ।

न च विनिगमकाभावेन शिवोत्कर्षप्रतिपादकवाक्यविरोधेन

विष्णूत्कर्षवाक्यानामेव शिवोत्कर्षपरत्वेन योजयितुं शक्यत्वात् विपरीतप्रतिभासश्च असुरजनायोग्यतानिबन्धन इति किं न स्यादिति वाच्यम् । ऐककण्ठ्येन विष्णूत्कर्ष एव सर्वागमानां तात्पर्यव्यवस्थापक सामग्र्या एव विनिगमकत्वात् । अधिकारि भेदेन मोहार्थत्वस्याप्युपपत्तेः । न तथैककण्ठ्य व्यवस्थापक सामग्री तन्मते स्वाचार्य प्रदर्शितास्ति । अधिकारिभेदाभावान्न मोहार्थत्वं चाद्वैतमते युक्तम् ।।

शिवविष्ण्वोस्तादात्म्येनैककण्ठ्यसाधनं च न शिवस्यैव जगत्कारणत्वोपयोगीति, लिंगमूर्तिवाक्यं शिवस्य प्रलयमहोदधिशायित्व प्रतिपादकं सन्न महोपनिषदुपबृंहकम् । प्रलयमहोदधिशायित्वस्य कारणवाक्यस्थ नारायणशब्दबोध्यस्यैकव्यक्तिमात्र वृत्तित्वेन ''न ब्रह्मा न च शंकरः'' इत्यानुपूर्व्या भानात्, लिंगमूर्तिवाक्ये च मूर्तित्रयावस्थान प्रतीतेर्न तद्वाक्यं प्रलयवृत्ति जलशायित्वस्य शिव वृत्तित्वप्रतिपादकमित्यस्मादपि नोपनिषदुपबृंहकमिति दिक् ।

किंच प्रलयसमुद्र शायित्वं विष्णोरेव लिंगं, प्रलयस्वामित्वमपि । अन्यथा सत्यव्रतेन मार्कण्डेयेन च विष्णुमुद्दिश्य प्रलयदर्शनप्रार्थनं, तयोः प्रसन्नेन विष्णुना प्रलयप्रदर्शनं च अरण्यपर्वभारताष्टमद्वादशस्कन्धभागवत वाक्यैर्निपुणतरं प्रतिपादितं कथमुपपन्नं स्यात्? प्रलयस्वामित्वादेः शिवनिष्ठत्वे तत्प्रार्थनादिकमेवोपपन्नं स्यात् । तस्मादपि न ''लिंगमूर्तिमि'' ति वाक्यं शिवे प्रलय जलशायित्व प्रतिपादनेनोपनिषदुपबृंहकम् । तानि वाक्यानि **गुरु नवकोटिविभेदिन्यां** द्रष्टव्यानि ।

यमन्तः समुद्र इति महोपनिषच्च अम्भ्रणीवामनसूक्तादि समाख्यया विष्णुपरत्वेनैवावगतानेकविशेषण घटितानुपूर्वीका सती विष्णोरेव समुद्रान्तःस्थत्वं प्रतिपादयन्ती न शिववार्तां वेत्ति । एतद्विशेषविमर्शस्त्वन्यत्र ।

आपो नारा इति स्मृतिरपि स्वपूर्ववाक्यानुरोधेन विष्णुनिष्ठ जलशायित्वरूप नारायणशब्दव्युत्पत्तिलब्धार्थ प्रतिपादनपरा न शिवेऽपि तत् प्रदर्शयितुमीष्टे । अत्र ''ता यदस्येती''दमा ब्रह्मजनकत्वेन पूर्वप्रसक्तविष्णोरेव परामर्शात् ।

किंच ''ततः स्वयंभूर्भगवानि''त्यारभ्य ''आपो नारा'' इत्यन्त हरिवंश वाक्यानुरोधेन, ''पुरुषोऽण्डं विनिर्भिद्ये'' त्यारभ्य—

आत्मनोऽयनमन्विच्छन् अपोऽस्राक्षीच्छुचिः शुचीः ।
तास्ववात्सीत् स्वसृष्टासु सहस्र परिवत्सरान् ।
तेन नारायणो नाम यदापः पुरुषोद्भवाः ।
योगतल्पात् समुत्थितः ।
वीर्यं हिरण्मयं [illegible] ायया व्यसृजत् त्रिधा ।
नाभिह्रदादिह सतोऽम्भसि यस्य पुंसो
विज्ञानशक्तिरहमासमनन्तशक्तेः ।

इत्यादि बहुस्थलगत भागवतवाक्यानुरोधेन च निद्रामुद्रितेक्षणस्य विष्णोः स्वायनेच्छया स्वसृष्ट योगतल्परूप जलेषु शयनेन नारायणशब्दवाच्यत्वप्रतिपादनात्, आपो नारा इति स्मृतिवाक्य

सरूपापोनारा इति वाक्यस्यापि तद्घटकत्वात् तादृश समानानुपूर्व्या च स्मृतिवाक्ये विष्णुविषयत्वावगतेः, लोकाधार पद्मजनक नाभ्युपेतत्वेनापि नारायणशब्दप्रवृत्तेरुक्त भागवतादि सिद्धत्वाच्च आपो नारा इति स्मृतिर्न शिवे नारायणशब्द व्युत्पत्ति लभ्यार्थप्रदर्शनपरा । तथा च लिंगमूर्तिवाक्योक्तसाधारणजलवृत्तित्वस्य न मनुस्मृति तात्पर्यविषयत्वम् ।

स्पष्टं चेदं नारायणशब्दप्रवृत्तिनिमित्तभूतं जलशायित्वं विष्णोरेवेत्यत्र अरण्यपर्वगतवचनमस्ति । तच्च लेशतः प्रदर्शयिष्यामः ।

शिशुरुवाच -

कामं देवाऽपि मां विप्र नहि जानन्ति तत्वतः ।
त्वत्प्रीत्या तु प्रवक्ष्यामि श्रूयतां वचनं मम ।
पितृभक्तोऽसि विप्रर्षे मां चैव शरणं गतः ।

इत्यारभ्य,

आपो नारा इति पुरा संज्ञाकर्म कृतं मया ।
तेन नारायणोऽस्म्युक्तो मम तास्वयनं सदा ।
अहं नारायणो नाम प्रभवः शाश्वतोऽव्ययः ।।

इत्यादि तत्राध्यायद्वये मार्कण्डेयं प्रति विष्णुना श्रीवत्सकौस्तुभाद्युपेते वटपत्रशायिनि स्वस्मिन् स्वसृष्ट जलशायित्वं नारायणशब्दप्रवृत्तिनिमित्तमुक्तम् । ततोऽपि न स्मृतिः शिववृत्ति जलशायित्वपरेति सिद्धम् । तस्मात् विशकलिततया विद्यमानानां प्रातिस्विकरूपेण स्वस्वपूर्वोत्तर वाक्यानुरोधेन स्वस्वार्थे प्रवृत्तानां

पुराणोपनिषत्स्मृतीनामैककण्ठ्य व्युत्पादनमशक्यसाधनमित्येव न । किंत्वनेन प्रवृत्तिनिमित्तेन नारायणशब्दः शिवपर इत्यर्थप्रतिपादक स्पष्टप्रमाणादर्शनमूलकमपीत्युपेक्ष्यम् ।

स्वभाष्यकारोदाहृत नारायणशब्द निर्वचन पर प्रमाणजातानवलोकन निबन्धनं चेदम् । तच्चोक्तं शांकर सहस्रनामभाष्ये-

"नर आत्मा । ततो जातान्याकाशादीनि नाराणि कार्याणि । तानि कार्याण्ययते कारणात्मना व्याप्नोति । अतश्च तान्ययनमस्येति नारायणः ।

यच्च किंचित् जगत् सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।।

इति मन्त्रवर्णात् ।

नराज्जातानि तत्वानि नाराणीति विदुर्बुधाः ।
तान्येव चायनं तस्य तेन नारायणः स्मृतः ।।

इति महाभारते ।

नाराणां जीवानाम् अयनत्वात् प्रलये इति वा । यत् प्रयन्त्यभिसंविशन्तीति श्रुतेः ।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ।।

इति मनुवचनाद्वा नारायणः ।

नारायणाय नम इत्ययमेव सत्यः
संसार घोरविष संहरणाय मन्त्रः ।

श्रृण्वन्तु भव्यमतयो यतयोऽस्तरागा

उच्चैस्तरामुपदिशाम्यहमूर्ध्वबाहुः ।।

इति श्रीनरसिंहपुराणे ।

नारायणेति मन्त्रोऽस्तीत्यादि ।

नारं सरोरुहं प्रोक्तं जगद्योनि तु यत्पुरा ।

यस्य नाभौ समुत्पन्नं स नारायण उच्यते ।।

ब्रह्मादीन्यस्य भूतानि चराणि स्थावराणि च ।

अयनानि पुरा विष्णोर्नारायण इति स्मृतः ।। इति ।।

एवं चाद्वैत भाष्यकाराणां नारायणशब्दस्य सप्रमाणकं विष्णुपरत्वेनैव व्याख्याने जागरूके, तेनैव ब्रह्मादि चराचरात्मक प्रपंचस्य विष्णुकारणत्वे चोद्घोष्यमाणे, आपो नारा इति स्मृते र्विष्णुपरत्वे च श्रुत्यादिभिरुपक्रमादिमिश्च निर्णीते तन्मतावलम्बिना तद्विरुद्ध शिवमात्रकारणत्व नारायणशब्दशिवपरत्वयोः समर्थनं कथमपसिद्धान्तितं नेति सद्भिर्विभावनीयम् ।।

वस्तुतस्तु, ''अन्ये शिवोक्तमार्गेण शिवरूपिणमीश्वरम्'' इति भागवत वाक्यानुरोधेन,

''ब्रह्मणि ब्रह्मरूपोऽसौ शिवरूपी शिवे स्थितः'' ।

इति मानान्तरेण,

रजोगुणं समाश्रित्य विरिञ्चाद्यात्मना यतः ।

स भूतानि करोतीति भूतकृत् कथ्यते हरिः ।।

तामसं गुणमास्थाय रुद्ररूपी जनार्दनः ।

कृन्ततीति क्षिणोतीति हिनस्तीत्यथ भूतकृत् ।।

सत्वं गुणमधिष्ठाय भूतानि परिपालयन् ।

दधाति पाति पुष्णाति विभर्तीत्यथ भूतकृत् ।।

इत्यादि शांकर सहस्रनाम भाष्योदाहृत प्रमाणेन च ब्रह्मविष्णु शिवाख्यरूपत्रयत्वस्य विष्णौ प्रमितत्वेन तादृशरूपत्रयस्य क्रीडार्थं परस्परोपास्योपासक भावेन महाब्धिस्थितत्वपरं लिंगमूर्तिवाक्यं, न वाद्यभ्युपगत शर्वाण्याश्लिष्ट वर्ष्मत्वावच्छिन्न शिवपरम् । महोपनिषत्स्मृती च विष्णुपरत्वेनैवोक्तरीत्या निर्णीते इति नैताभिः परस्येष्टसिद्धिः । इष्टसिद्धिश्चास्माकम् ।

किं च महोपनिषदुपक्रमेऽम्भस्यपार इत्यत्र यत् अपारेऽम्भसि स्थितत्वरूप जलशायित्वमुक्तं तदेव यमन्तः समुद्रे इत्यनेनाप्युक्तम् । तदेव नारायणशब्दप्रवृत्तिनिमित्तमिति वादिनाप्यंगीकृतमिति न तत्र विवादः । परन्तु प्रकृतोपनिषद्वाक्यं शिववृत्ति प्रकृतशब्दप्रवृत्तिनिमित्त परमिति वाद्यभिप्रेतम् । उपनिषद्वाक्ये तु उपक्रमोपसंहारयोर्मध्ये वा शिवपरत्वव्यवस्थापकं किंचिदपि नास्तीत्यन्तरंग ज्ञापकाभावात् लिंगमूर्तिवाक्यं प्रकृतोपनिषदुपबृंहकतया तत्तात्पर्यज्ञापकत्वेन परेणोद्भावितम् । तच्च वाद्यभिमतार्थेऽनिर्णीत प्रामाण्यं प्रकृतोपनिषदुपबृंहकं नेत्युक्तमेव । विष्णुपरत्वे त्वेतदुपनिषद्घटके–

नारायणाय विद्महे वासुदेवाय धीमहि ।

तन्नो विष्णुः प्रचोदयात् ।।

इत्यत्रोपक्रम प्राप्त जलशायित्वरूप प्रवृत्तिनिमित्तधर्मावच्छिन्न पर नारायणशब्दस्य वासुदेव विष्णुपद सामानाधिकरण्यमन्तरंग ज्ञापकम् । अन्यथा शिवपर महादेव रुद्र पद सामानाधिकरण्यं स्यात् ।

रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख एव च ।
गरुडो ब्रह्मविष्णू च नारसिंहस्तथैव व ।
आदित्योऽग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसि ।।

इति मन्त्रद्वादशके देवतानामवैचित्र्यनिबन्धन मन्त्रवैचित्र्यानुक्रमणिकाप्यनुपपन्ना स्यात् । बहिरंगं तु पूर्वोदाहृतोभय निर्णीत प्रामाण्यक भारत हरिवंश भागवत वाक्यजातमित्यतोऽपि न परोदाहृत वाक्यत्रयेण नारायणशब्दस्य शिववृत्तिधर्मावच्छिन्न प्रतिपादकत्वसिद्धिरिति हेतोः स्वरूपासिद्धिस्तदवस्थैवेत्यलं पल्लवितेनेति **प्रथमकोटिभंगः ।।**

●●●

द्वितीयकोटिभङ्गः

"अत्र निषेधकोटि वादिनः— नारायणशब्दस्य केवल यौगिकत्वे णकारघटितत्वं न सम्भवतीति उक्तहेतुः स्वरूपासिद्धः । तथाहि अत्र "पूर्वपदात् संज्ञायामगः" इति सूत्रेणैव णत्वं वक्तव्यम् । तच्च न सम्भवति । नारायणशब्दस्य शिवे संज्ञात्वाभावात् । सूत्रार्थस्तु पूर्वपदस्थान्निमित्तात् परस्य नस्य णत्वं स्यात् संज्ञायामिति । उदाहरणं तु द्रुणसः खरणस इत्यादि । तत्र

द्रुरिव नासा यस्येति, खरस्येव नासा यस्येति विग्रहे पूर्वपदस्थात् रेफात् नस्य णत्वं भवति संज्ञात्वे । इतरथा तु द्रुनसः खरनस इत्येव भवति । एवं च प्रकृते पूर्वनारपदस्थात् रेफात् परस्योत्तरायनपदस्थस्य नकारस्य संज्ञात्वाभावात् णत्वं न सम्भवति । तथाचोक्तहेतुरसिद्ध एवेति ।"

यत्तु द्रुणसः खरणसः इत्यत्र द्रुरिव नासा यस्येति खरस्येव नासा यस्येति विग्रहप्रदर्शनं तदप्यञ्नासिकेति सूत्राक्षरानालोचन निबन्धनम् । तथाहि - तत्र तादृश विग्रह निष्पन्न द्रुनास खरनास शब्दावच्प्रत्यय नसादेशयोर्णत्वे च द्रुणस खरणसौ भवत इति वाच्यम् । तन्न सम्भवति । तत्र पूर्वपदादिति सूत्रेण णत्वसिद्धावपि अच्प्रत्यय नसादेशयोः "अञ्नासिकायाः संज्ञायां नसं चास्थूलात्" इति सूत्रेण नासिकान्त बहुव्रीहि तद्घटक नासिका शब्दयोरेव विधानेऽपि प्रकृत विग्रहनिष्पन्न द्रुनास खरनासेति बहुव्रीहि तद्घटक नासाशब्दयोस्तयोरविधानेन संज्ञायां पूर्वपदादिति णत्वमात्रे द्रुणासः खरणास इत्येव निष्पन्नत्वात् । अञ्नासिकेति सूत्रार्थस्तु "नासिकान्तात् बहुव्रीहेरच् स्यात् । नासिकाशब्दश्च नसं प्राप्नोति । नतु स्थूलपूर्वादि"ति । उदाहरणं तु द्रुणस इत्यादि । द्रुरिव नासिका यस्येत्यादि विग्रहः । स्थूलपूर्वात्तु स्थूलनासिकः ।

न च अन्यारादिति सूत्रेऽन्यशब्दवत् नासिकेत्यर्थपरः । तथा च नासिकार्थकान्तात् बहुव्रीहेरच्प्रत्ययनसादेशौ स्त इत्यर्थांगीकारात्

प्रकृते नासिकार्थकत्वात् नासायास्तद्घटित बहुव्रीहावपि तयोर्विधानेन तथा विग्रह प्रदर्शनं नासंगतमिति वाच्यम्। तत्रान्य इत्यर्थग्रहणं प्रपंचार्थमिति ग्रन्थकृद्भिरेवोक्तत्वेनान्यशब्दस्य स्वार्थपरकत्वेऽपि प्रकृते तदभावेन "स्वं रूपं शब्दस्याशब्दसंज्ञे"ति सूत्रेण नासिकाशब्दस्व-रूपस्यैव ग्रहणात्। अत एवाग्रेर्ढक् न वह्निशब्दात् भवति। अपि च खरघोण इत्यादि संज्ञाशब्देष्वतिप्रसंगः ॥

यदपीतरथा तु द्रुनसः खरनस इत्येव भवतीत्यसंज्ञात्व पक्षे प्रत्युदाहरण प्रदर्शनम्, तदपि न रमणीयम्। "अञ्नासिकायाः संज्ञायाम्" इत्यनेन संज्ञायामेवाच्प्रत्यय नसादेशयोर्विधानात्। असंज्ञात्वपक्षे तद्घटितयोरसाधुत्वात्। नच द्रुरिव नासिका यस्य, खरस्येव नासिका यस्येति विगृह्यमाणाभ्यां द्रुनासिक खरनासिकाभ्यां शसि तत्र नासिकायाः पद्दन्निति सूत्रेण "निर्दिश्यमानस्यादेशा भवन्ती"ति परिभाषया नसादेशे द्रुनसः खरनस इत्येतयोः द्वितीयाबहुवचनान्तत्वेन साधुत्वमिति वाच्यम्। केवल नासिकाशब्दे प्रवर्तमानस्य पद्दन्निति सूत्रस्य पदाङ्गाधिकाराभ्यां बहिष्ठत्वेन नासिकान्तेऽप्यप्रवृत्त्या तत्र द्रुनासिकान् खरनासिकानित्यनयोरेव साधुत्यात्। प्रथमान्त प्रत्युदाहरण सम्भवे द्वितीयान्त तदन्वेषणानुपपत्तेश्च।

यदप्येवं च प्रकृते पूर्वनारपदस्थात् रेफात् परस्योत्तरायन पदस्थस्य नकारस्य संज्ञात्वाभावात् णत्वं न सम्भवतीति निषेध-कोटिवादिनां तात्पर्यवर्णनं तदपि तद्भावाज्ञान विजृम्भितम्। तथाहि-

निषेधवादिनां नारायणशब्दत्वात्मक पक्षतावच्छेदकावच्छिन्ने यत्र क्व वा नारायणशब्दे आधुनिक शिवसंज्ञयापि णत्वांगीकार सम्भवेन नारायणशब्दसामान्ये शिवे संज्ञासामान्याभावप्रयुक्त णत्वाभाव तात्पर्यकल्पनाया अयुक्तत्वात्।

नच नारायण शब्दस्य शिवसंज्ञाया आधुनिकत्वेन तादृश-संज्ञाविषयत्वं पूर्वपदात् संज्ञायामित्यस्यायुक्तमिति वाच्यम्। आधुनिक चिरन्तन साधारण्येन संज्ञासामान्यवाचिनः संज्ञाशब्दस्य चिरन्तन संज्ञामात्रविषयत्वेन संकोच कल्पनस्यायुक्तत्वात्। प्रत्युताधुनिक संकेतस्यैव संज्ञात्वं, न चिरन्तन संकेतस्य। अतएव दक्षिणादिशब्दानां दिक्षु चिरन्तन संकेतशालित्वेऽप्याधुनिक संकेताभावेनासंज्ञात्वात् सर्वनामतया "दिशः सपत्नी भव दक्षिणस्या" इत्यादौ "पूर्वपरावर दक्षिणे"त्यादि सूत्रैः सर्वनामसंज्ञाप्रयुक्ताः स्यादयः सिद्ध्यन्ति। उत्तरादि शब्दानां कुरुष्वाधुनिक संकेत शालित्वेन संज्ञात्वादुत्तराः कुरव इत्यादौ "असंज्ञायामि"ति प्रतिषेधात् सर्वनामप्रयुक्त शीभावादयो न भवन्तीति दीक्षितप्रभृतयोऽप्याहुः। तस्माद्यत्र क्वापि नारायणशब्दे शिवे आधुनिक संकेतेनापि णत्वोपपत्तावपि न तेषामनुपपत्तिः। परंत्वनादिभूत कारणवाक्य घटक नारायणशब्दे आधुनिक शिव संज्ञाया अप्रयोजकत्वात् चिरन्तन तादृशसंकेतस्य चाभावेन तस्य शिवपरत्वे णत्वानुपपत्तिः केनापि निवारयितुमशक्येति तत्वम्। न च वाच्यमनादित्वेऽप्याधुनिक संकेतमात्रेण कारणवाक्यीय नारायणशब्दे णत्वं समर्थ्यमिति। तथा

सत्याधुनिकत्वात् संकेतस्य तत्करणात् पूर्वं प्रकृतस्य नकारघटितत्वमेव स्यात् । किंचेदानींतन णत्वविशिष्टस्य तस्यावेदत्वप्रसंग इति दिक् ।। विस्तरस्त्वस्मत्कृत **गुरु नवकोटिभेदिन्यां** द्रष्टव्यः ।

''तस्मान्नारायणशब्दो न शिवपरः । शिवविषयक शाब्दबोधप्रयोजककांक्षाशून्यत्वात् । यो यद्विषयक शाब्दबोधप्रयोजककांक्षाशून्यः स न तत्परः । यथा घटविषय शाब्दबोधप्रयोजककांक्षाशून्यः पटशब्दो न घटपरः । शिवविषयक शाब्दबोधप्रयोजककांक्षा नकारघटितैव । तच्छून्यत्वस्य पक्षे सत्वाद्धेतु सत्वोपपत्तिरिति''।।

यत्तु तस्मान्नारायणशब्दो न शिवपर इति निषेधवादिनां तात्पर्योद्घाटनं तदपि चिन्त्यम् । नहि निषेधवादिनो यया कयाचित् वृत्त्या शिवप्रतीतीच्छयोच्चरितत्वरूप शिवपरत्वम् अवच्छेदकावच्छेदेन नारायणशब्दे नेति मन्वते । येन तत्साधनमुपपन्नं स्यात् । न वा शिवविषयक शाब्दबोधजनककांक्षाशून्यत्वं प्रकृतशब्दे तदभिप्रेतम् । पूर्वोक्तवृत्त्यन्तरेण शक्तिभ्रमेण वा शिवविषयक शाब्दबोधस्य प्रकृतशब्दप्रयोज्यस्यानुभवसिद्धत्वेन तज्जनककांक्षाशून्यत्वे तदयोगात् । को हि स्वस्थ आत्मा अनुभवसिद्धमपलपति? किन्तु यया वृत्त्या यः प्रकृतशब्दः स्वपरभाष्यकारोदाहृत प्रमाणैर्जलशायित्व जगत्कारणत्व पद्मनाभत्वाद्यवच्छिन्न बोधकत्वेन निर्णीतः तमेव प्रकृत कारणवाक्यस्थ नारायणशब्दं विमतत्वेन

पक्षीकृत्य तया वृत्त्या शिवतात्पर्यकत्व तद्वृत्त्यभावौ पृथक् प्रयोगद्वये साध्यत्वेनाभिमतौ । अतो न सिद्धसाधनम् । तथाहि -

विमतो नारायणशब्दो न शिवतात्पर्यकः । शिवनिषेधकालवृत्तिवस्तुपरत्वात् । यो यन्निषेधकालवृत्तिवस्तुपरः स न तत्परः । यथा घटनिषेधकालवृत्तिवस्तुपरः पटशब्दो न घटपरः । ''एको नारायण आसीन्न ब्रह्मा न च शंकरः'' इति श्रुत्यैव शिवनिषेध कालवृत्तिवस्तुपरत्वावगमान्नारायणशब्दे हेतुसत्वोपपत्तिः ।

यद्वा विमतो नारायणशब्दो न स्वसंज्ञिभिन्नशक्तः । संज्ञायामेव विहित णत्वघटितत्वात् । द्रुणस इत्यादि शब्दवत् ।

यस्या एव महोपनिषद उपक्रमरूपेऽम्भस्यपारे यमन्तः समुद्र इति वाक्ये प्रतिपाद्यतया प्रसक्तं जलशायित्वं नारायणशब्दप्रवृत्तिनिमित्तं शिववृत्तीति परस्याभिमानः तन्महोपनिषद्घटकं नारायणशब्दमेव विमतत्वेन पक्षीकृत्य शिवपरत्वाभावः साध्यते। तथाहि- विमतो नारायणशब्दो न शिवपरः । प्रकृतोपनिषदि शिवमन्त्राघटकत्वे सति शिवान्यमन्त्रघटकत्वात् । य एवं स एवम् । यथा दन्त्यादिः । प्रकृते च ''तत्पुरूषाय विद्महे'' इति शिव मन्त्राघटकत्वे सति ''नारायणाय विद्महे'' इतिविष्णुमन्त्र घटकत्वाद्धेतु सत्वोपपत्तिरित्यन्यत्र विस्तरः ।

इति द्वितीय कोटिभङ्गः ।।

●●●

तृतीयकोटिभङ्गः

''अत्र विधिकोटिवादिनः— उक्तहेतुः स्वरूपासिद्धः। शिवविषयक शाब्दबोधप्रयोजकाकांक्षाया अपि णकार घटितत्वसम्भवात्। तथाहि यद्यपि कूर्मपुराण शिवसहस्रनामादौ शिवे नारायणशब्दप्रयोगदर्शनात् शिवे नारायणशब्दस्य संज्ञात्वमेव सम्भवति। कोशादेरिव श्रुतिपुराणादेरपि शक्तिग्राहकत्वात्। अन्यथा आकाशादि पदानां परब्रह्मपरत्वासिद्धि प्रसंगात्।''

यदुक्तं यद्यपि कूर्मपुराणेत्यारभ्य संज्ञात्वमेव सम्भवतीत्यन्तेन, तन्न। तत्र नारायणस्यायमित्यर्थे ''तस्येदमि''ति सूत्रेण नारायणशब्दादणि निष्पन्नस्य प्रकृतस्य श्रीमद्विष्णुभक्तत्वसम्बन्धेन शिवबोधकत्वात् शिवसहस्रनामादौ शिवे योगेनैतत्पदप्रयोग सम्भवेन तस्य तच्छक्त्यग्राहकत्वात्। संकेतलक्षणाभ्यां वा तत्प्रयोगोपपत्तेश्च। शिवस्य विष्णुभक्तत्वं तु ''वैष्णवानां यथा रुद्र'' इति स्मृत्युक्तं निराबाधमेव। न च नारायणशब्द नकारोत्तराकारस्य वृद्धिसंज्ञावत्वेन ''वृद्धिर्यस्याचामादि''रिति वृद्धसंज्ञायां वृद्धाच्छ इतीदमर्थे छप्रत्यये तस्य ''आयनेयीनीयियः फढखछघाम्'' इतीयादेशे शालीय इतिवन्नारायणीय इति स्यादिति वाच्यम्। ''वा नामधेयस्य वृद्धसंज्ञा वाच्ये''ति वार्तिकेन वृद्धसंज्ञाया वैकल्पिकत्वेन छप्रत्ययस्याभावात् तस्येदमित्यणि देवदत्तस्यायं दैवदत्त इतिवदुपपत्तेः॥

ननु कूर्मपुराणादौ पाठान्नारायणशब्दस्य शिवे शक्तिरेवास्तु

बाधकाभावादिति चेत् न। ''नतु नारायणादीनामि''त्यादि स्मृत्या विष्णवन्यत्र शक्त्यभावबोधनादिति।

यच्च कोशादेरिव श्रुतिपुराणादेरपि शक्तिग्राहकत्वादिति, तत्र प्रष्टव्यम्। किं तत् श्रुतिपुराणादिकम्? प्रकृत संज्ञा निर्वचनपूर्वकमनेन शब्देनायमर्थ उच्यत इति स्वासाधारणनाम्ना प्रकृतसंज्ञिनमनूद्य प्रकृतसंज्ञाविधायकं, यथा - ''तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमि'' त्यादि श्रुतिवाक्यम्,

''ब्रह्मादीन्यस्य भूतानि चराणि स्थावराणि च।

अयनानि पुरा विष्णोर्नारायण इति स्मृतः।''

''शिवः सुखात्मकत्वेन शर्वः शं रोधनाद्धरिः।''

इत्यादि पुराणवाक्यमुत, स्तुतिरूपम् तद्यथा-

''त्वमग्र इन्द्रो वृषभः सतामसि त्वं विष्णुरुरुगायो नमस्य''

इत्यादि श्रुतिवाक्यं, प्रकृतकूर्मपुराण शिवसहस्रनामादि पुराणवाक्यं च?

आद्येऽनुज्ञया वर्तामहे। तादृशं श्रुतिपुराणवाक्यं शिवविषये वादिना नोदाहृतमिति न शक्तिग्रहः। द्वितीये श्रुतिरूपस्य पुराणरूपस्य वा तस्यार्थवादरूपतया वायुक्षेपिष्ठादि वाक्यवत् स्तुत्या प्राशस्त्यार्थकत्वेन न शक्तिग्राहकत्वम्। अन्यथा विष्ण्वादि शब्दानामप्यग्नौ संज्ञापत्तिः। प्रयोगमात्रेण संज्ञात्वांगीकारेऽमुख्यवृत्तिमात्रोच्छेदापत्तिश्च। अतएव सहस्रनाम शांकरभाष्ये शिवादिशब्दानां शिवसंज्ञात्वमेवाभिप्रेत्य ''स ब्रह्म स शिव इत्याद्यभेदोपदेशात् शिवादि शब्दैर्विष्णुरेव स्तूयत''

इत्युक्तम्। यदि प्रयोगमात्रेण शक्तिरपि भाष्यकृदभिप्रेता स्यात् तर्ह्यभेदोपदेशादिति शक्यसम्बन्धोपपादनं, स्तूयत इत्यपि अयुक्तं स्यात्। शिवादि नामवान् विष्णुरेवेत्यप्युक्तिः स्यात्। अतः स्तुतिवाक्ये प्रयोगमात्रं रुढिज्ञापकमिति न तद्भाष्यकाराभिप्रेतमिति ज्ञायते।

ऋते नारायणादीनीति निषेधवाक्यादपि न शिवसंज्ञात्वम्। भागवते प्रथमे द्वितीये च नारायणशब्दवाच्यस्य सपरिकरं विष्णुत्वावधारणात्। षष्ठेऽजामिलोपाख्याने प्रकृतस्य वैकुण्ठनामत्वनिर्णयात्। नारायणवर्मत्वेन प्रसक्तस्य विष्णुविषयत्वेनावधारणाच्च। अष्टमस्कन्धे गजेन्द्रमोक्षे ''एवं गजेन्द्रमुपवर्णितनिर्विशेषम्'' इत्यारभ्य ''नारायणाखिलगुरो भगवन्नमस्ते'' इत्यन्तेन विष्णुपरत्वस्यैवावधारणाच्च। न कुत्रापि स्तुतिवाक्यव्यतिरेकेण सफलक्रियावाक्येषु नारायणशब्दस्य शिवे प्रयोगो दृष्ट इति न पूर्वोक्तं कोशादिवच्छक्तिग्राहकत्वं श्रुतिपुराणादीनामिति दिक्। अन्यत्र तु विस्तरः॥

यच्चान्यथाकाशादिशब्दानां परब्रह्मपरत्वासिद्धिप्रसंजनं, तदपि विनोदार्थं विचारयामः। अन्यथेत्यस्य श्रुतिपुराणादेः शक्तिग्राहकत्वाभावे इत्यर्थकत्वे सा शक्तिः संज्ञारूपा, उत योगरूपाथवोभयसाधारणशक्तिमात्रम्? नाद्यः। संज्ञात्वाभावेऽपि योगेन वा लक्षणया वाकाशादिशब्दानां परब्रह्मपरत्वसिद्धिसम्भवात्। संज्ञात्वस्य तद्भाष्यकारैराकाशादिशब्दानां परब्रह्मविषये क्वाप्यनुक्तेः।

शबले गहीतशक्तिकानां निर्गुणे प्रवृत्तौ लक्षणैव शरणमिति तदीयोक्तेश्च। योगेन सगुणे, लक्षणया च निर्गुणे समन्वयोपपत्तेश्च। प्रकृतवादिनैव संज्ञात्वपक्षानाश्रयणेनोत्तरत्र योगेनैव णत्वसमर्थनपूर्वकं नारायणशब्दस्य शिवपरत्वसाधनेन तद्रीत्याऽऽकाशादिशब्दानां योगेनैव परब्रह्मपरत्वसम्भवाच्च। न द्वितीयतृतीयौ। योगमात्रस्य वा साधारण शक्तिमात्रस्य वा णत्वसाधनानुपयोगेन श्रुतिपुराणादेः तद्ग्राहकत्वप्रतिपादनस्य तदनंगीकारे आकाशादिशब्दानां परब्रह्मपरत्वासिद्धि प्रसंजनस्य चायुक्तत्वमेवेति दिक्।

''तथापि तुष्यतु दुर्जन इति न्यायेन केवल यौगिकत्वमाश्रित्यापि नारायणशब्दघटक नकारस्य णत्वसमर्थनं कर्तुं शक्यते। तथाहि उत्तरसूत्रेण तत्र णत्वासम्भवेऽपि ''अट्कुप्वाङ्नुम्व्यवायेऽपी''ति सूत्रेणैवात्र णत्वं सम्भवति। सूत्रार्थस्तु अट् कवर्ग पवर्गाङ् नुम् एतैः व्यस्तैः यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णत्वं स्यात्, समानपदे इति। उदाहरणं तु रामेणेत्यादि। तत्र हि रामशब्दात् टाप्रत्यये कृते ''टाङसिङसामिनात्स्या'' इति सूत्रेण इनादेशे ''आद्गुण'' इति सूत्रेण गुणे च कृते उक्तसूत्रेण णत्वे च कृते रामेणेति सिद्ध्यति। तथाच प्रकृतेऽपि अडादि भिन्नेन व्यवधानाभावात् नकारस्य णत्वं निराबाधं सिद्ध्यति। समासत्वेन समानपदत्वस्यापि सम्भवात्।

तस्मान्नास्मदुक्त हेतुः स्वरूपासिद्धः। उक्तरीत्या पक्षे हेतुसत्वसम्भवात् ।''

यच्च केवल यौगिकत्वमाश्रित्यापि नारायणशब्दघटक नकारस्य णत्व समर्थनं कर्तुं शक्यत इति प्रतिज्ञायोत्तरसूत्रेण तत्र णत्वासम्भवेऽपि अट्कुप्वाङित्यनेन णत्वं सम्भवतीत्यादिना णत्वसमर्थनं तदपि शब्दशास्त्रानालोचन निबन्धनम् ।

तथाहि तत्र सूत्रे समानपद इत्यनुवर्तनान्नारशब्दान्निमित्त-युक्तादयनशब्दस्य भिन्नपदत्वेन तत्र नकारस्य सत्वेऽपि वक्ष्यमाण समानपदवृत्तित्वासम्भवात् तत्रैव विधीयमान णत्वस्य प्रकृते तस्यासाध्यत्वात् ।

नचान्तर्वर्तिनीं विभक्तिमाश्रित्य भिन्नपदत्वेऽपि समासोत्पन्न विभक्तिमादाय नारायणशब्दस्य सुबन्तत्वेन तत्प्रयोज्यैकपद्यं प्रकृतस्य निर्विवादमिति वाच्यम् । पद इत्येकवचनेनैकत्ववाचिना समानपद इति लब्धे समानग्रहणं, यत्र समानमेव पदं, निमित्तानधिकरण निमित्तिमत्पदाघटितरूपं पारिभाषिकं, तत्रैव यथा स्यादित्येतदर्थम् । तेन समासे रामनाम गन्धर्वगानम् इत्यादौ णत्वं न भवति । तत्रहि नकारस्य एकपदवृत्तित्वेपि निमित्तानधिकरण निमित्तिमत्पदाघटिता-त्मक समानपदवृत्तित्वाभावात् । भवति हि रामेण पूष्ण इत्यादौ । निमित्तानधिकरण निमित्तिमत्पदाघटितरूप समानपदवृत्तित्वान्न-कारस्य । अत्र निमित्तानधिकरणेत्यनुपादाने सुपर्वणेत्यत्राव्याप्तिरित्या-

दिना प्रतिपदव्यावृत्तिः शब्दरत्ने द्रष्टव्या । तथा च प्रकृते तु रेफरूप निमित्तानधिकरण नकाररूपनिमित्तिमदयनपदघटितत्वेन निरुक्त समानपदत्वाभावेन नारायणशब्दस्य केवल यौगिकत्वे तत्र नकारस्य णत्वं दुर्घटमेव। अतएव प्रनिरन्तरित्यादि सूत्रम्, अग्रग्रामाभ्या-मित्यादि वार्तिकं च चरितार्थम्। अन्यथा प्रवणम् अग्रणीरित्यादौ अट्कुप्वाङिति सूत्रेणैव णत्वसिद्धेः तयोर्वैयर्थ्यं स्यादिति। किंच ''समानपद इत्युच्यते, न चैतत्समानपदम्'' इत्यादि भाष्यमपि न संगतं स्यादित्यास्तां विस्तरः। **इति तृतीय कोटिभंगः ॥**

•

चतुर्थकोटि समर्थनम्

''अत्र निषेधकोटिवादिनः— नास्मदुक्तहेतुः स्वरूपासिद्धः। भवदुक्तहेतुरेव स्वरूपासिद्धः। तथाहि-समाससाधारणं समानपदत्वमत्र विवक्षितुमशक्यम् । गन्धर्वगानं रामनामेत्यादावप्युक्तरीत्या णत्वप्रसंगात् । एकत्व विवक्षयैव तल्लाभसम्भवात् समानपदवैयर्थ्य-प्रसंगाच्च। तस्मान्निमित्तानधिकरण निमित्तिमत् पदाघटितत्वरुपं पारिभाषिकं समान पदत्वमेव विवक्षणीयम् । तथा च प्रकृते निमित्तभूत रेफानधिकरण नकाररूपनिमित्तिमदयन पदघटितत्वात् यौगिकत्वपक्षे णत्वं नैव सम्भवतीति''॥

यच्चात्र ''निषेधकोटिवादिनः - नास्मदुक्त हेतुः स्वरूपासिद्धः। भवदुक्त हेतुरेव स्वरूपासिद्धः। तथाहि समाससाधारणं समानपदत्वमत्र विवक्षितुमशक्यमि'' त्यारभ्य ''णत्वं नैव सम्भवती''त्यन्तं निषेधकोटिवादिनां तृतीयकोटि निराकरणं तदेतदनुमतमेवास्माक-मित्यभिप्रेत्य न निराकृतम्। विवृतं चास्माभिर्बलिष्ठतया तृतीय कोटिखण्डनावसरे विशेष वाक्योदाहरणेनेति सुधीभिर्विभावनीयमिति **चतुर्थकोटि समर्थनम् ॥**

•

पञ्चमकोटिभङ्गः

''विधिकोटिवादिनः— अस्मदुक्त हेतुः न स्वरूपा-सिद्धः। उक्तपारिभाषिक समानपदत्व विवक्षणेऽपि उक्तस्थले नकारस्य णत्व सम्भवात्। तथाहि- ''उत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षण प्रतिषेधो वक्तव्य'' इति वार्तिकेन प्रत्ययलक्षण प्रतिषेधादयनेत्यस्य अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वायोगेन विवक्षित समानपदत्वं सम्भवत्येव। वार्तिकार्थस्तु उत्तरपदस्य पदत्वप्रयुक्त कार्ये कर्तव्ये प्रत्ययलक्षणं नास्ति पदादिविधिभिन्नविधौ। पदादिविधौ तु न प्रत्ययलक्षण प्रतिषेधः इति। प्रकृते च अयनेत्यस्य पदत्वप्रयुक्त णत्वे कर्तव्ये प्रत्ययलक्षण प्रतिषेधादयनेत्यस्य पदत्वाभावात्। तथाच अट्कुप्वाङिति सूत्रेणैव णत्वसम्भवात् भवदुक्त हेतुरेव स्वरूपासिद्धः। गन्धर्वगानमित्यादौ णत्वप्रसंगस्तु

क्षुभ्नादिगणपाठादेव वारणीयः। तस्याकृतिगणत्वा-दिति।''

यच्चोत्तरपदत्वे चापदादिविधावित्यारभ्य विवक्षितसमानपदत्वं सम्भवत्येवेत्यन्तं, तच्चायुक्तम्। तथाहि- प्रकृतवार्तिक घटकोत्तरशब्दः समासचरमावयवे रूढः। ''उत्तरपदशब्दो हि समासचरमावयवे रूढ'' इति समासे दीक्षितोक्तेः। तथाचोत्तरस्य समासचरमावयवस्य पदत्वे पदत्वप्रयुक्ते पदादिविधिभिन्ने कार्ये प्रत्ययलक्षणं नेत्यर्थकोत्तरपदत्वे चेति वार्तिकस्य ''विमलदिवी दधिसेचावि''त्यादावुत्वकुत्वादि वारणाय प्रवृत्तत्वेऽपि नारायणशब्दे णत्वस्य पदमध्य विधित्वेनापदादिविधित्वाभावात् तस्मिन्नप्रवृत्तेः। नचापदादिविधा-वित्यस्य पदादिविधि भिन्न विधावित्यर्थकत्वेन णत्वस्य पदमध्य नकारविधित्वेन तथात्वात् तस्मिन्नपि वार्तिकं प्रवर्तत इति वाच्यम्। ग्रन्थकृद्भिरपदादिविधावित्यस्य पदान्तविधावित्येवार्थमंगीकृत्य तथैवोदाहृतत्वात्। णत्वविधिसूत्रे समानपददानेऽपि भवदुक्तरीत्या गन्धर्वगानादिषु नारायणशब्द इव णत्वस्य दुर्वारत्वेन तद्व्यावृत्तये समानपदग्रहणासंगतेश्च।

अथवा अपदादिविधावित्यस्य ''सात्पदाद्यो'' रिति सूत्रमारभ्य यो विधिस्तदन्यविधावित्यर्थांगीकार आवश्यकः। अन्यथा माषकुम्भवापेनेत्यादावुत्तरपदत्वे चापदादिविधाविति प्रत्यय लक्षण प्रतिषेधात् कुम्भेत्यस्यापदत्वात् तद्व्यवायेऽपि ''पदव्यवायेऽपी''ति सूत्राप्रवृत्त्या कथमत्र णत्ववारणं स्यात्? नच कुम्भं वपतीति विग्रहे

कुम्भशब्द उत्तरपदं नेति तत्र न प्रत्ययलक्षणप्रतिषेध इति वाच्यम् । पूर्वसमासे तस्योत्तरपदत्वात् । तथाच पदव्यवायेऽपीत्यस्य सात्पदाद्योरित्यनन्तरं पठिततत्वेन तदन्यत्वाभावात् तस्मिन् प्रत्यय लक्षणप्रतिषेधाभावात् कुम्भस्य पदत्वेन तद्व्यवाये पदव्यवाय इति निषेधः सिद्ध्यति । तथाच प्रकृते अट्कुप्वाङित्यस्य सात्पदाद्योरित्यनन्तरं पाठात् तद्विहित णत्वस्य सात्पदाद्योरिति सूत्रमारभ्य यो विधिस्तद्घटकत्वेन तदन्यत्वाभावात् तस्मिन् कर्तव्येऽपि वार्तिकाप्रवृत्तेश्च ।

नच वार्तिकस्य तथार्थकत्वे कृतकर्मण इत्यादौ पदान्तस्येति सूत्रेण णत्वनिषेधापत्तिरिति वाच्यम्। भावकर्मणोरिति निर्देशेन क्वचित् पदान्तस्येत्यस्याप्रवृत्तेः ॥

एतत् सर्व पदान्तस्येति सूत्रविचारावसरे दुर्घटवृत्तौ- ''कथं कृतकर्मण इति? लुप्तविक्तौ प्रत्ययलक्षणेन णत्वनिषेधात्। उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधादिति चेन्न। अनेन हि नलोपाभावः शक्यो विज्ञातुम् । नतु णत्वप्रतिषेधाभावः। अपदादिविधाविति निषेधात् । पदव्यवायेऽपीत्यत्र माषकुम्भ-वापेनेत्येतत्सिद्धये रक्षितेनोक्तं ''सात्पदाद्योरित्यत आरभ्य यो विधिः स सर्वः पदादिविधिरि''ति । एतच्च पदादिविधिरित्यस्य उपलक्षणार्थ-त्वात् ''षात्पदान्तादि''त्यत्र सप्तमीसमासाश्रयणाल्लभ्यते । तद्धि सुसर्पिष्केणेत्येतदर्थम् । तच्चैवं भवति नान्यथा । ततश्च णत्वं पदादिविधिरेवेति । न । भावकर्मणोरिति निर्देशादि'' ति । तद्वदत्रेति णत्वस्य पदादिविधित्वव्यवस्थापकं स्फुटमनुसन्धेयम् ।

नच वार्तिकघटक पदादिशब्दस्य लक्षणया स्वघटित सात्पदाद्योरिति सूत्रपरकत्वे वार्तिकास्वारस्यमिति वाच्यम् । ''परमबुधावि''त्यादौ भष्भावादि वारणाय ''पदादिशब्दमुच्चार्य यो विधिरि''ति पदादिशब्दोच्चारणपूर्वक लक्षणायास्तन्मतेऽपि साम्यात् । अस्मन्मते परमबुधावित्यादौ भष्वारणं तु ''एकाचो बश'' इति सूत्रस्य सात्पदाद्योरित्यतः पूर्वमेव पाठात् तस्मिन् प्रकृत वार्तिक प्रवृत्तौ प्रत्यय लक्षणप्रतिषेधात् बुधेत्यस्यापदत्वादिति बोध्यम् ।

एतेन ''पदान्तविधावित्युक्ते सात्पदाद्योरित्यारभ्य यो विधि-स्तदन्यविधावित्याद्यर्थालाभाद् उत्तरपदत्वे चेति वार्तिकेऽपदादि-विधावित्युक्तेरावश्यकत्वेन ''पदान्तविधावेव प्रत्यय लक्षण प्रतिषेध'' इति यदि वार्तिककृतामभिप्रायः स्यादि''त्यारभ्य ''पदमध्यविधावपि प्रत्ययलक्षण प्रतिषेधोऽस्तीत्याशय उन्नीयत'' इति वक्ष्यमाणमपि परास्तम् ।

अपि च प्रकृतशब्दे कथंचिदुत्तरपदत्वे चेति वार्तिकस्य प्रवृत्तिमंगीकृत्यायनेत्यस्य सुबन्तत्वात्मक पदत्वनिषेधेऽपि केवल यौगिकत्वे णत्वं दुर्घटमेव । तथाहि- तत्र निमित्तानधिकरणेति पारिभाषिकसमानपदत्वघटक पदशब्देन पद्यते बोध्यतेऽनेनेति बोधकमात्रं विवक्षितं वा? आहोस्वित् सुप्तिङन्तं पदमिति पारिभाषिकं वा? नाद्यः । राजभोगीण इत्यादौ निमित्तानधिकरणसुप्प्रत्यय घटितत्वेन समानपदत्वाभावात् तत्र णत्वस्याव्याप्तेः । न द्वितीयः । गन्धर्वगानादौ सुपः प्रागेव ''गतिकारकोपपदानां कृद्भिः सह

समासवचनं प्राक् सुबुत्पत्ते''रिति वचनेन समासे तत्र गानेत्यस्य सुबन्तत्वात्मक पदत्वाभावेन तद्घटितस्य समानपदत्व प्राप्त्या तत्र णत्वस्यातिव्याप्तेश्च। तस्माद् विभक्तीतरानपेक्षतया लोकेऽर्थ-प्रत्यायकत्वेन दृष्टवर्णसमुदायत्वरूप पदत्वमेव विवक्षणीयम्। अत एवाचार्यादणत्वं चेति चरितार्थम्। अन्यथा स्त्रीत्वबोधक-ङीष्घटितत्वेनासमानपदत्वादेव णाभावसिद्धेः किं तेन?

अयं ग्रन्थकृतामपि सम्मतः। तथाहि- शब्दरत्नादौ ''निमित्तानधिकरण निमित्तिमत् पदाघटितत्वरूपं समानपदत्वं विवक्षणीयम्। पदं चात्र विभक्तीतरानपेक्षतयार्थबोधकत्वेन दृष्ट-वर्णसमुदायरूपम्। अत एवाचार्यादणत्वं चेति वार्तिकं चरितार्थम्। अन्यथा निमित्तवत् प्रातिपादिकभिन्नसमुदाय वृत्तित्वेन णत्ववारणे किन्तेन? किंच गन्धर्वगानमित्यादौ गतिकारकोपपदानामिति प्राक् सबुत्पत्तेः समासेऽपि निरुक्तसामानपद्याभावात् न णत्वम्। अत्र निमित्तानधिकरणेत्यनुपादाने सुपर्वणेत्यत्राव्याप्तिः। निमित्तिमत्पर्वशब्द घटितत्वात्। अतस्तदुपादानम्। निमित्तानधिकरण पदाघटितत्व-मित्येतावदुक्तौ मातृभोगीण इत्यादावव्याप्तिः। निमित्तानधिकरण भोगशब्दघटितत्वात्। अतस्तदुपादान''मिति। तथाच पूर्वोक्ताव्याप्ती न स्तः। एवं च प्रकृते त्वयनशब्दस्य निरुक्तपदत्वेन तद्घटितस्य समानपदत्वाभावादित्यलमतिविस्तरेण।

यच्च गन्धर्वगानमित्यादौ णत्वप्रसंगस्त्वित्यारभ्य तस्याकृति-गणत्वादित्यन्तं तन्न सुन्दरम्। तत्र समानपद इत्येतावतैव

णत्वव्यावृत्तौ तदर्थं क्षुभ्नादौ अनेकेषां गन्धर्वगानादीनां प्राति-स्विकरूपेण पाठाङ्गीकारस्य गौरवग्रस्तत्वात्। प्रकृत गणपाठां-गीकारादेव णत्ववारणे गन्धर्वगानादौ तदर्थं णत्वविधिसूत्रे समानपदानुवृत्त्यसंगतेश्च। किंच येषां णत्वं नेष्यते तेषां प्रकृत-गणपाठादेव तदभावसिद्धौ अनेकेषां तत्र तत्र णत्व निषेधकानां ''पदान्तस्ये''त्यादि सूत्राणाम् ''इरिकादिभ्यः प्रतिषेध'' इत्यादि वार्तिकानां च वैयर्थ्याच्चेति दिक्। **इति पंचम कोटि भंगः ॥**

●

षष्ठकोटि समर्थनम्

''निषेधकोटिवादिनः— नास्मदुक्तहेतुः स्वरूपा-सिद्धः। तथाहि गन्धर्वगानादीनां क्षुभ्नादिगणपाठकल्पने गौरवात् अपदादिविधावित्यस्य पदान्तविधावित्येवार्थः कल्प्यते। एवं सति गन्धर्वगानादौ नातिप्रसंगः। तत्र हि नकारस्य पदमध्यत्वेन पदान्तत्वाभावात् णत्वविधेः पदान्तविधित्वाभावेन प्रत्ययलक्षणप्रतिषेधाभावात् पूर्वोक्तपारिभाषिक समानपदत्वाभावात्। एवं च नारायणशब्देऽपि नकारस्य पदमध्यत्वेन णत्वविधेः पदान्त विधित्वाभावेन प्रत्ययलक्षणसम्भवात् समानपदत्वाभावेन णत्वं नैव सम्भवति। अयं चार्थः ग्रन्थकृतामपि सम्मतः। तत्र तत्र पदान्त विधावेव प्रत्ययलक्षणप्रतिषेध इत्युक्तत्वादिति। तस्माद् भवदुक्त हेतुरेवासिद्ध इति'' ॥

इदं व निषेध कोटिवादिनां तात्पर्यवर्णनम् । तदेतत्सर्वं पंचमकोटि खण्डनावसरेऽस्माभिः सम्यक् विवृतमित्यंगीकृतमेव इति **षष्ठ कोटि समर्थनम् ।।**

•

सप्तमकोटि खण्डनम्

''विधिकोटिवादिनः— अस्मदुक्त हेतुर्नासिद्धः । तथाहि । पदान्तविधावेव प्रत्ययलक्षणप्रतिषेध इति यदि वार्तिककृतामभिप्रायः स्यात् तदा ''उत्तरपदत्वे च पदान्तविधौ प्रत्ययलक्षणप्रतिषेध'' इत्येव तैरुच्येत । अपदादिविधावित्यस्य वक्राभिधानत्वात् । अतः वार्तिककृतां पदमध्यविधावपि प्रत्ययलक्षण प्रतिषेधोऽस्तीत्याशय उन्नीयते । पदान्तविधावेवेति ग्रन्थेषु चैवकारेण पदादिविधेरेव व्यवच्छेदः क्रियते । नतु पदमध्यविधेरपि । वार्तिकस्वारस्यानुरोधात् । चक्षुषैव रूपं गृह्यते इत्यादौ एवकारेण त्वच एव व्यवच्छेददर्शनात् । अन्यथा मनसापि रूपस्य ग्रहणात् तद्वाक्यं बाधितार्थकं स्यात् । तस्मात् पदमध्यविधावपि प्रत्ययलक्षण प्रतिषेधसत्वान्नारायणशब्दे यौगिकत्व-पक्षेऽपि णत्वं सूपपादमेवेति । गन्धर्वगानादेः क्षुभ्नादिगणपाठकल्पनागौरवस्य प्रामाणिकत्वेन तस्या दोषत्वात् । तस्माद् भवदुक्तहेतुः स्वरूपासिद्ध एवेति ।''

यच्च वक्राभिधानत्वादिति तत् पंचमकोटि खण्डनावसर एव निराकृतम् ।

यदपि ''पदान्तविधावेवेति ग्रन्थेषु चैवकारेण पदादिविधेरेव व्यवच्छेदः क्रियते । नतु पदमध्यविधेरपी'' त्येवकारस्य संकुचि-तार्थकल्पनं तदपि न समीचीनम् । तस्य णत्वसूत्रे समानपद इत्युक्तावपि गन्धर्वगानादौ णत्वात्मक पदमध्यविधौ त्वदुक्तरीत्या प्रकृत वार्तिकेन गानादेः पदत्वनिषेधात् तद्घटितस्य समानपदत्वप्राप्त्या तत्र णत्वे तद्वारणाय क्षुभ्नादि पाठस्यावश्यकतया तत एव णत्ववारणसम्भवे तत्र समानपदेनैव णत्व व्यावर्तक-ग्रन्थविरुद्धत्वात् । किंच त्वद्रीत्या प्रवणमग्रणीरित्यादावडिति सूत्रेणैव णत्वसिद्धौ प्रनिरितिसूत्राग्रग्रामाभ्यामिति वार्तिकयोः वैयर्थ्यापत्त्या तद्विरुद्धत्वाच्च ।

यच्च चक्षुषैव रुपं गृह्यत इत्यादि तदप्ययुक्तम् । भौतिका-नामिन्द्रियाणां स्वस्वप्रतिनियतेन्द्रियत्वव्यवस्थापकं स्वस्वोपा-दानभूत मात्रागुण ग्राहकत्वमसाधारणं, नान्यवृत्तीत्यभिप्रेत्य चक्षुषैव रूपं गृह्यत इति प्रवृत्ते प्रयोगेऽवधारणेन चक्षुष्ट्वानवच्छिन्न मनआदि सर्वेन्द्रिय व्यावृत्तौ का वानुपपत्तिः ? सामान्यतो रुपग्राहकत्वस्य मनआदि साधारण्येऽप्यसाधारणस्य ग्राहकत्वविशेषस्य मनआदावप्रसक्तेः । अन्यथा भागवतादौ ''पृथ्वी घ्राणस्तु गन्धगः । अम्भो जिह्वा रसग्रहः । तेजश्चक्षू रूपोपलम्भनम्'' इत्याद्युक्ते-रसांगत्यापत्तेः । मनसः सर्वग्राहकत्वेन, तदन्यत्वगादेरलौकिक

सन्निकर्षेण रूपादिग्राहकत्वेन चक्षुरादिषु विशेषोक्त्ययोगात् । तस्मात् साधारणमेव ग्राहकत्वं विवक्षितं चेत् क्व त्वच एव व्यावृत्तिः? अत एवेन्द्रियं रूपग्राहकं चक्षुरित्याद्या लक्षणोक्तय उपपन्नाः। अन्यथा तत्राप्यनुपपत्तिरिति यस्तत्र प्रतीकारः सोऽत्रापीति त्वच एव व्यावृत्त्युक्तिरयुक्तैवेति । एतदेव प्रतिपादितं ''श्रोत्रं चक्षुः स्पर्शनं चे''ति श्लोक व्याख्यावसरे शांकरभाष्ये तत्रैवानुसन्धेयम् ।

न चैवं सति वार्तिकास्वारस्यमिति वाच्यम्। तस्य ''पदादिशब्दमुच्चार्य यो विधिरथवा सात्पदाद्योरिति सूत्रमारभ्य यो विधिस्तदन्य विधावि'' त्यन्यतरार्थ तात्पर्यकत्वेन स्वारस्यस्य पंचम कोटिखण्डनावसरेऽस्माभिरुक्तप्रायत्वात् । अर्थद्वयेऽन्यतरार्थ प्रयोजनं तत्रैवोक्तमनुसन्धेयम् । एवं चापदादिविधावित्यस्य पदान्तविधावित्ये-वार्थः सूत्र वार्तिक सम्मतः । ग्रन्थसम्मतश्च । तस्मान्नारायणशब्दस्य केवल यौगिकत्वे णत्वं दुर्घटमेव। एवं स्थिते गन्धर्वगानादेः क्षुभ्नादिगणपाठकल्पनागौरवस्य प्रामाणिकत्वेन तस्यादोषत्वादिति वक्तुर्वादिनो धैर्यमन्यादृशमेव मन्यामह इति । **इति सप्तम कोटि खण्डनम् ॥**

•

अष्टमकोटिभङ्गः

''निषेध कोटिवादिनः— अस्मदुक्तो हेतुर्नासिद्धः । तथाहि । अपदादिविधावित्यत्र पदादिविधिर्न भवतीत्यपदादिविधिः । पदीदिविधिर्नाम पदादिशब्दमुच्चार्य

यो विधिः क्रियते स एव । स च सात्पदाद्योरित्यादिना क्रियमाणः षत्वनिषेधविधिरेव । इत्थं चाट्कुप्वाङ्नुम् व्यवायेऽपीत्यनेन क्रियमाणविधेः पदादिशब्दोच्चारण पूर्वकत्वाभावेन अपदादिविधित्वात् प्रत्ययलक्षण प्रति षेधे द्रुणसः खरणस इत्यादौ चानेनैव सूत्रेण णत्व सिद्धेः पूर्वपदात् संज्ञायामग इति सूत्रं नियमपरमेव भविष्यति । सिद्धे समारभ्यमाणत्वात्। नियमशरीरं च ''पूर्वपदस्थान्निमित्तात् परस्य उत्तरपदस्थस्य नकारस्य णत्वं चेत् संज्ञायामेवे''ति । एवं च गन्धर्वगानमित्यादौ नातिप्रसंगः । तत्र पूर्वसूत्रेण णत्वप्राप्तावप्यनेन नियमेन तस्य वारितत्वात्। वार्तिक स्वारस्यं चास्मिन्नर्थे सम्भवतीति । एवं च नारायणशब्दे कथंचिदपि णत्वं न सम्भवत्येवेति। तस्माद् भवदुक्तहेतोः स्वरूपासिद्धेः नारायणशब्दः शिवपरो न भवतीति ।''

यच्चापदादिविधावित्यत्र पदादिविधिर्न भवतीत्यारभ्य नियम-परमेव भविष्यतीत्यन्तेन निषेधवादिनां तात्पर्यकल्पनं तच्च तद्-भावाज्ञान विजृम्भितम्। तथाहि। अत्र यद्यपि निषेधवादिनः पदादिशब्दमुच्चार्य यो विधिरित्यर्थांगीकारेण द्रुणसादौ सुबन्तत्वरूप पदत्वाभावमभ्युपगच्छन्तोऽपि गन्धर्वगानादौ सुपः प्राक् समासे तत्र णत्व व्यावृत्तये समानपदे विभक्तीतरानपेक्षयार्थप्रत्यायक वर्णसमुदायत्वात्मक पदत्वमंगीकुर्वाणाः तत्र तादृश णत्वप्रतिबन्धक

पदत्वमंगीकुर्वन्त्येव। तस्माद् द्रुणसादावडिति सूत्रेणैव णत्वतात्पर्यं तेषां शशशृंगायितमेव। तथापि तुष्यत्विति न्यायेन तदंगीकृत्यापि दूषणं वच्मः।

पूर्वपदादिति सूत्रं न नियमपरत्वेन तदनुमतम्। यदि कुत्राप्यपूर्वविधित्वं सूत्रस्य न घटेत तर्हि नियमार्थत्वस्य वक्तुमुचितत्वात्। अस्ति च पूर्वपदात् संज्ञायामित्यस्य क्वचित् स्थलेऽपूर्वविधित्वसम्भवः। ''रम्यभवणधन'' इत्यादि संज्ञाशब्देषु मध्यमपदभूत भवनशब्दवृत्ति नकारस्य विध्यर्थतयैतत्सूत्रस्योपपत्तेः। न चात्राडिति सूत्रेणैव णत्वसिद्धिरिति वाच्यम्। मध्यमपदस्थ नकारस्य निमित्तानधिकरणनिमित्तिमदभिन्नपदवृत्तित्वेन तदभावाभावात्। मध्यमपदस्योत्तरपदत्वाभावेनोत्तरपदत्वे चापदादिविधाविति प्रतिषेधस्याप्रवृत्तेः। नच ''रम्यभवणधना''दि शब्देषु संज्ञाया आधुनिकत्वेन तद्विषयकत्वं पूर्वपदादित्यस्यायुक्तमिति वाच्यम्। आधुनिक संज्ञाविषयत्वं पूर्वपदादिति सूत्रस्याबाधितमिति द्वितीय कोटि खण्डनावसरे सम्यक् प्रपंचितत्वात्। तर्ह्यत्र निषेधवादिनां तात्पर्यं किमिति चेत् तत् सप्तम कोटि खण्डनेऽस्माभिः प्रदर्शितं बोध्यम्। **इत्यष्टम कोटिभंगः**॥

•

नवमकोटिभङ्गः

''विधिकोटि वादिनः— नास्मदुक्त हेतुः स्वरूपासिद्धः। तथाहि। अपदादिविधावित्यत्र पदादिशब्दमुच्चार्य

यो विधिस्तदन्यविधावित्यर्थकरणे पदादिशब्दस्य लाक्षणिकत्वापत्त्या वार्तिकास्वारस्यस्य दुर्वारत्वात्। पूर्वपदादिति सूत्रस्य सम्भवति विधिपरत्वे दोषत्रयदुष्ट नियमपरत्वकल्पनस्यानुचितत्वाच्च। एवंरीत्या वार्तिकास्वारस्यं पूर्वपदादित्यस्य नियमपरत्वं चाभ्युपेत्य गन्धर्वगानादेः क्षुभ्नादिगणपाठमकल्पयित्वा नारायणशब्दे णत्ववारणे प्रश्नोपनिषदि ''यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्ये''ति, ''षोडशकलाः पुरुषायणाः पुरुषं प्राप्ये''ति च समाम्नातयोः समुद्रायण पुरुषायण शब्दयोः णकारघटितत्वानुपपत्तिः सर्वथैव वारयितुमशक्या। तस्मात् गन्धर्वगानादेः क्षुभ्नादिगणपाठं कल्पयित्वा अतिप्रसंगं निवार्य उत्तरपदत्वे चेत्यादि वार्तिकस्य यथाश्रुतार्थकत्वं परिकल्प्य पूर्वपदादित्यस्य द्रुणसः खरणस इत्यादौ णत्वविध्यर्थकत्वमंगीकृत्य समुद्रायण पुरुषायण शब्दयोर्णत्वमुपपादनीयमेवेति नारायणशब्देऽपि णत्वं निराबाधं सिध्यति। नच समुद्रायण इत्यादौ णत्वं प्रकारान्तरेणोपपद्यत इति वाच्यम्। तस्य नारायणशब्दे दण्डवारितत्वाभावादिति।

एतेन यथाश्रुतमेव समानपदत्वं निरुच्य पूर्वपदादित्यस्य नियमत्वं परिकल्प्य गन्धर्वगानादिवन्नारायणशब्दे णत्ववारणमपि परास्तम्।

एतेन प्रकारेण प्रकारान्तरेण वा नारायणशब्दे णत्वनिषेधः सर्वोऽपि निरसनीयः । इत्थं च शिवपरत्वं सिद्ध्यत्येवेति भवदुक्तहेतुरेवासिद्धः ।।''

यदुक्तं अपदादिविधावित्यत्र पदादिशब्दमुच्चार्य यो विधिस्तदन्यविधावित्यर्थकरण इत्यारभ्य वार्तिकास्वारस्यस्य दुर्वारत्वादित्यन्तेन, तत् शाब्दिकसमयानभ्यासमूलम् । तथाहि । परमबुधावित्यादौ ''एकाचो बश'' इति सूत्रेण प्राप्तभष्भाववारणाय ''पदादिशब्दमुच्चार्य यो विधिस्तदन्यविधावि''त्यर्थाङ्गीकर्तृभिर्वार्तिके पदादि शब्दलाक्षणिकत्वस्य शाब्दिकैरेवांगीकृतत्वात् । नच तेषां पदादिशब्दस्य शक्यार्थमपहाय लाक्षणिकार्थाङ्गीकारे तत्र तत्तात्पर्यग्राहकप्रमाण विरहेण तदर्थानुपपत्तिरिति वाच्यम् । ''लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमि''ति तात्पर्यग्राहकपरिभाषाया जागरूकत्वात् । न चैवं सति वार्तिकास्वारस्यमिति वाच्यम् । पाणिनीय तन्त्रे परिभाषानुगृहीतार्थस्य लाक्षणिकत्वेऽपि तस्यैव स्वारस्यांगीकारात् । अन्यथा परिभाषाया नैरर्थक्यं स्यात् । परमबुधावित्यादौ भष् भावापत्तिश्च । अत एव ''विभाषा दिक् समासे बहुव्रीहावि''त्यादौ ''दिङ्नामान्यन्तराल''इति प्रतिपदोक्त समासस्य ग्रहणमिति दीक्षिताद्युक्तिः संगच्छते ।

यदपि पूर्वपदादिति सूत्रस्य सम्भवति विधिपरत्वे दोषत्रय दुष्टनियमपरत्व कल्पनस्यानुचितत्वादिति, तदपि न । पूर्वोक्तरीत्या वार्तिके पदादि शब्दस्य लाक्षणिकत्वस्यावश्यकत्वेन द्रुणसादौ णत्वस्य

पदादिभूत नकारविधित्वेऽपि पदादिशब्दोच्चारणपूर्वकत्वाभावेन तदन्यविधित्वात् तस्मिन् कर्तव्ये उत्तरपदत्वे चेति वार्तिकेन प्रत्ययलक्षणप्रतिषेधात् नसेत्यस्यापदत्वात् तद्घटितस्य निमित्तानधिकरण निमित्तिमत्पदाघटितत्वरूप समान पदत्वप्राप्त्या तत्राट्कुप्वाङ् इति सूत्रेणैव णत्वसिद्धौ पुनरारम्भात् पूर्वपदात् संज्ञायामिति सूत्रस्य नियमपरत्वं दुर्वारमेवेति ।

यच्च प्रश्नोपनिषदीत्यारभ्य समुद्रायण पुरुषायणशब्दयोः णकारघटितत्वानुपपत्तिरित्यन्तं तच्चायुक्तम् । छन्दस्येव प्रयुज्यमान समुद्रायण पुराषायणशब्दयोः बाहुलकेन णत्वसिद्धावपि वेद लोक साधारण नारायाणशब्दे तदभावात् । छन्दसि वर्णव्यत्ययस्य प्रसिद्धत्वात् । तदुक्तम्–

सुप्तिङुपग्रह लिंग नराणां
काल हलच् स्वर कर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां
सोऽपि च सिद्ध्यति बाहुलकेन ।।

इति । कथमन्यथा ''यथाश्मानमाखणमृत्वा विध्वंसेत'' इत्यादौ रषाभ्यां परत्वाभावेन णत्वं स्यात्? किंच समुद्रायणादौ त्वदुक्तरीत्या समानपदत्वेनाडित्यनेन णत्वांगीकारे तस्य लोकेऽपि प्रयोगापत्तेश्च । नच कारणवाक्यस्थ नारायणशब्दस्य पक्षत्वेन तत्रापि बाहुलकेनैव णत्वसिद्धिरिति वाच्यम् । नारायणशब्दः शिवपर इत्युक्तवता वादिना लोकसाधारण नारायणशब्दस्यैव पक्षत्वांगीकारात् । अन्यथा विधिः

सामानाधिकरण्येनेति स्वोक्त्ययुक्तेः। किंच समुद्रायणादावनायत्या बहुलग्रहणेन णत्वाङ्गिकारेऽपि कारणवाक्यस्थ नारायणशब्दस्य विष्णुपरत्वे विष्णुर्नारायण इति कोशादिगम्य संज्ञात्वेन ''पूर्वपदात् संज्ञायामि''ति सूत्रेण णत्वे तत एवोपपत्तौ तस्य शिवपरत्वमंगीकृत्य संज्ञात्वाभावात् णत्वशास्त्रदारिद्र्येण जघन्य बाहुलकत्वांगीकारे मानाभावात्। नच प्रकृतस्य शिवपरत्वं विना शिवकारणत्वासिद्धेः तदर्थं बाहुलकाश्रयणमिति वाच्यम्। भक्षितेऽपि लशुने न शान्तो व्याधिरिति न्यायेन बाहुलकाश्रयणेऽपि ''नच शंकर'' इति कारणवाक्य एव शिवनिषेधेन शिवपरत्वासिद्ध्या तत्कारणत्वासिद्धेर्दुष्परिहरत्वात्। ''नतु नारायणादीनामि''त्यादि बहिरंग निषेधस्य च जागरूकत्वात्। ''स आदिकर्ता नारायणाख्यो विष्णुरि''ति शांकर गीताभाष्य-विरोधात्। किंच ''यतो यस्मात् सर्वाणि भूतानि भवन्ति उद्भवन्ति आदियुगागमे'' इत्यादि शांकर सहस्रनाम भाष्यविरोधात्। तत्रैव नारायणशब्द निर्वचनविरोधाच्चेत्यलमुपहसनीय प्रक्रिया निराक्रिया-विस्तरेण ॥

व्युत्पत्ति बलेन नारायणशब्दस्य शिवपरत्वायोगः

''एवं प्रकारान्तरेणाप्यस्मदुक्त हेतुः सूपपादः। तथाहि। न विद्यते राः यस्य अराः दरिद्रः। स न भवतीति नाराः श्रीमान्। स चासावश्च नारायः। नारै इत्यैकारस्यायादेशः। श्रीमान् विष्णुरित्यर्थः। तस्य णः सुखं यस्मात् स नारायण इति व्युत्पत्त्या

श्रीमद्विष्णुसम्बन्धि सुख जनकत्वरूप शिववृत्ति धर्मा-वच्छिन्न प्रतिपादकत्वात्। स्वनेत्रसहित सहस्रकमलार्चन तोषित शिवेन विष्णोश्चक्रप्रदानादि प्रतिपादकानेक पुराणवचनेभ्यस्तस्य प्रसिद्धत्वात्। एवं नराणां नरस्य वा सम्बन्धिनी नारे। अयश्च णं चायणे। नारे अयणे यस्मादिति व्युत्पत्त्या नरसम्बन्धि शुभावहविधिर्ज्ञानं चैतदुभय जनकत्वरूप तादृशधर्मावच्छिन्न प्रतिपादकत्व-स्य नारायणशब्दे सूपपादत्वात्। एवं प्रकारान्तराण्यपि वेदितव्यानि। एवंच कारणवाक्यघटक नारायणशब्दस्य शिवपरत्वव्यवस्थितौ कारणवाक्यानां सर्वेषामेव शिवपरत्वसम्भवात् शिवस्य जगज्जन्मादि कारणत्वं नानुपपन्नमेवेति ॥''

यच्चैवं प्रकारान्तरेणाप्यस्मदुक्त हेतुः सूपपाद इत्यारभ्य शिवस्य जगज्जन्मादिकारणत्वं नानुपपन्नमेवेत्यन्तं स्वमनीषोत्थवचनजातं तत् सकलश्रुति स्मृतीतिहास पुराण स्वभाष्यकार स्वयूथ्य वचनविरुद्धमित्यालोच्य सुधीभिरुपेक्षणीयमेव। तथाहि।

न विद्यते राः यस्येत्यादि व्युत्पत्तिद्वयं निर्मूलत्वात् पूर्वमा-भासभूतास्मत्प्रदर्शित प्रकृतवादिविषयक व्युत्पत्तिद्वयवदाभासभूतमेव। स्वोत्प्रेक्षामात्रमूलकस्य अनाद्यागम घटक प्रकृतशब्दनिर्वचन-रूपत्वेऽतिप्रसक्तेः। तत्राद्य व्युत्पत्तौ तु विष्णोः स्वनेत्रसहित सहस्रकमलार्चनेन शिवप्रसदादाप्तचक्रसम्बन्धेन सुखप्राप्तिः प्रदर्शिता।

सा च कर्मसाध्य प्रयोजनवत्ता जीवत्वाविनाभूता शैव पुराणजात सम्मत्या प्रदर्शिता। तच्च पुराणजातमुदाहृतोदाहरिष्यमाण प्रमाणविरोधान्मोहकमिति न तेन प्रकृत व्युत्पत्तिलब्धार्थसिद्धिरिति।

विष्णोरेवादिकारणत्वं श्रुत्यादिसिद्धम्

श्रुतयः -

एको नारायण आसीन्न ब्रह्मा न च शंकरः। यं कामये तं तमुग्रं कृणोमि। अहं रुद्राय धनुरातनोमि। अस्य देवस्य मील्हुषो। विदे हि रुद्रो रुद्रियं महित्वम्। सोऽरोदीद्यदरोदीत्।

इत्याद्याः। अत्र शिवस्यादिकारणत्वं निषिध्य विष्णोरेवादि-कारणत्वोक्त्या तस्याजीवत्वसिद्धेः, शिवस्य पराधीन पदप्राप्त्यादे-र्जीवत्व प्रापकस्य श्रवणाच्च तत्प्रतिपादक पुराणमोहकत्व सिद्धिरिति।

स्मृतिरपि "आपो नारा" इत्यादिका उपक्रमवशादिममेवार्थमाह।

इतिहासश्च -

अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।

नास्ति नारायणसमं न भूतं न भविष्यति।

न मे पार्थास्ति कर्तव्यम्।

न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः।

ब्रह्माणमीशं कमलासनस्थम्।

मोक्षधर्मे - "अत्राप्युदाहरन्तीममितिहासं पुरातनमि" त्यारभ्य

अथ तत्रासतस्तस्य चतुर्वक्त्रस्य धीमतः।

तल्ललाटोद्भवः पुत्रः शिव आसीद्यदृच्छया।

अग्रतश्चाभवत् प्रीतो ववन्दे चापि पादयोः।

तं पादयोर्निपतितं दृष्ट्वा सव्येन पाणिना।

उत्थापयामास तदा चिरादागतमात्मजम्।

पितामहः - स्वागतं ते महाबाहो... ।

रुद्रः - त्वत्प्रसादेन भगवन् स्वाध्यायतपसोर्मम।

कुशलं चाव्ययं चैव सर्वस्य जगतस्त्वथ।.....

को ह्यसौ चिन्त्यते ब्रह्मन् त्वयैकः पुरुषोत्तमः।

एतन्मे संशयं ब्रूहि महत् कौतूहलं हि मे।

पितामहः - तथा तं पुरुषं विश्वं परमं सुमहत्तमम्।

निर्गुणं निर्गुणा भूत्वा प्रविशन्ति सनातनम्।

न स शक्यस्त्वया द्रष्टुं मयान्यैर्वापि सत्तम।

सगुणैर्निगुणैर्विश्वो ज्ञानदृश्यो ह्यसौ स्मृतः।

अक्षयश्चाप्रमेयश्च सर्वगश्च निरुच्यते।

अशरीरः शरीरेषु न स लिप्यति कर्मभिः।

ममान्तरात्मा तव च ये चान्ये देहिसंज्ञिताः।

सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्॥

चिन्तयामि गतिं चास्य न गतिं वेद्मि चोत्तराम्।

यथाज्ञानं तु वक्ष्यामि पुरुषं तु सनातनम् ।
तस्यैकत्वं महत्वं च स चैकः पुरुषः स्मृतः ।
महापुरुषशब्दं स बिभर्त्येकः सनातनः ।
तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः ।
स हि नारायणो ज्ञेयः सर्वात्मा पुरुषो हि सः ।
न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा ।
कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते ।
स सप्तदशकेनापि राशिना युज्यते च सः ।
देवाः सर्वे मुनयः साधुशान्ता -
स्तं प्राग्वंशे यज्ञभावं भजन्ते ॥
अहं ब्रह्मा चाद्य ईशः प्रजानां
तस्माज्जातस्त्वं च मत्तः प्रसूतः ॥
मत्तो जगज्जंगमं स्थावरं च
सर्वे वेदाः सरहस्याश्च पुत्र ॥
चतुर्विभक्तः पुरुषः स क्रीडति यथेच्छति ।
एवं स भगवान् स्वेन ज्ञानेन प्रतिबोधितः ॥
एतत्ते कथितं पुत्र यथावदनुपृच्छतः ।
सांख्यज्ञाने तथा योगे यथावदनुवर्णितम् ॥

इत्यध्यायद्वयं संग्रहेण गृहीतम् । विस्तरस्त्वन्यत्र ।

अत्र विष्णोरेवादिकारणत्वम् अशरीरत्वं कर्मफलसम्बन्धाभावो

निर्गुणत्वम् आदित्वमव्ययत्वं चेत्यादीन्यनेकानीश्वरत्वव्यवस्थापकानि स्पष्टमुक्तानि ।

ब्रह्म शिवयोर्जीवत्वं श्रुत्यादिसिद्धम्

ब्रह्मशिवयोस्तु तत्पुत्रपौत्रत्वे देहित्वं कर्मफलसम्बन्धोऽज्ञत्व पारतन्त्र्ये बन्धमोक्षौ चेत्येतदादीनि जीवत्वव्यवस्थापकानि स्पष्टमुक्तानि ।

पुराणानि च-

भागवते पञ्चमे— ''नवस्वपि वर्षेषु भगवान् नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्वव्यूहेनात्मनाद्यापि संनिधीयते । इलावृते तु भगवान् भव एक एव पुमान् न ह्यन्यस्तत्रे'' त्यारभ्य ''भगवतश्चतुर्मूर्तेमहापुरुषस्य तुरीयां तामसीं मूर्तिं... भव उपधावति । श्री भगवानुवाच- ॐ नमो भगवते महापुराषाये''त्यारभ्य

यस्याद्य आसीद् गुणविग्रहो महान्
विज्ञानधिष्ण्यो भगवान् अजः किल ।
यत्सम्भवोऽहं त्रिवृता स्वतेजसा....
तस्मै नमस्तद् विलयोदयात्मने ॥

इत्यनेन शिवस्य विष्णुभजन प्राप्त वैभवादिकं प्रतिपादितम् । सप्तमेऽपि नरसिंहं प्रति शिव प्रार्थनं - ''कोपकालो युगान्तस्त'' इत्यादि । तत्रैव -

स एष भगवान् राजन् व्यतनोद् विततं यशः ।

रुद्रस्य देवदेवस्य मयेनानन्त मायिना ।।

इत्यादिना त्रिपुरहनन कीर्त्यादिर्विष्णुप्रसादायत्तत्वं स्पष्टं प्रतीयते। अतोऽपि न शिवप्रयोज्य सुखवत्त्वं विष्णोः ।

अष्टमेऽपि ''इति ब्रुवाणो भगवान् तत्रैवान्तरधीयते''त्यारभ्य-

स्कन्ने रेतसि सोऽपश्यदात्मानं देवमायया ।

जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात् ।

अथावगतमाहात्म्यमात्मनो जगदात्मनः ।

अपरिज्ञेय वीर्यस्य...... ।

इत्यादिना भगवन्मायामोहितस्य कामतो नानाविकारः प्रतीयते । न तत्प्रयोज्य सुखादिकं विष्णोः ।

नवमेऽपि, ''रुद्रः- वयं न तात प्रभवाम भूम्नी''त्यारभ्य,

तस्य विश्वेश्वरस्येदं चक्रं दुर्विषहं हि नः ।

तमेव शरणं याहि हरिस्ते शं विधास्यति ।

इति दुर्वाससं प्रति चक्रस्य स्वासह्यवीर्यत्वं रुद्रेण प्रतिपादितमिति न शिवदत्तत्वं चक्रस्य ।

दशमेऽपि ''वरं दत्वाऽऽप संकटमि'' त्यारभ्य भस्मासुरकृतानर्थ परिहारः शिवस्य विष्णुना कृत इति, तत्रैव ''हरिस्तु निर्गुणः साक्षादि''त्यादिना ब्रह्मविष्णुशिवानां मध्ये विष्णोरेवोत्तगत्वं भृगुसंवादेन व्यवस्थापितम् ।. अतोऽपि न शिवस्य विष्ण्वनुग्राहकत्वम्।

स्वभाष्यं च - सहस्रनाम शांकरभाष्ये किमेकं दैवतमित्यारभ्य आग्रन्थपरिसमाप्ति विष्णोरेवादिकारणत्वादिकमेव स्पष्टं प्रतिपादितम् । एवं गीता शांकरभाष्येऽपि– ''नानवाप्तमवाप्तव्यमि''ति श्लोकव्याख्या-वसरे विष्णोः प्राप्तप्राप्तव्यत्वादिकं स्पष्टमुक्तम् ।।

भगवद्गीता गूढार्थप्रकाशिकायामद्वैतिकृतायामेवाव्यक्तं व्यक्ति-मापन्नमिति श्लोकव्याख्यावसरे—

''अव्यक्तं देहग्रहणात् प्राक् कार्याक्षमत्वेन स्थितमिदानीं वसुदेवगृहे व्यक्तिं भौतिक देहावच्छेदेन कार्यक्षमतां प्राप्तं कंचिज्जीवमेव मन्यन्ते मामीश्वरमबुद्धयो विवेकशून्याः अव्यक्तं सर्वकारणमपि मां व्यक्तिं कार्यरूपतामि''त्यारभ्यानेकस्थलेषु अप्राकृताभौतिक मायाविग्रहवत्त्वं विष्णोः प्रदर्श्य–

''ननु जन्मकालेऽपि सर्वयोगि ध्येयं श्रीवैकुण्ठस्थमैश्वरमेव रूपमाविर्भावितवति, संप्रति च श्रीवत्स कौस्तुभ वनमाला किरीटकुण्डलादि दिव्योपकरणशालिनि, कम्बु कमल कौमोदकी चक्रधारि चतुर्भुजे, श्रीमद्वैनतेय वाहने, निखिल सुरलोक संपादित राजराजेश्वराभिषेकादि महावैभवे, सर्वसुरासुर जेतरि, विविधदिव्यलीलाविलास सर्वावतार शिरोमणौ, साक्षाद् वैकुण्ठ नायके, निखिललोकनिस्ताराय भुवनमवतीर्णे विरिंचप्रपंचासम्भवि निरतिशय सौन्दर्यसार सर्वस्वमूर्तौ, बाललीलाविमोहित विधातरि, खरकिरणोज्वल दिव्यपीताम्बरे, निरुपमश्यामसुन्दरे, करदीकृत पारिजातार्थपराजित पुरन्दरे, बाणयुद्धविजित शशांकशेखरे, समस्तसुरासुर विजयिनि, नरकप्रभृति महादैतेयप्रकर प्राणपर्यन्त

सर्वस्वहारिणि, श्रीदामादि परमरंक महावैभवकारिणि, षोडश सहस्र दिव्यरूपधारिणि, अपरिमेयगुणगरिममहामहिमनि, नारदमार्कण्डेयादि महामुनिगणस्तुते त्वयि कथं अविवेकिनोऽपि मनुष्यबुद्धि- र्जीवबुद्धिर्वा?'' इत्यर्जुनाशंकामपनिनीषुराह भगवान् -

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ।

अहं सर्वस्य लोकस्य न प्रकाशः । किन्तु मद्भक्तानामेव प्रकटो भवामीत्यभिप्रायः'' इत्यारभ्य

मामात्मपरदेहेषु द्विषन्तो ह्यभ्यसूयकाः ।
तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभान् आसुरीष्वेव योनिषु ।
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ।

इत्यादि गीतावाक्यव्याख्यावसरे विष्णोरेवादिकारणत्वा- दोषत्वादि महामाहात्म्यप्रतिपादनपूर्वकं तद्विरुद्धभाषिणां तथा जानतां च दुर्गतेरेव प्रतिपादनात्,

नैवात्मनः प्रभुरयं निजलाभ पूर्णो
मानं जनादविदुषः करुणो वृणीते ।
यद्यज्जनो भगवते विदधीत मानं
तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ।।

इत्यादि प्रह्लादोक्तोदाहरणपूर्वकं विष्णोः परिपूर्णत्वोक्तेश्च तादृश स्वयूथ्यवचन विरोधाच्च प्रकृतवाद्युक्ताद्यनिर्वचनस्य द्वितीयस्य च स्वातन्त्र्यविवक्षायां पूर्ववद्विरोधादेव, अस्वातत्र्यविवक्षायां चाव्यावर्तकत्वेनायुक्ततेति ।

किंच तत्र द्वितीये अयश्च णश्चेति द्वन्द्वे णस्याल्पाच्तरत्वात् पूर्वनिपातापत्तिरित्याद्यूह्यम् ।

एतेन न विद्यते राः यस्य अराः दरिद्रः । स न भवतीति नाराः कुबेरः । तं प्रत्यणति भाषते ''कुबेरस्त्र्यम्बकसख'' इति कोशात् त्र्यम्बकसखत्वान्नारायणः शिव इत्यादीन्यव्यावर्तक निर्वचनानि परास्तानि ।

परमशिववाद प्रक्रियापि तस्य शर्वाण्याश्लिष्टवर्ष्मत्व नन्दि- वाहनत्व गंगाधरत्व त्रिपुरान्तकत्वादिविशेषणवैशिष्ट्ये उक्तरी- त्याऽऽदिकारणत्वानुपपत्तौ, तद्वैकल्ये च तस्य परम शुद्धत्वेन परमशिवशब्दवाच्यस्य विष्णुत्वमेवेति, तस्यादिकारणत्वे न विप्रतिपत्तिरिति ।

निराकर्तव्य शैवपुराणादिवद् उदाहृत प्रमाणानां मोहकत्व प्रतिबन्दी तु स्वाचार्याणां प्रतारकत्व प्रसंजिकैव । श्रुतिपुराणादीनाम् आज्ञारूपाणां वक्ता भगवान् अद्वैतमते स्वयमेव स्वस्य मोहजननेन नानाविधानर्थं संपादयतीति क्वापि विवेकिन्यसम्भाव्यमान स्वानर्थसंपादनोद्योग प्रसंजिकेत्यास्तां विस्तरः ।

नवकोटि चरम पद्यस्यासङ्गतत्वम्

''नवकोटिरयं ग्रन्थः शिवपादाम्बुजेऽर्पितः ।
निर्मत्सराणां विदुषां संतोषं तनुतां चिरम् ।।''

यदपि नवकोटिरयं ग्रन्थ इत्यनेन स्वकृतग्रन्थस्य शिवपादाम्बुजार्पितत्व प्रदर्शनेन निर्मत्सराणां विदुषां संतोषजनकत्व प्रार्थनं तदपि श्रीमद्विष्णुद्वेषेण, विष्ण्वसाधारण्येन बह्वागमसिद्धे सांव्यवहारिके नारायणशब्दे प्रमाणसिद्ध व्युत्पत्तिमपहाय स्वोत्प्रेक्षामात्रमूलक व्युत्पत्तिभिः शिवपरतां नेतुं प्रवृत्तस्यास्य ग्रन्थस्य शिवपादाम्बुजार्पणेन ''यस्त्वां द्वेष्टि स मां द्वेष्टी''ति शिवोक्तेः शिवसन्तोषजनकत्वं निर्मत्सरविद्वत्सन्तोषजनकत्वं च कथमिति सद्भिर्विभावनीयमित्यलमतिनिर्दल तत्पक्ष प्रतिक्षेप क्रियाविस्तरेण ।

तस्मात् कारणवाक्यस्थ नारायणशब्दस्य केवल यौगिकत्वे णत्वानुपपत्त्या ''पूर्वपदात् संज्ञायामि''त्यनेनैव तस्मिन् वाच्ये संज्ञायाः शिवेऽसम्भवेन शिवपरत्वानुपपत्त्या शिवस्य जगत्कारणत्वासम्भवेऽनन्तागमवेद्यानन्तगुणपूर्ण रमाब्रह्मरुद्रेन्द्रादिवन्द्यचरणसरोजस्य श्रीमहाविष्णोरेव जगज्जन्मादि कारणत्वं सिद्धमित्यशेषमतिमंगलम् ।।

यो ह्याम्नायशिरोविभूषणमणिर्यः पद्मनाभाभिधो
यः पद्मजभवाश्रयोऽस्य जगतः कर्ताब्धिशायी च यः।
यश्चागण्यविदोषपूर्णगुणको यो मध्वहृत्पद्मग
स्तं नारायणसंज्ञमक्षरमजं विष्णुं श्रयेऽहं श्रिये ।।

ये मद्धृदब्जमाविश्य नवकोटि विमर्शनम् ।
कृतवन्तः कृपावन्तो नंनम्ये तान् गुरून् मम ।।
नृसिंह पादपूजार्थं कोलाहलपुरौकसा ।
कट्टे नृसिंहेन कृता नवकोटिविभेदिनी ।।

इति श्री नवरत्न सत्यबोधार्य शिष्येण कोलाहल कट्टे नृसिंहेन कृता नवकोटिविभेदिनी समाप्ता ।।

।। श्रीकृष्णार्पणमस्तु ।।

●●●

।। श्री वेंकटेशाय नमः ।।

श्री यादवाद्रिनिवासिनानन्तार्येण विरचितम्

परकृत नवकोटि निरसनात्मकं

णत्व तत्व विभूषणम्

नान्दीपद्यम्

यत्पाद निःसृतात्तीर्थाच्छिवस्तु शिवतां गतः ।
तमहं सर्ववेदान्तसारं नारायणं भजे ।।
शेषार्यवंशवार्धीदुरनन्ताचार्यकोविदः ।
करोति विदुषां प्रीत्यै णत्व तत्व विभूषणम् ।।

अत्र किल कैश्चिदद्वैतवादिभिरेव शैव जन सबहुमानावलोकन-लिप्सया तन्मतप्रविष्टैर्नारायण शब्दस्य शिववाचकत्वसाधन प्रत्याशया कश्चन सन्दर्भो निबद्धः । स तावदामूलचूडमयुक्त इति प्रतिपाद्यते ।

नारायणशब्दस्य शिवपरत्वसाधनवैयर्थ्यम्

तत्र यत्तावदुक्तं— **''शिवस्य अगत्कारणत्वसिद्धेः कारणवाक्यघटक नारायणशब्दस्य शिवपरत्वसिद्ध्यधीनत्वात् नारायणशब्दस्य शिवपरत्वमेव प्रथममुपपादनीयम् ।''** इति,

अत्रोच्यते । शिवस्य जगत्कारणत्वसिद्धेरित्यनेन शैवभिन्न-समवेतस्य शिवविशेष्यक जगत्कारणत्वप्रकारकानाहार्याप्रामाण्य-ज्ञानानास्कन्दितनिश्चयस्य न विवक्षणसम्भवः । तेषां शिवो न

जगत्कारणमिति बाधनिश्चयसत्वेन अनाहार्य तादृशनिश्चयोत्पत्त्य-सम्भवात् । बाधज्ञानशून्यतादशायां तादृशनिश्चयोत्पत्तावपि तस्याप्रामाण्यज्ञानास्कंदितत्वात् । विशेषदर्शनशून्यशैवभिन्नसमवेतस्य शैवसमवेतस्य च तादृश निश्चयसम्भवेऽपि न विवक्षणसम्भवः । अनुमानाधीन तादृशनिश्चयस्य कारणवाक्यघटक नारायणशब्दस्य शिवपरत्व सिद्ध्यधीनत्वाभावात् । तादृशशाब्दबोधविवक्षणेऽपि शिवो जगत्कारणमित्यादि गुरुवाक्याधीनबोधे तदभावात् । श्रुतिजन्य बोधविवक्षणेऽपि ''एको रुद्रो न द्वितीयाय तस्थ'' इति श्रुतिजन्य बोधे तदभावात् । ''एको ह वै नारायण आसीदि''ति श्रुतिजन्यबोध विवक्षणेऽपि लक्षणाधीन बोधे तदभावात् । नारायणशब्दस्य शिववाचकत्व साधनस्य विफलत्वात् ।

न च शक्तिसम्भवे लक्षणाकल्पनस्यानुचितत्वात् योगव्यवस्थापनं युज्यत इति वाच्यम् । प्रोद्गात्रधिकरणे योगाद् रूढिपूर्वकलक्षणाया बलीयस्त्वस्य व्यवस्थापिततया तद्विरोधापत्तेः ।

ननु ''प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातृणां प्र यजमानस्ये''ति मन्त्रे उद्गातृणां चमसः प्रैत्वित्यर्थके उद्गातृशब्दरूढ्यर्थस्य बहुत्वासम्भवात् पाशमन्त्र इव वचनमविवक्षितार्थमिति पूर्वपक्षे अदितिः पाशान् प्रमुमोक्त्विति पाशमन्त्रे बन्धनसाधनस्य पाशशब्दरूढ्यर्थस्य वा यौगिकार्थस्य वा लक्ष्यार्थस्य वा बहुत्वासम्भवात् पाशानिति बहुवचनस्य अविवक्षितत्वेऽपि उद्गातृपदयोगार्थस्य लक्ष्यार्थस्य वा बहुत्वसम्भवात् अविवक्षा न

युक्तेत्येतावन्मात्रमेव तदधिकरणे सिद्धान्तितम् । न तु योगापेक्षया लक्षणायाः प्राबल्यमपि । तथा सति "यो वै बालाके एतेषां पुरुषाणां कर्ता यस्य वैतत् कर्मे" त्यत्र कर्मशब्दस्य चलनादृष्टयोः रूढस्य अदृष्टजन्य जगति लक्षणासम्भवेन तां विहाय योगप्रतिपादनपरस्य जगद्वाचित्वादित्यधिकरणस्यानुपपत्तेः । लक्षणाभिप्राये च, यस्य ब्रह्म च क्षत्रं चेत्यत्र लक्षणाभिप्रायेण अत्ता चराचरग्रहणादिति निर्देशेन, जगद्ग्रहणादिति निर्देशापत्तेः । वाचित्वादित्यस्य शक्तिपरस्य प्रयोगानुपपत्तेः । एवं ब्रह्मज्ञानशून्यत्वरूप साधारणधर्मेण शूद्रसदृशे शूद्रपदस्य लक्षणासम्भवेऽपि योगार्थ प्रतिपादन परस्य "शुगस्य तदनादरश्रवणादि"त्यपशूद्राधिकरणस्य अनुपपत्तेश्च । तस्माद्योगासम्भवस्थल एव लक्षणाकल्पनम् । न तु योगसम्भवस्थल इति चेन्न ।

नारायणशब्देऽपि योगेन जलशायित्वावच्छिन्नप्रतिपादनासम्भवात् । नारपदस्य जलपरत्वेऽप्ययनपदस्य अधिकरणपरत्वेऽपि जलशयित्वावच्छिन्न प्रतिपादनस्य बहुव्रीहिस्थले क्लृप्तान्यपदार्थलक्षणाधीनत्वात् । लक्षणाया आवश्यकत्वे योगप्रतिपादनस्य विफलत्वात् ।

नारायणशब्दस्य शिवपरत्वं न स्वाचार्यसम्मतम्

किंच भवदीयाः खलूक्तरीत्या प्रोद्वात्रधिकरणतात्पर्यं नानुमन्यन्ते। किन्तु योगाद्रूढिपूर्वकलक्षणायाः प्राबल्यमपि तदधिकरणसिद्धान्तं मन्यन्ते । आकाशादिशब्दानां ब्रह्मणि योगसम्भवेऽपि गौण्या लक्षणाया वा एतैः स्वीकारात् । शांकरभाष्ये आकाशाधिकरण पूर्वपक्षे

आकाशपदस्य गौण्या ब्रह्मपरत्वशंकनात्, सिद्धान्ते च तदनिराकरणात् तदभ्युपगमप्रतीतेः । स्पष्टं चैतदुक्तं वाचस्पत्ये तदधिकरणसिद्धान्तारम्भे,

"सामानाधिकरण्येन प्रश्न तत्प्रतिवाक्ययोः ।
पौर्वापर्य परामर्शात् प्रधानत्वेऽपि गौणते"ति ।

उपसंहारे च "नचाकाशशब्दो गौणोऽपि विलम्बितप्रतिपत्तिः । तत्र तत्र ब्रह्मण्याकाशशब्दस्य तत्पर्यायस्य च प्रयोगप्राचुर्यात् अत्यन्ताभ्यासेन गौणस्यापि मुख्यवत् प्रतिपत्तेरविलम्बनादि"ति ।

विशिष्टाद्वैतवादिनस्तादृशाभिप्राय परिज्ञानकुशला आकाशप्राणादिशब्दानां ब्रह्मणि योगमेवांगीचकुः । उक्तं च श्रीभाष्ये "सम्भवति च परस्य ब्रह्मणः प्रकाशकत्वादाकाशशब्दाभिधेयत्वम् । आकाशते आकाशयति चेती" ति । एवम् अजामन्त्रेऽपि न जायत इत्यजेति योग एवाश्रितः । न भवद्रीत्या छागत्वपरिकल्पनम् ।

नारायणशब्दस्य योगेन शिवपरत्ववर्णनं भवतीति सिद्धान्तविरुद्धम् । योगेनान्य पदार्थालाभेन असम्भावितं चेत्यास्तां तावत् ।

शिवस्य नारायण संज्ञत्वासंभवः

एतेन "कूर्मपुराणे शिवसहस्रनामादौ शिवे नारायणशब्दप्रयोगदर्शनात् शिवेऽपि नारायणसंज्ञत्वमेव सम्भवति । कोशादेरिव श्रुतिपुराणादेरपि शक्तिग्राहकत्वात् । अन्यथा आकाशादिपदानां ब्रह्मपरत्वा

सिद्धिरि''ति निरस्तम्। ''तस्योदिति नाम'' ''अथ नामधेयं सत्यस्य सत्यमिति'' इत्यादि श्रुतेः,

यस्मिन् प्रयुज्यमाने तु गुणयोगः सुपुष्कलः।
तत्रैव ब्रह्मशब्दोऽयं मुख्यवृत्तो महामुने।
न तु नारायणादीनां नाम्नामन्यत्र सम्भवः।
सर्वनाम्नां गतिर्विष्णुरेक एव प्रकार्तितः।
ऋते नारायणादीनि नामानि पुरुषोत्तमः।
प्रादादन्यत्र भगवान् राजेवर्ते स्वकं पुरम्॥

इत्यादि स्मृतेस्तादृश पुराणस्य शक्तिग्राहकत्वायोगात् आकाशादिपदानां ब्रह्मपरत्वासिद्धि प्रसंगादित्यस्य स्वपरसिद्धान्ताज्ञान मूलकत्वाच्च। मतद्वयेऽपि ब्रह्मणि रूढेरनंगीकारात्।

लक्षणया कारणवाक्यघटक नारायणशब्दस्य शिवपरत्वं तु तात्पर्यानुपपत्तिरूप बीजाभावान्न सम्भवतीत्यन्यत्र प्रपंचितम्।

विप्रतिपत्ति जन्यसंशयस्य विचारानङ्गत्वम्

यदपि **''विप्रतिपत्तिजन्य संशयस्य विचारांगत्वेन मध्यस्थेनादौ विप्रतिपत्तिः प्रदर्शनीये''ति,** अत्रोच्यते। संशयस्य विचारांगत्वं पक्षताविधयानुमितिजनकत्वेन, व्युदसनीयतया वा? नाद्यः। सिषाधयिषाविरह विशिष्ट सिद्ध्यभावस्यैव पक्षतात्वात्। संशयस्य तथात्वेऽपि संशयात्मक बोधानंगीकारेण विप्रतीपत्तिवाक्यस्य तज्जनकत्वायोगात्। न द्वितीयः। वादि प्रतिवादि मध्यस्थानां स्वस्वाभिमतार्थ निश्चय स्थले विजयादिकमुद्दिश्यैव विचारप्रवृत्त्या

संशयस्य व्युदसनीयत्वाभावात्। कथंचिदंगत्वेऽपि तत्संपादक वाक्यस्यैव नियमतः प्रयोक्तव्यत्वे बाधाभाव प्रत्यक्षसमग्र्यभावादि प्रतिपादक वाक्यानामप्यावश्यकत्वापत्तेः। अवयव प्रयोगवत् वादिना तत्प्रयोगसम्भवेन मध्यस्थेनेत्यस्य, अवयवानन्तरमपि तत्सम्भवेन आदावित्यस्य चानुपपत्तेश्च।

नारायणशब्द शिवपरत्वस्य निर्वचनानर्हत्वम्

यदपि **''तत्रेयं विप्रतिपत्तिः। नारायणशब्दः शिवपरो न वेति। विधिकोटिः सामानाधिकरण्येन। निषेधकोटिरवच्छेदकावच्छेदेन। तत्र विधिकोटिरद्वैत-वादिनां शैवानां च।**

न चाद्वैतिनां शिव जगत्कारणता बाधिता। तन्मते शुद्धाद्वितीय ब्रह्मण एव जगत्कारणत्वप्रतिपादनादिति वाच्यम्।

तामष्टादशधा दृष्ट्वा शंकरः सूतसंहिताम्।
चक्रे शारीरकं भाष्यं सर्वश्रुतिमनोहरम्।

इत्यभियुक्तोक्त्या निखिलाद्वैत ग्रन्थमूल शारीरकमीमां-सामूलत्वस्य सूतसंहितायां प्रसिद्धत्वात् तत्र शिवस्य जगत्कारणत्व प्रतिपादनादि''ति, अत्रोच्यते।

शिवपरत्वं हि किं शिवप्रतीतीच्छयोच्चरितत्वं वा? शिवप्रतीति जनकत्वप्रकारकेच्छाविशेष्यत्वं वा? शिववाचकत्वं वा? अव्यवहि-

तोत्तरत्वसम्बन्धावच्छिन्न नत्वावच्छिन्नावच्छेदकतामारभ्य णत्वावच्छिन्नावच्छेदकतापर्यन्तं गत्वा तादृशावच्छेदकतानिरूपक शिववाचकतारूप विशिष्टानुपूर्व्यवच्छिन्न शक्तिमत्त्वं वा? शक्तिभ्रमलक्षणाग्रहानधीन शिवविषयत्वावच्छिन्न तादृश शाब्दबोधनिष्ठ जन्यतानिरूपित जनकतावच्छेदक विषयताश्रयत्वं वा? जलशायित्वावच्छिन्न शिवविषयत्वावच्छिन्न तादृशशाब्दबोधनिष्ठ जन्यतानिरूपित जनकतावच्छेदक विषयताश्रयत्वं वा?

नाद्यद्वितीयौ । शिवबोधेच्छया शैवेनोच्चारिते नारायणशब्दे तयोः शैवेतरैरप्यंगीकाराद् विधौ सिद्धसाधनस्य निषेधे बाधस्य च प्रसंगात् । न तृतीयः । नारायणशब्दस्याधिकरणसामान्य वाचकायनपद घटितस्य शिवरूपाधिकरण वाचित्वस्य सर्वसिद्धत्वेन सिद्धसाधन बाधयोः प्रसंगात् । न चतुर्थः । योगशक्त्यंगीकर्तृणां भवतां मते समुदायस्य वाचकत्वानुपगमेन विधौ बाधात् । न पंचमः । नारायणाद्रुद्रो जायत इत्यादि श्रुतिजन्यबोध जनकतावच्छेदक विषयतामादाय सिद्धसाधनबाधयोः प्रसंगात् । न षष्ठः । पर्याय पदान्तरजन्य बोधे व्यभिचारवारणायाव्यवहितोत्तरत्वस्य जन्यतावच्छेदकत्वे विषयतायाः प्रयोजनविरहेणानिवेशेन विधौ बाधप्रसंगात् ।

विधिकोटिः सामानाधिकरण्येन, निषेधकोटिरवच्छेदकावच्छेदेनेत्यप्ययुक्तम् । नराणां समूहो नारं जीवसमुदायः । तस्यायः शुभावहः विधिः मोक्षसाधनीभूत भक्तिप्रपत्त्यन्यतरात्मकः तस्य णः कण्टकभूतः । स्वसेवाद्वारा मोक्षसाधनीभूत भक्त्यादि प्रतिबन्धक इति यावत् ।

ण शब्दस्तु पुमान् जारे भैरवे कण्टके ध्वनौ ।

इति नानार्थकोशात् । शिवस्य परिमित फलदानद्वारा मोक्षादि प्रतिबन्धकत्वं च,

ब्रह्माणं शितिकण्ठं च याश्चान्या देवताः स्मृताः ।
प्रतिबुद्धा न सेवन्ते यस्मात् परिमितं फलम् ।।

इति वचनसिद्धम् । तथाचोक्तरूपेण शिवबोधेच्छयोच्चरितस्य, लक्षणया शिवबोधेच्छयोच्चरितस्य च नारायण शब्दस्य शिवपरताया वैष्णवानुमतत्वात् सिद्धसाधन बाधयोः प्रसंगात् ।

न चेत्यादिकमपि न युक्तम् । अंशविशेषे तत्तत् पुराणविरुद्धार्थके व्याकरणसमानार्थकत्वाभाववति च महाभारते,

अष्टादशपुराणानि अष्ट व्याकरणानि च ।
दृष्ट्वा सत्यवतीसूनुश्चक्रे भारतसंहिताम् ।

इत्याद्युक्तिवत् भाष्यस्य सूतसंहितासमानार्थकत्वाभावेऽपि तामष्टादशधा दृष्ट्वेत्यादेरुपपत्तेः तद्वचनस्य तत्समानार्थकत्वासाधकत्वात् । समानार्थकत्व साधकत्वेऽपि शिवजगत्कारणत्वातिरिक्तांशे तत्समानार्थकत्वमादायोपपत्तेः । भाष्यस्य पत्युरसामंजस्यादित्यधिकरण पूर्वपक्षांशे शिवजगत्कारणत्वप्रतिपादकतया तदंशे तत्समानार्थकत्वस्यापि सम्भवात् ।

यदप्युक्तं **अत्र विधिकोटिवादिनां प्रयोगः "नारायणशब्दः शिवपरः शिववृत्तिधर्मावच्छिन्नप्रतिपादकत्वात् यथा शिवशब्द"** इतीति, तन्न। शिवपरत्वस्य पूर्वोक्तरीत्या षड्विधस्याप्यसम्भवात्। प्रथमद्वितीययोः साध्यत्वे घटादि बोधेच्छयोच्चरिते शिवपदे व्यभिचारात्। चतुर्थषष्ठयोः साध्यत्वे दृष्टान्ते साध्यवैकल्यात्। पक्षे हेतोरसिद्धेश्च। जलशायित्वस्य शिवेऽप्रसिद्धत्वात्। प्रसिद्धावपि नारायणशब्दस्य शिवगत जलशायित्वाप्रतिपादकत्वात्। "आपो नारा इति प्रोक्ता" इति मनुवचने "ता यदस्यायनं प्रोक्तमि"तीदंशब्देन "ततः स्वयंभूर्भगवानि"ति पूर्वनिर्दिष्टस्यैव परामर्शेन तद्गतजलशायित्व प्रतिपादकत्वेऽप्यन्यगत तत्प्रतिपादकत्वायोगात्।

शिवे जलशायित्वमप्रसिद्धम्

यत्तु,

लिंगमूर्तिं महाज्वालामालासंवृतमव्ययम्।
लिंगस्य मध्ये रुचिरं चन्द्रशेखरविग्रहम्।
व्योममार्गे तथा लिंगे ब्रह्माणं हंसरूपिणम्।
विष्णुं वराहरूपेण लिंगस्याधस्त्वधोमुखम्।
ब्रह्माणं दक्षिणे तस्य कृतांजलिपुटं स्थितम्।
वामे विष्णुं महाबाहुं कृतांजलिपुटं तथा।
मध्ये लिंगं महाघोरं महाब्धेरम्भसि स्थितम्।

इत्यादि शिवपुराण वचनोपबृंहितेन यमन्तः समुद्रे कवयोऽवयन्तीति महोपनिषन्मन्त्रेण शिव जलशायित्वं

सिद्ध्यतीति, तन्न। तामस शैवपुराणगतस्यास्य वचनस्य सात्विकपुराणविरुद्ध शिवगतविष्णुसेव्यत्वादि प्रतिपादकतया अप्रामाणिकत्वात्। प्रामाणिकत्वेऽपि "महाब्धेरम्भसि स्थितं ध्यायन् प्रदोषसमये शिवसायुज्यमाप्नुयादि"ति ध्यानाकार समर्पण परत्वात्। ध्यानस्य च भ्रमत्वेऽप्युपपत्त्या विषयसद्भावासाधकत्वात्। वस्तुतोऽस्य वचनस्य लिंगमूर्तेरूर्ध्वाधोदेशयोरपरिच्छेद प्रतिपादनपरतया समुद्रजल वृत्तित्वाप्रतिपादकत्वात्। स एवाधस्तादित्यादेरिव महाब्धेरम्भसि स्थितमित्यस्य सम्बन्धमात्रप्रतिपादकत्वात् जलाधिकरणकशयनकर्तृत्वरूप जलशायित्व प्रतिपादनपरतया एतद्वचनोपपादनस्यात्यन्तमनुचितत्वाच्च।

यत्तूक्तं **"निषेधकोटिवादिनः— नारायणशब्दस्य केवल यौगिकत्वपक्षे णत्वं न सम्भवतीत्युक्तहेतुः स्वरूपासिद्धः। तथाहि। अत्र पूर्वपदात् संज्ञायामग इत्यनेनैव णत्वं वक्तव्यम्। तच्च न सम्भवति। नारायणशब्दस्य शिवपरत्वे संज्ञात्वाभावात्। सूत्रार्थस्तु– पूर्वपदस्थान्निमित्तात् परस्य नस्य णत्वं स्यात् संज्ञायामिति। उदाहरणं तु द्रुणसः खरणस इत्यादि। तत्र द्रुरिव नासा यस्य, खरस्येव नासा यस्येति विग्रहे पूर्वपदस्थाद्रेफात् परस्य नस्य णत्वं भवति संज्ञात्वे। इतरथा तु द्रुनसः खरनस इत्येव स्यात्। एवं च प्रकृते पूर्वनारपदस्थात् रेफात् परस्य उत्तरायनपदस्थस्य नस्य णत्वं न भवति। तथाचोक्तहेतुरसिद्ध इति। तस्मान्नारायणशब्दो न शिवपरः। शिवविषयक**

शाब्दबोध जनकीभूताकांक्षा शून्यत्वात्। यो यद्विषयक शाब्दबोधजनकीभूताकांक्षाशून्यः स न तत्परः। यथा घटविषयक शाब्दबोधजनकाकांक्षाशून्यः पटशब्दो न घटपरः इति। शिवविषयक शाब्दबोधजनकाकांक्षा णकारघटितैव। तच्छून्यत्वस्य पक्षे सत्वाद्धेतुसत्वोपपत्तिरि''ति श्रीवैष्णवादीनां मतमुपन्यस्तम्। तदिदं तन्मताज्ञानविजृम्भितम्। तथाहि।

वैष्णवादयो हि शिवे जलशायित्वस्याप्रसिद्धत्वात्, प्रसिद्धावपि नारायाणशब्दस्य शिवगत जलशायित्वाप्रतिपादकत्वात् स्वरूपासिद्ध्यादिकं पूर्वोक्तव्यभिचारादिकं च वदन्ति, न तु भवदुक्तरीत्या। नारायणशब्दस्य यौगिकत्वपक्षे णत्वासम्भवेऽपि जलशायित्वावच्छिन्न प्रतिपादकत्वानपायात्। णकार घटितस्येव नकारघटितस्यापि अयनशब्दस्याधिकरण वाचित्वात्। अन्यथा भगवति योगार्थबोधानुपपत्त्या जलशायित्वप्रकारक बोधौपयिकाकांक्षात्वस्य नकारघटितानुपूर्व्यामपि कल्पनीयत्वात्। प्रकारभेदेनाकांक्षाया भेदेऽपि विशेष्यभेदेन तद्भेदायोगेन जलशायित्वेन भगवद्बोधे अन्याकांक्षा शिवबोधे चान्याकांक्षेति कल्पनाऽयोगात्।

''पूर्वपदात् संज्ञायामि''त्यत्रासंज्ञास्थले णकारघटितानुपूर्व्या असाधुत्वस्यैव ज्ञापनात् साधुत्वासाधुत्वयोश्च पुण्यपापजनकत्वरूपत्वात् ''एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग् भवती''ति श्रुत्या सुशब्दस्य पुण्यजनकतायाः, ''न म्लेच्छित वै नापभाषित वै म्लेच्छो वा एष यदपशब्द'' इत्यपशब्दस्य

पापजनकतायाश्च सिद्धत्वात्। पुण्यादि जनकतावच्छेदकं च यदि सुशब्दत्वादिकमनुगतं तदा तदेव। नो चेत् तत्तच्छब्दत्वादिकमित्यन्यदेतत्।

द्रुरिव नासा यस्येति विग्रहवर्णनमयुक्तम्। ''अञ्नासिकायाः संज्ञायां नसं चास्थूलात्'' इत्यनेन नासिकाशब्दस्यैव नसादेशविधानेन द्रुरिव नासिकेति विग्रहप्रदर्शनस्य युक्तत्वात्।

एतेन **इतरथा द्रुनसः खरनस इत्येव स्यादि**ति निरस्तम्। उक्तसूत्रेण संज्ञायामेव नसादेश विधानेन असंज्ञायां द्रुनासिक इत्येव रूपसिद्धेः।

तथाचोक्तरीत्या विप्रतिपत्तिप्रदर्शनपूर्वकं विचारप्रवृत्तिवर्णनमयुक्तम्।

वस्तुतस्तु योगप्रयोज्य जलशायित्वप्रकारक बोधेच्छयोच्चरितो नारायणशब्दः साधुर्न वेति, तदर्थं तद्घटक णकारः शास्त्रविहितो न वेति, तदर्थं तादृश णकारो णत्वविधायक शास्त्रोद्देश्यतावच्छेदकाक्रान्तस्थानिको न वेति संशये, ''पूर्वपदात् संज्ञायामग'' इति शास्त्रोद्देश्यतावच्छेदकस्य संज्ञाघटितत्वेन तदाक्रान्तत्वस्य केवलयौगिक नारायणशब्दघटक नकारेऽसम्भवेऽपि ''अट्कुप्वाङ्नुम् व्यवायेऽपी''ति शास्त्रोद्देश्यतावच्छेदकाक्रान्तत्वसम्भवात् तादृशोद्देश्यतावच्छेदकघटक पदत्वस्य समाससाधारणस्य निवेशनसम्भवात् तादृश णकारस्य शास्त्रविहितत्वेन तद्घटित नारायणशब्दस्य साधुत्वं सम्भवतीति पूर्वपक्षस्य, तादृशपदत्वस्य निवेशनेऽतिप्रसंगात्

समासव्यावृत्तमेव पदत्वं निवेश्यं, तथा च तादृश शास्त्रोद्देश्यतावच्छेदकाक्रान्तस्थानिकत्वस्याभावेन तादृश णकारस्य शास्त्रविहितत्वासम्भवात् तद्घटित नारायणशब्दस्य साधुत्वं न सम्भवतीति रीत्या सिद्धान्तस्य च प्रवर्तनेन विचारो बोध्यः ।

उत्तरपदत्वे प्रत्यय लक्षणप्रतिषेधः

अत्र शैवमतानुयायिनः । ''पूर्वपदात् संज्ञायामि''त्यनेन नारायणशब्दे णत्वासम्भवेऽपि ''अट्कुप्वाङ् नुम् व्यवायेऽपी''त्यनेनैव णत्वं सम्भवति । सूत्रार्थस्तु अट् कवर्ग पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णत्वं स्यात् समानपद इति । उदाहरणं रामेणेत्यादि । तथाच प्रकृतेऽप्यडादिभिन्नेन व्यवधानाभावात् सामासिक समानपदत्वस्यापि सम्भवात् नकारस्य णत्वं निराबाधं सिद्ध्यति । नच समाससाधारण समानपदत्वमत्र विवक्षितुमशक्यम् । गन्धर्वगानं रामनामेत्यादावतिप्रसंगात् । पदस्यैकत्वविवक्षयैव तल्लाभसम्भवात् समानग्रहणव्यैय-र्थ्याच्च । तस्मान्निमित्तानधिकरण निमित्तिमत् पदाघटितत्वरूपं समानपदत्वमेव विवक्षणीयम् । तथाच प्रकृते निमित्तरेफानधिकरण नकाररूपनिमित्तिमदयनपदघटितत्वात् यौगिकत्वपक्षे णत्वं नैव सम्भवतीति वाच्यम् । उक्तपारिभाषिक समानपदताविवक्षणेऽपि उक्तस्थले नकारस्य णत्वसम्भवात् । उत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षण

प्रतिषेधादयनेत्यस्यान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वायोगात् विवक्षित समानपदत्व सम्भवात् । वार्तिकार्थस्तु उत्तरपदस्य पदत्वप्रयुक्तकार्ये प्रत्ययलक्षणप्रतिषेध इति । प्रकृते चायनेत्यस्य पदत्वप्रयुक्तणत्वे कर्तव्ये प्रत्ययलक्षण प्रतिषेधेन तस्य पदत्वाभावात् ।''

अत्रोच्यते । नात्र प्रत्ययलक्षण प्रतिषेधः सम्भवति । उत्तरपदस्य पदत्वप्रयुक्त कार्याभावात् । प्रत्युतोत्तरपदस्य पदत्वाभाव एव णत्वविधेः प्रवृत्त्या तस्य पदत्वाभावेनैव प्रयुक्तत्वात् । अपदादि-विधावित्यस्य पदान्तविधावित्यर्थात् णत्वविधेः पदान्तविधित्वाभावेन प्रत्ययलक्षणप्रतिषेधायोगाच्च । नारायणशब्दे नकारस्य पदमध्यत्वेन पदान्तविधित्वाभावेन प्रत्ययलक्षणसत्वात् निरुक्तसमानपदत्वाभावेन णत्वासम्भवात् । अपदादिविधावित्यस्योक्तार्थश्च ग्रन्थकृतामपि सम्मतः । तत्रतत्र पदान्तविधावेव प्रत्ययलक्षणप्रतिषेध इत्युक्तत्वात्।

यत्तु **''पदान्तविधावेवेति ग्रन्थेषु एवकारेण पदादिविधेरेव व्यवच्छेदः क्रियते । न पदमध्यविधेरपि । वार्तिकस्वारस्यानु-रोधात् । चक्षुषैव रूपं गृह्यत इत्यादौ एवकारेण त्वच एव व्यवच्छेददर्शनात् । अन्यथा मनसापि रूपस्य ग्रहणात् तद्वाक्यस्य बाधितत्वापत्तेरि''**ति तन्न । उक्तवाक्ये गृह्यत इत्याख्यातस्य लौकिकविषयतार्थकत्वेन तत्र चक्षुर्भिन्नत्वगिन्द्रिया-प्रयोज्यत्वस्य एवकारार्थत्वे एवकारस्य लाक्षणिकत्वापत्तेः । एवकारस्य सामान्यतः समभिव्याहृत पदार्थतावच्छेदकावच्छिन्नान्यसम्बन्धाभावे

शक्तेः। अन्यथा पृथिव्यामेव गन्ध इतिवत् पृथिव्यामेव रस इत्यापत्तेः। पृथिव्यन्य तेजआदिवृत्तित्वाभावस्य रसेऽबाधात्।

यदपि "**पदान्तविधावेव प्रत्ययलक्षणप्रतिषेध इत्यस्य वार्तिककृतामभिप्रेतत्वे उत्तरपदत्वे च पदान्तविधौ प्रत्ययलक्षणप्रतिषेध इत्येव तैरुच्येत। अपदादिविधाविति वक्राभिधानबलात् पदमध्यविधावपि प्रत्ययलक्षणप्रतिषेधोऽस्तीत्याशय उन्नीयत**"इति, तदपि न। पदान्तविधावित्युक्ते पदान्तविधौ प्रतिषेध इत्यर्थलाभेऽपि पदादिविधौ न भवतीत्यर्थालाभात् तल्लाभायैवकारघटनाया आवश्यकत्वात् तद्घटित पदान्तविधिशब्द-लभ्यार्थस्यैव अपदादिविधावित्यनेनोक्तेः। अपदादिविधावित्येतद्घटक पदादिशब्देन तत्पदघटक वर्णध्वंसासमानकालीनत्वे सति तत्पदघटक वर्णप्रागभाव समानकालीनत्वरूपस्य मध्यव्यावृत्तस्य परमादित्वस्या-विवक्षणात् सत्यन्ताघटितस्य मध्य साधारणस्य विशेष्यदलमात्ररूपस्य तस्य विवक्षणात् अपदादिविधावित्यनेन पदान्तविधावित्यर्थलाभात्। "अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्" "द्युभ्वाद्यायतनं स्वशब्दात्" इत्यादि सूत्रेषु मध्यस्याप्यादिशब्देन ग्रहणेन तस्याप्यादिशब्दार्थत्वात्।

किंच रामेणेत्यादाविनेत्यस्य निमित्तानधिकरणनिमित्तिमत्त्वेन तद्घटितत्वात् णत्वानुपपत्तिवारणायोपात्तं पदत्वं न सुप्तिङन्तत्व-रूपम्। तथा सति गन्धर्वगानमित्यादौ "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्ते"रिति परिभाषया कृदन्तेन समासे

णत्वापत्तेः। किन्तु पाणिन्यादि संकेताप्रयोज्य बोध जनकतावच्छेदकीभूत विभक्तीतराव्यवधानाघटिताकांक्षावत्व रूपम्। तथाचेनेत्यस्य विभक्तीतरप्रातिपदिकाव्यवधान घटिताकांक्षावत्वेऽपि तदघटिताकांक्षावत्वविरहात् व्यावृत्तिः। "टाङसिङसामिनात्स्याः" इति सूत्रजन्यबोधजनकतावच्छेदकाकांक्षाशालित्वात् तद्दोष तादवस्थ्य वारणायाप्रयोज्यान्तम्। तथाचायनेत्यत्र प्रत्ययलक्षणप्रतिषेधेऽपि निमित्तानधिकरणनिमित्तिमत्त्वे सति निरुक्त पदत्ववत्त्वात् णत्वानुपपत्तिर्दुर्वारा।

अथवा पदत्वमत्र पदत्वयोग्यत्वं धातुप्रातिपदिकान्यतरत्वरूपं विवक्षितमित्ययनेत्यस्य तादृशपदत्वात् णत्वं दुर्घटमिति।

णत्वविधायकसूत्रार्थः

वस्तुतस्तु स्वोत्तरत्व- स्वोत्तराडादिभिन्नोत्तरत्वसम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताक प्रतियोगिताक भेदवत्व - स्वोत्तरसुबुत्तरत्व सम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताक प्रतियोगिताक भेदवत्त्वैतत् त्रितय सम्बन्धेन रेफषकारान्यतर विशिष्टस्य नकारस्य स्थाने णकारो भवतीति "अट्कुप्वाङ्नुम्व्यवायेऽपी"ति सूत्रार्थः। उत्तरसूत्रस्य रषाभ्यां नोणः समानपदे इत्यनेनैकवाक्यतापन्नत्वात्। तस्मादित्युत्त-रस्येति परिभाषासहकृतेन रषाभ्यामित्यनेन रषाभ्यां परस्येत्यर्थलाभात् प्रथमसम्बन्धस्य फलितत्वात्। तल्लाभश्च यथामतं शब्दाध्याहारेणार्था-ध्याहारेण वेत्यन्यत्। यद्यप्युक्त परिभाषासहकृतेन रषाभ्यामित्यनेन स्वोत्तरवर्णानुत्तरत्व विशिष्ट स्वोत्तरत्व रूपाव्यवहितोत्तरत्वमेव

लभ्यते। तादृशपरिभाषाघटकोत्तर पदस्याव्यवहितोत्तरार्थकत्वात्। तथाप्यट्कुप्वाङ्नुम्व्यवायेऽपीत्यनेन तादृशाव्यवहितत्वघटक वर्णेष्वडादिभिन्नत्वलाभात् ''अट्कुप्वाङ्नुम्व्यवायेऽपि रषाभ्यां परस्ये'' त्येतावता प्रथमद्वितीय सम्बन्धयोर्लाभः। तृतीयस्य च समानपद इत्यनेन लाभ इति बोध्यम्। षष्ठी स्थान इत्यनेन च स्थान इत्यस्य लाभः। स्थानं चाव्यवहितपूर्वत्वाव्यवहितोत्तरत्वान्यत-रसम्बन्धेन तद्वर्णविशिष्टो वर्णः। तथाचैतत्त्रितय सम्बन्धेन रेफषकारान्यतरविशिष्टो यो नकारः उक्तान्यतरसम्बन्धेन तद्विशिष्टो वर्णः उक्तान्यरसम्बन्धेन णकारवान् भवतीत्यर्थः। एतेन स्थानपदस्य देशपरत्वं कालपरत्वं वेत्यादि विकल्पानवकाशः। अत्र नर इत्यादिवारणाय प्रथमसम्बन्धः। रामेणेत्यस्य संग्रहायादर्शेनेत्यस्य वारणाय च द्वितीयः। रामनामेत्यादिवारणाय तृतीयः।

तृतीय सम्बन्धघटकं स्वोत्तरत्वं स्वोत्तरत्वेन ज्ञायमानत्वं लुप्तसाधारणम्। तथाच नारायणपदघटकायनपदे प्रत्ययलक्षणप्रति-षेधेऽपि णत्वासम्भवस्तदवस्थः।

यद्वा स्वाघटित पद घटकत्व सम्बन्धावच्छिन्न स्वनिष्ठा-वच्छेदकताक प्रतियोगिताक भेदवत्वमेव तृतीयसम्बन्धः। तेन लुप्तविभक्त्यनुसन्धान विरहेऽपि न क्षतिः।

निमित्तानधिकरण निमित्तिमत्पदाघटितत्वमित्यस्यापि निरुक्त-तृतीयसम्बन्ध एव तात्पर्यम्। यथाश्रुतं तु न युक्तम्। ''रामनारी'' -त्यादौ णत्वापत्तेः। फलोपधायकतारूप निमित्तताविवक्षणेऽपि

रामनारीणामित्यादौ तदापत्तेः। फलोपधायकतानिवेशेऽन्योन्याश्रयाच्च। नारीशब्दघटकस्य रेफस्य फलोपधायकत्वाभावे णकाराभावः। णकाराभावे च तदभाव इति।

गन्धर्वगानमित्यादौ अतिप्रसंगवारणाय तेषां क्षुभ्नादिगणे पाठकल्पनमत्यन्तानुचितम्। क्षुभ्नादौ निषेधशास्त्रस्य अट्कुप्वाङ्नुम् व्यवायेऽपीत्यनेनैकवाक्यत्वात् उक्त तृतीयसम्बन्धेन रेफषकारान्यतर-विशिष्टस्य क्षुभ्नादिगणप्रविष्ट पदघटक भिन्नस्य नकारस्य णत्वं भवतीत्यर्थ पर्यवसानात् तत्र क्षुभ्नादिगणघटक भिन्नत्वस्य तादृश-गणत्वाश्रय भिन्नत्वरूपत्वात् तादृशगणत्वस्य च तत्तत्पदविषयक ज्ञानविषयत्व रूपत्वात् तत्र च ज्ञाने तत्पदविषयकत्व विशिष्टैतत्पदविषयकत्व विशिष्टापरपदविषयकत्वमिति रीत्या निवेशस्यावश्यकतया विशेषणविशेष्यभावे विनिगमनाविरहेण तत्तदवच्छिन्न भेदानां निवेशापत्तेः तत्तत्पदानि विशिष्योपादाय तत्तद्व्यक्तित्वावच्छिन्न भेदनिवेशस्यैवोचितत्वेन तत्र क्षुभ्नादिगणे रामनाम गन्धर्वगानादि शब्दानामनन्तानां पाठकल्पने अनन्त तत्तद्व्यक्तित्वावच्छिन्न भेदानां निवेशापत्त्या महागौरवात्।

किंचैवं ''रषाभ्यां नो णः पदव्यवायेऽपी''त्येकसूत्रकरणेनैव णत्व सामान्योपपत्त्या ''अट्कुप्वाङ्नुम् व्यवायेपि'' ''पूर्वपदात् संज्ञायाम्'' इत्यादीनि णत्वविधिनिषेधशास्त्राणि प्रायेण विद्रुतानि स्युः। रामेणेत्यादौ द्रुणस इत्यादौ च णत्वोपपत्तेरुक्तन्यायेनैव सम्भवात्। आदर्शेनेत्यादेः क्षुभ्नादौ पाठकल्पनयैव णत्ववारणसम्भवात्।

असंज्ञायां द्रुनस इत्यादि पाठस्य क्षुभ्नादौ कल्पनेनैव केवलयोगार्थपर द्रुणस इत्यादेर्वारणसम्भवात् ।

यदप्यस्मदुक्तरीत्या णत्वोपपत्तिमनंगीकृत्य गन्धर्वगानादेः क्षुभ्नादिगणपाठमकल्पयित्वा नारायणशब्दे णत्ववारणे प्रश्नोपनिषदि यथा नद्यः स्यन्दमानाः समुद्रायाणाः समुद्रं प्राप्येति, षोडशकलाः पुरुषायणाः पुरुषं प्राप्येति च समाम्नातयोः समुद्रायण पुरुषायण शब्दयोर्णकार-घटितत्वानुपपत्तिः सर्वथैव वारयितुमशक्येत्युक्तं, तदप्ययुक्तम् । भवद्रीत्या समुद्रायण पुरुषायणशब्दयोः साधुत्वे तयोर्लोकेऽपि प्रयोगापत्तेः छन्दसि दृष्टानुविधिरित्यनेनैव तत्साधनस्य युक्तत्वात् । तयोर्लोकेऽपि प्रयोगस्येष्टत्वे च पृषोदरादि गणपाठ कल्पनोपपत्ति सम्भवेन निरर्थक युक्तिप्रयासस्यानुचितत्वात् ।

नारायण शब्दस्य केवलयौगिकत्वासंभवः

यदपि **न विद्यते राः यस्य सः अराः दरिद्रः । स न भवतीति नाराः श्रीमान् । स चासौ अश्व नारायः । ''नारै'' इति प्रातिपदिकस्यैकारस्य आयादेशविधानात् । श्रीमान् विष्णु-रित्यर्थः । तस्य णः सुखं यस्मात् स नारायण इति व्युत्पत्त्या श्रीमद्विष्णुसम्बन्धि सुखजनकत्वरूप शिववृत्तिधर्मावच्छिन्न प्रतिपादकत्वं नारायणशब्दस्य निराबाधमिति,** तदपि न । नाराय शब्देन विष्णोर्लाभेऽपि सम्बन्धिलाभस्य नाराय शब्दलक्षणाधीनत्वात् । णशब्देन सुखस्य बोधेऽपि तज्जनकबोधस्य बहुव्रीहिस्थलीयान्य-

पदार्थलक्षणाधीनत्वात् नारायणशब्दस्य शिवे शक्त्यसिद्धेः । नारा इत्यस्याल्पधनस्वामि साधारण धनसामान्याभाववद्भेदबोधकत्वेऽपि श्रीमत्त्वाबोधकत्वात् । एककाचवत्त्वेऽपि धनसामान्याभाववद्भेद सत्वात् । असूरिर्नभवतीत्यनसूरिरितिवत् अराः न भवतीत्यनरा इत्यस्य साधुत्वेऽपि नारा इत्यस्यासाधुत्वात् । सर्वस्यापि विष्णुशरीरतया विष्णुसम्बन्धिसुखजनकत्वेऽपि शिवस्य तेन रूपेण विशिष्य ग्रहणायोगाच्च ।

शिवेन विष्णोश्चक्रदानरहस्यम्

यदपि **''स्वनेत्रसहित सहस्रकमलसपर्यया परितोषितेन शिवेन विष्णोश्चक्रदानादि प्रतिपादक बहुतरपुराणवचनेभ्यो विष्णुसम्बन्धिसुख जनकत्वमसाधारण्येन सिद्ध्यती''**ति, तन्न । विष्णुना क्रियमाणायाः शिवपूजायाः तद्दत्तचक्रादि स्वीकरणस्य च स्वदत्तवरप्रतिपालनार्थत्वेन तेन शिवसुखजनकत्वस्य विष्णौ सिद्धावपि विष्णुसुखजनकत्वस्य शिवेऽसिद्धेः । तथाच वाराहे पंचसप्ततितमेऽध्याये भगवन्तं प्रति रुद्रः—

एवमुक्ते पुनर्वाक्यमुवाचोमापतिर्मुदा ।
अन्यं देहि वरं देव प्रसिद्धं सर्वजन्तुषु ।
मर्त्यो भूत्वा भवान् देव, मामाराधय केशव ।
मां वहस्व च देवेश वरं मत्तो गृहाण च ।
येनाहं सर्वभूतानां पूज्यात् पूज्यतमोऽभवम् ।

श्रीभगवानुवाच -

देवकार्यावतारेषु मानुषत्वमुपागतः ।
त्वामेवाराधयिष्यामि त्वमेव वरदो भव ।
यत् त्वयोक्तं वहस्वेति देवदेव उमापते ।
सोऽहं वहामि त्वां देव मेघो भूत्वा शतं समाः ।
मदंशो द्वादशो यस्तु विष्णुनामा हि भूतले ।
अवतीर्णो भवन्तं तु आराधयति शंकरेति ।

एतेन "**नराणां नरस्य वा सम्बन्धिनी नारे । अयश्च णं च अयणे । नारे अयणे यस्मादिति व्युत्पत्त्या नारायणशब्देन नरसम्बन्धि शुभावहविधिज्ञानैतदुभय जनकत्वविशिष्टशिवस्य बोधः । अयशब्दस्य शुभावह विधिवाचित्वं णकारस्य ज्ञानवाचित्वं चामरनानार्थरत्नमालादौ सिद्धमि**"ति निरस्तम् । नरसम्बन्धि शुभावहविधिज्ञानोभय बोधस्य शक्त्या सम्भवेऽपि तज्जनक बोधस्यान्यपदार्थ लक्षणाधीनत्वात् । अल्पाच्तरस्य णशब्दस्य पूर्व-निपातापत्तेश्च । वस्तुतस्तु नराज्जातानि तत्त्वानीत्युपबृंहणसहकृतया,

यच्च किंचिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः ।।

इति श्रुत्या प्रतिपन्नो नारायणशब्दयोगार्थ एव रुद्रे निषिध्यते, न त्वन्यादृशः कुसृष्टिकल्पित इत्यलं पल्लवितेन ।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितं नवकोटिविभंजनम् ।।

।। इति श्री णत्वतत्व विनिर्णयं संपूर्णम् ।।

परिशिष्टम् - १

नवकोटि विभेदिन्याः टिप्पण्यः

-के. हयवदन पुराणिकः

यं विष्णुमिति ।

यमन्तः समुद्रे कवयोऽवयन्ति हति महानारायणोनिषद् वचनार्थः ।

अग्रेऽस्येति ।

वासुदेवो वा इदमग्र आसीत् न ब्रह्मा न च शंकरः ।

एको नारायण आसीन्न ब्रह्मा न च शंकरः इत्यादि श्रुत्यर्थ संग्रहः ।

लिंगमूर्तिरिति ।

उत्तरत्र "लिंगमूर्तिं महाज्वालामालासंवृतमव्ययम्" इत्यादि शिवपुराणवाक्योदाहरणेन लिंगमूर्तेः शिवस्य प्रलयजलशायित्वमुच्यते नवकोटिग्रन्थे । एतच्च "नच शंकरः" इति श्रुतिविरोधादप्रमाणमिति सूच्यते ।

अबुधैः कूर्मादिवाक्यैर्मित इति ।

कूर्मपुराणादि वाक्यान्यापाततः शिवपारम्यवादीनि दृश्यन्ते । यथा कूर्मपुराणे श्रीकृष्णवचनम्

भूतानां ब्राह्मणा देवा ब्राह्मणानां तु देवताः ।
देवानामप्यहं देवो मम देवो महेश्वरः ।। इति ।

लिंगपुराणे श्रीकृष्णवचनम्-

सत्यं सत्यं च सत्यं च न देवः शंकरात् परः ।
नान्ये मुक्तिप्रदा देवाः कल्पकोटिशतैरपि ।। इति ।

अबुधैरित्यनेनेदं सूचितं यत् वस्तुतो न कूर्मलिंगपुराणादि-वाक्यान्यपि शिवपारम्यपराणि । अबुधैस्त्वापाततस्तथा गृहीतानीति । यतः कौर्मे उपक्रम इदमुच्यते -

नमस्कृत्य जगद्योनिं कूर्मरूपधरं हरिम् । इति ।

उपसंहारेऽपि जगज्जन्मादिकारणं विष्णुरेवेत्युच्यते -

यस्मात् संजायते कृत्स्नं यत्र चैव प्रलीयते ।
नमस्तस्मै सुरेशाय विष्णवे कूर्मरूपिणे ।। इति ।

एवं च संदंशन्यायेन मध्यपतितानि वाक्यानि न शिवकारणत्व-पराणि । कौर्मे महेश्वर इति, ईश्वर इति चोक्तो विष्णुरेव, ईशनशीलत्वात् ।

न हि विष्णुः प्रणमति कस्मैचिद् विबुधाय तु ।

इति नियमात् ''मम देवो महेश्वर'' इति वचनं विष्णोः स्वात्मपूजाभिप्रायम् । विष्णुर्ह्यज्ञजनमोहाय शिवाद्यन्तर्यामि स्वात्मरूपं स्वयं पूजयति । तेन तथा पूजयामीति स्वेन शिवाय दत्तं वरं सफलयति ।

लिंगपुराणवचनमपि ''मुक्तानां परमा गतिः'' इति विष्णु सहस्रनाम विरोधात् शंकरापरनामकस्य विष्णोरेव मुक्तिदायकत्वमाह ।

एतेनैतदपि प्रत्युक्तम् - कौर्मे नारायणाश्रमवासिनां मुनीनां पुरतो शिवगीतोपदेशायाविर्भवति शिवे नारायणेनोक्तम्-

यदि प्रसन्नो भगवान् मुनीनां भावितात्मनाम् ।
सन्निधौ मम तज्ज्ञानं दिव्यं वक्तुमिहार्हसि ।
त्वं हि वेद महात्मानं न ह्यन्यो विद्यते शिव ।
ततस्त्वमात्मनात्मानं मुनीन्द्रेभ्यः प्रदर्शय ।। इति ।।

एवमुक्त्वा मुनीनप्यादिदेश भगवान् नारायणः -

प्रष्टुमर्हथ विश्वेशं प्रत्यक्षं पुरतः स्थितम् ।
ममैव सन्निधावेष यथावद् वक्तुमीश्वरः ।। इति ।

नारायणोक्तमाकर्ण्येश्वरो मुनिभ्य ईश्वरगीतामुपदिश्यान्ते जगाद -

नारायणश्च भगवान् देवकीतनयो हरिः ।
अर्जुनाय स्वयं साक्षाद् दत्तवानिदमुत्तमम् ।। इति ।

अनेनेश्वरगीतामूलकत्वं भगवद्गीताया आपाततः प्रतीयते । शिव एव गीतोपदेश ईष्ट इति च । तथापि ''ममैव सन्निधौ वक्तुमीश्वर'' इत्युक्तत्वेन श्रीकृष्णसन्निधौ पाण्डवेभ्यो भीष्मोपदेश इवायं नारायणसन्निधौ मुनिभ्यः शिवोपदेश इति विज्ञायते । विष्णुसन्निधानाहितशक्तिनाऽयमुपदेशः कृतः शिवेनेति । इदमुत्त-ममर्जुनाय दत्तवानित्युक्त्या भगवद्गीतामूलकत्वमीश्वरगीताया अवसीयत इति च ।

यस्यापस्तनुजाः पुरा यदयनं ताः इत्यनेन,

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥

इति वचनमर्थतः संगृहीतम् ।

यो नरो नेतृतः इति ।

नयतीति नरः प्रोक्तः परमात्मा सनातनः ।

इति शांकर सहस्रनामभाष्योक्तं व्यासवचनम् । नयतीति नेतृत्वतो नर इत्युच्यत इत्यर्थः । भावप्रधानो निर्देशो नेतृत इति ।

नालीकनाभः पद्मनाभः इति लोकात्मकपद्मयुक्त नाभि विशिष्ट-त्वेन लोकसृष्टि कारणत्वोपपादनं नारायणशब्दवाच्यत्वोपपादनं च । तथाह्युक्तं-

नारं सरोरुहं प्रोक्तं जगद्योनि तु यत् पुरा ।
यस्य नाभौ समुत्पन्नं स नारायण उच्यत । इति ॥

करणेतिकर्तव्यतेति ।

प्रकृत सदागमानां करणत्वम् । ब्रह्मसूत्राणां तत्रेतिकर्तव्यता-त्वमिति । "ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितै" (भ.गी.१३.५) इत्यत्र गीतायां "ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्"इति पूर्ववाक्ये वेदादि सदागमानां तदुत्पाद्यज्ञाने करणत्वमुक्त्वा "हेतुमद्भिः ब्रह्मसूत्रैः विनिश्चितै"इत्यनेन ब्रह्मसूत्रोक्तन्यायानां वेदतात्पर्यविषयक संदेह निरासद्वारा तन्निश्चय संपादकत्वेन इतिकर्तव्यतात्वमुक्तम् ।

गतिसामान्येति ।

सर्ववेदोत्पन्न ज्ञानानां अविरोधेन विष्णुपारम्यरूपैकविषयत्वं "गतिसामान्यात्" (ब.सू.१.१.१०) इति ब्रह्मसूत्रे निर्णीतम् ।

सर्ववेदान्तेति । "सर्ववेदान्त प्रत्ययं चोदनाद्यविशेषात्" (ब्र.सू.३.३.१) इति ब्रह्मसूत्रेऽपि सर्ववेदोत्पन्नज्ञानानामविरोधे-नैकविषयत्वमेवोक्तम् ।

"**ओमित्येतदक्षरमिदं सर्वम्**"इति माण्डूक्योपनिषदादिवाक्यम् । अत्र ओंकारार्थस्य विष्णोरेवादिकारणत्वमुक्तम् । एवमुत्तरत्रापि ।

"ब्रह्मैवेदमग्र आसीत् । तदपोऽसृजत । तदिदं सर्वम्" इति

अबधिकरण(ब्र.सू.२.३.५.)भाष्योक्ता श्रुतिः ।

"आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किंचन मिषत्" । इत्यैतरेयारण्यके(२.४१)

"वासुदेवो वा इदमग्र आसीत् न ब्रह्मा न च शंकरः नेन्द्रसूर्यौ न च गुहो न विनायकः" । इति विष्णुतत्वविनिर्णयोदाहृता श्रुतिः ।

"एको रुद्रो न द्वितीयाय तस्थे" इत्यथर्वशिरसि(२.१) रुद्रनामक जनार्दन एव प्रलये आसीत् इत्युच्यते ।

यदा तमस्तन्न दिवा न रात्रि -
र्न सन्न चासच्छिव एव केवलः ।
तदक्षरं तत् सवितुर्वरेण्यं
प्रज्ञा च तस्मात् प्रसृता पुराणी ॥

इति श्वेताश्वतरे (४.१८) शिवशब्दित विष्णोरेवैकस्य प्रलयकाल वृत्तित्वमुच्यते ।

एकं स्वयं ज्योतिरनन्तमव्ययं
स्वसंस्थया नित्य निरस्त कल्मषम् ।
ब्रह्माख्यमस्योद्भवनादि हेतुभिः
स्वलक्षणैर्लक्षित भावनिर्वृतिम् (भाग. १०.८०.५)

अत्रापि जन्मादिकारणत्वं विष्णोर्लक्षणमित्युक्त्वा कारणान्तरं निषिध्यते ।

"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा"(भ.गी.७.६) अत्र कृत्स्नस्य जगत इति कृष्णेन स्वात्मन एव सकल जगदादिकारणत्वमुच्यते ।

विष्णोरादिकारणत्वं परब्रह्मत्वादिकं चेति ।

विष्णुसहस्रनाम शांकरभाष्ये "भूतानामादिकारणत्वाद् भूतादिः । प्रलयकालेऽस्मिन् सर्वं निधीयत इति निधिः । अतिशेते सर्वमतो विशिष्टः, विश्वतः परमं नित्यं (तै. आ.१०.११.१) इति श्रुतेः" इत्यादिना विष्णोरेवादिकारणत्वं तस्यैव सर्वोत्तमत्वादिकं चोच्यते ।

"स ब्रह्म स शिव" इत्याद्यभेदोपदेशादिति ।

स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमस्वराट् इत्यभेदोपदेशादित्यर्थः । विष्णुसहस्रनाम शांकरभाष्ये उक्तम् -स ब्रह्म स शिवः (तै.आ.१०.११.१२) इत्यभेदोपदेशात् शिवादिनामभिर्हरिरेव स्तूयत इति ।।

कारणवाक्यस्थेति ।

"एको नारायण आसीन्न ब्रह्मा न च शंकरः" इति कारणप्रतिपादकं वाक्यं कारणवाक्यमिति व्यवह्रियते । अदृश्यत्वाधिकरणभाष्ये गीतातात्पर्ये चेदं वाक्यमुद्धृतं - "एको नारायण आसीन्न ब्रह्मा न च शंकरः । स मुनिर्भूत्वा समचिन्तयत् । तत एते व्यजायन्त विश्वो हिरण्यगर्भोऽग्निर्यमो वरुण रुद्रेन्द्रा इति" । "एको नारायण आसीन्न ब्रह्मा नेशानः" इति गीतातात्पर्ये श्रुत्यन्तरम् । "एको ह वै नारायण आसीदि"ति महोपनिषदि चतुर्वेदशिखोपनिषदि च ।

आश्रयत्वविषयत्वेति ।

संक्षेपशारीरके उक्तम् अविद्यायाः शुद्ध चिन्मात्राश्रयत्वम्

आश्रयत्वविषयत्वभागिनी निर्दविशेषचितिरेव केवला ।
पूर्वसिद्ध तमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः।।

इति ।

जीवेश्वरयोरविद्याकल्पितत्वेनानन्तरभावित्वात् पूर्वभाव्यविद्यां प्रति आश्रयत्वं वा विषयत्वं वा तयोर्नोपपद्यते । चिन्मात्रस्याकल्पितत्वेन तस्यैवाश्रयत्वं विषयत्वं चेत्यर्थः ।

पत्युरसामंजस्यात् इति ।

ब्रह्मसूत्रं (२.२.३७) अत्र "केवल निमित्तेश्वर प्रतिषेधोऽवगम्यते" इति भामती । "पत्युरीश्वरस्य प्रधानपुरुषयोरधिष्ठातृत्वे

जगत्कारणत्वं नोपपद्यते। कस्मात्? असामंजस्यात्। किं पुनरसामंजस्यम्? हीनमध्योत्तमभावेन हि प्राणिभेदान् विदधत ईश्वरस्य रागद्वेषादि दोषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत। प्राणिकर्मापेक्षित्वाददोष इति चेन्न। कर्मेश्वरयोः प्रवर्त्य प्रवर्तयितृत्वे इतरेतराश्रय दोषप्रसंगात्''इति शांकरभाष्यम्। अत्र केवल निमित्त-कारणत्वपक्षनिराकरणेन शिवे तदंगीकारेऽपसिद्धान्तदोषापत्तिरिति।

कारणवाक्यस्थेति।

''सदेव सोम्येदमग्र आसीद् एकमेवाद्वितीयमि''ति छान्दोग्ये (६.२.१) कारणप्रतिपादकं वाक्यम्। अत्र एकशब्दः, एवकारः, एकवचनम् अद्वितीयपदं चास्तीति विशिष्टशुद्धोभयकारणत्वपरत्वेऽनुपपत्तिः।

यतोवेत्यादिवाक्येनेति।

''यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति'' (तै.उ.३.२) इत्युक्त सृष्टिकारणस्यैव ''यत् प्रयन्ती''ति लयकारणत्वमुक्तम्।

जीव ईशो विशुद्धा चिदिति।

अद्वैतमते षडनादिपदार्थाः -

जीव ईशो विशुद्धा चिद् भेदस्तस्यास्तयोर्द्वयोः।
अविद्या तच्चितोर्योगः षडस्माकमनादयः॥ इति।

स्मृत्यधिकरण इति-

स्मृत्यनवकाशदोष प्रसंग इति चेन्नान्यस्मृत्यनवाकश दोष प्रसंगात् (ब्र.सू.२.१.१) इति स्मृत्यधिकरणम्। अत्र शांकरभाष्यम्-

''यदुक्तं ब्रह्मैव सर्वज्ञं जगतः कारणमिति तदयुक्तम्। कुतः? स्मृत्यनवकाशदोष प्रसंगात्। स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता अन्याश्च तदनुसारिण्यः स्मृतय एवं सत्यनवकाशाः प्रसज्येरन्। तासु ह्यचेतनं प्रधानं स्वतन्त्रं जगतः कारणमुपनिबध्यते। तर्कावष्टम्भेन चैतेऽर्थं प्रतिष्ठापयन्ति। तस्मादपि स्मृतिबलेन वेदान्ता व्याख्येया इति पुनराक्षेपः। तस्य समाधिः—

''नान्यस्मृत्यनवकाश दोषप्रसंगादि''ति।

अतश्च संक्षेपमिदं शृणुध्वं
नारायणः सर्वमिदं पुराणः।
स सर्गकाले च करोति सर्वं
संहार काले च तदत्ति भूयः॥

इति पुराणे। भगवद्गीतासु च-

अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा (७.६)

एवमनेकशः स्मृतिष्वीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यत'' इति।

उपपादनं च स्वपक्षेत्यादि।

इदं वाक्यं मधुसूधन सरस्वतीकृताद्वैतसिद्धिस्थम्।

पूर्वमुपपाद्यायुक्तेरयुक्तमिति ।

आदावेव उपपाद्यमयुक्तमिति सिद्धौ तस्य पुनरुपपादनयत्नो न युज्यते इत्यर्थः। उपपाद्यं खलु शिवजगत्कारणत्वं कीदृशमिति चिन्तायां विवर्तोपादानत्वं निमित्तत्वमभिन्ननिमित्तोपादानत्वं चेति त्रयोऽपि पक्षा अयुक्ताः। चतुर्थः कोऽपि नास्ति। अत उपपाद्यस्यैव शशविषाणायितत्वे तस्योपपादनं कथं युज्यते?

न तस्य हेतुभिस्त्राणम् उत्पतन्नेव यो मृतः।

इति न्यायादिति भावः।

तत्र विप्रतिपत्तिजन्य संशयस्येत्यादि ।

इदमपि वाक्यमद्वैतसिद्धिस्थम्।

न्यायामृतादौ सम्यङ्निराकृतमिति ।

विप्रतिपत्तिप्रदर्शनस्यावश्यकत्वं नास्तीति न्यायामृते उक्तम्। तत्राद्वैतसिद्धिरेवमाह- "विप्रतिपत्ति जन्यसंशयस्यानुमित्यनंगत्वेऽपि व्युदसनीयतया विचारांगत्वमस्त्वेव। तादृशसंशयं प्रति विप्रतिपत्तेः क्वचित् निश्चयादिना प्रतिबन्धादजनकत्वेऽपि स्वरूपयोग्यत्वात् विप्रतिपत्तिः प्रदर्शनीयैवे"ति। कंटकोद्धार एवमाह- "विप्रतिपत्ति-जन्य संशयस्य व्युदसनीयतया तज्जनक वाक्यस्य यद्यावश्यकता तदाऽज्ञानविपर्यययोरपि व्युदसनीयतया तज्जनकवाक्यस्यापि विप्रतिपत्तिवाक्यवत् विचारांगत्वापत्तेः। यच्चोक्तं विप्रतिपत्तेर्व्युदसनीयं संशयं प्रति प्रतिबन्धादिनाऽजनकत्वेऽपि स्वरूपयोयत्वादंगत्वमिति,

तत्र तादृश संशयं प्रति साधारण धर्मादीनामपि स्वरूपयोयतया तत्प्रतिपादक वाक्यस्यापि विचारांगता स्यादि"त्यादि।

सूतसंहितामिति ।

माहेश्वर-वैष्णव-ब्राह्म-काशी-अवन्तिका-रेवेति खण्ड षट्क विभक्तात् प्रसिद्धात् स्कन्दपुराणादन्यदेव सनत्कुमार-सूत-वैष्णव-ब्राह्म-माहेश्वर-सौरेति खण्डषट्क विभक्तं स्कन्दपुराणमप्यस्ति। तदुपपुराणमिति बहवः। तत्र सूतसंहितां दृष्ट्वा शंकराचार्येण ब्रह्मसूत्रभाष्यं विरचितमित्याहेयमभियुक्तोक्तिः। परन्तु भाष्ये कुत्रापि सूतसंहितावचनं नोदाहियते।

विद्यारण्यैः सूतसंहिताव्याख्यावसर इति।

माधवाचार्यविरचिता सूतसंहितातात्पर्यदीपिका व्याख्यात्र गृह्यते।

बहृषिच्छन्द इति ।

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ (भ.गी.१३.५)

इति गीता वचनार्थोऽयम्।

भगवद्गीता विष्णुसहस्रनाम तारकत्वयोरिति ।

"तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्यात्यन्तोपरमलक्षणम्"।

इति भगवद्गीता शांकरभाष्यम् ।

तेनैव भाष्यकारेण भजगोविन्दंगीतमध्ये गीतायास्तारकत्वमुक्तम्-

भगवद्गीता किंचिदधीता गंगाजललवकणिका पीता ।
सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमेन न चर्चा ।।

इति ।

सहस्रनामभाष्यारम्भे प्रतिज्ञायां सहस्रनामतारकत्वमुक्तम् -

सहस्रमूर्तेः पुरुषोत्तमस्य सहस्रनेत्रानन पादबाहोः ।
सहस्रनाम्नां स्तवनं प्रशस्तं निरुच्यते जन्मजरादिशान्त्यै ।।

इति ।

शिवं वा विष्णुं वेति ।

शिवं वा विष्णुं वा यदभिदधति शास्त्रस्य विषयं
तदिष्टं ग्राह्यं नः सगुणमपि तद् ब्रह्म भजताम्
विरोधो नास्माकं स्फुरति नहिनिन्दानयविदां
न सूत्रणामर्थान्तरमपि भवद् वार्यमुचितम् ।।

इत्यप्पय्यदीक्षितोक्तिः । ''न हिं निन्दा निन्द्यं निन्दितुं प्रवर्तते । अपि तु निन्दितात् इतरत् प्रशंसितुमि''ति पूर्वमीमांसा न्यायः । अतः शिवनिन्दा पुराणादिषु चेत् सा विष्णुस्तुत्यर्था । विष्णुनिन्दा चेत् सा शिवस्तुत्यर्था । अतो न विरोध इति शिवो वा भवतु परमो विष्णुर्वा नास्माकमन्यतरस्मिन्नाग्रह इति भावः ।

तल्लिंगधारणमिति

ऋगित्याह पवित्रं ते विततं ब्रह्मणस्पते
तस्मात् पवित्रं तल्लिंगं धार्यं शैवमनामयम् ।
वेदशास्त्रपुराणेषु कामिकाद्यागमेषु च
लिंगधारणमाख्यातं वीरशैवस्य निश्चयात्
ब्राह्मणा वीरशैवस्थाः शिखा यज्ञोपवीतिनः
लिंग रुद्राक्ष भस्मांका ब्रह्मकर्मसमन्विताः
मुखे मन्त्रो हृदि ध्यानं मस्तके लिंगधारणम्
शिखा सूत्रं तथा भस्म चेति ब्राह्मण लक्षणम् ।।

इति वीरशैव सिद्धान्तशिखामणावृक्तत्वात् ब्रह्मसूत्रश्रीकण्ठभाष्य श्रीपतिभाष्यावलम्बिनां वीरशैव ब्राह्मणानां शिखा यज्ञोपवीत भस्मभिः साकं मस्तके शिवलिंगस्यापि धारणं विहितम् । यदि शांकराद्वैतिनां वीरशैव सिद्धान्तादरस्तर्हि तैरपि लिंगधारणं कर्तव्यं स्यादित्यापत्तिः ।

हरिविष्ण्वादि विहीन नामत इति -

स्कन्दपुराणान्तर्गत सूतसंहितायां चतुर्थे यज्ञवैभवखण्डे परापरवेदार्थ विभागनामक द्वितीयाध्यायस्थाः श्लोका उत्तरत्रोदाहियन्ते। तत्र

शिवं सर्वोत्तमं विप्रा हरिविष्ण्वादि नामतः ।
चिन्तयन् घोरसंसारे पतत्येव न संशयः ।।

इत्यादिना विहीनानां विष्ण्वादि देवानां नामभिः सर्वोत्तमस्य शिवस्य ध्यानादि न कार्यमित्युच्यते । तत्प्रामाण्यांगीकर्तृभिर्नारायण-शब्दस्य शिवपरत्वसाधनं अपसिद्धान्तदोषावहमिति भावः ।

ब्रह्मदृष्टिरुत्कर्षादिति

ब्रह्मसूत्रमिदम् (४.१.५) अत्र शांकरभाष्यम् - ''किमादित्यादि दृष्टयो ब्रह्मण्यध्यवसितव्याः किं वा ब्रह्मदृष्टिरादित्यादिष्विति । ब्रह्मदृष्टिरेवादित्यादिषु स्यात् । कस्मात्? उत्कर्षात् । एवमुत्कर्षेणा-दित्यादयो दृष्टा भवन्ति । उत्कृष्ट दृष्टेस्तेष्वध्यासात् । तथा च लौकिको न्यायोऽनुगतो भवति । उत्कृष्ट दृष्टिर्हि निकृष्टेऽध्यवसितव्येति लौकिको न्यायः । यथा राजदृष्टिः क्षत्तरि । विपर्यये प्रत्यवाय प्रसंगात् । नहि क्षत्तृ दृष्टि परिगृहीतो राजा निकर्षं नीयमानः श्रेयसे स्यात्'' इत्यादि ।

शैवाद्वैतप्रतिपादकत्वमिति -

शैवाद्वैतं नाम शांकराद्वैताद् विलक्षणं शैवाभ्युपगतं शक्तिविशिष्टाद्वैतं द्वैताद्वैतं च । ब्रह्मसूत्र श्रीकण्ठभाष्यकर्ता श्रीकण्ठ शिवाचार्यः शक्तिविशिष्टाद्वैत सिद्धान्त प्रवर्तकः । ब्रह्मसूत्र श्रीकर भाष्यकर्ता श्रीपतिपण्डितशिवाचार्यः ब्रह्मजगतोर्द्वैताद्वैतात्मक विशेषाद्वैत सिद्धान्त प्रवर्तकः । विद्यारण्यस्तु शांकराद्वैतानुयायी सन्नपि शैवाद्वैतं प्रविश्य स्वयमेव सूतसंहितायां तदनभिमतं शैवाद्वैतं प्रदर्शितवानिति ।

तल्लीनमाक्षेपमिति

विधानमात्रं तदुपाददे तदा
पयो यथाच्छं परमः स हंसराट् ।
तल्लीनमाक्षेपमुपैक्षताफलं
वारीव सन्तो हि गुणांश तोषिणः ।।

(सुमध्वविज्जयः. ५.२६)

अद्वैतभाष्यं सूत्रसम्मतं नेति श्री मध्वाचार्यैरुक्ते तदसहमानो गुरुरच्युतप्रेक्षयतिः अवदत् ''सूत्रार्थविच्चेत् कुरु भाष्यमंजसे''ति । अस्मिन् वाक्ये ''सूत्रार्थं न जनासी''ति काक्काऽऽक्षेपः गर्भितोऽस्ति । स तु अफल इति ''कुरु भाष्यमंजसे''ति विधानमात्रं श्रीमदाचार्य आददे । यथा खलु हंसः अफलं वारि विहाय क्षीरमेवोपादत्त एवमित्यर्थः । प्रकृतेऽपि शिवस्य सर्वोत्तमत्वेन तस्य नारायणशब्दवाच्यत्वं नेति परेणोक्ते तत्र शिवसर्वोत्तमत्वांशं विहाय शिवस्य नारायणशब्द वाच्यत्वाभावमात्रमुपादेयमिति भावः ।

शैवानां चावैदिक स्मृत्यनुरोधेनेत्यादि –

आधुनिकाः शैवाः एवमाहुः । वेदे शिवस्य न प्रमुखं स्थानमस्ति । वस्तुतो वेदकालादपि पुरातने शिलायुगे भव्यां नागरिकतां भजतां द्रविडानां आराध्यं दैवं शिव एवासीत् । तेषां शिवपूजा लिंगधारणादिकमासीदिति हि सिन्धुप्रान्त बलुचिस्थानादावुत्खननेन विज्ञायते । अतः सकलेऽप्यस्मिन् प्रपंचे प्राचीनतमो धर्मोऽयं शैव एवेति पाश्चात्या विज्ञा विजानन्ति ।

''त्रयो वेदस्य कर्तारो भण्ड धूर्त निशाचरा''इति वैदिकेषु कर्मसु जुगुप्सां वहन्तः केचन सज्जनाः यज्ञध्वंसनपरा ''असुराः'' इति, ''व्रात्याः'' इति, ''शिश्नदेवाः'' इति च प्रथिता बभूवुः। शिवे तु भगवति भक्तास्ते। असुरेष्वपि हि रावणादिषु लिंगधारणादिकं सुविदितम्।

यदा तु प्रबला आर्या अनार्यैरेतैर्द्रविडैः कृतरक्तसम्बन्धा मिलितास्तदा शुद्धवैदिक मताननुगुणोऽपि, वेदेऽनुपलभ्यमानोऽपि योगः शिवयोगिजनसंगादुपनिषत्सु गीतायां च कृतपदो मोक्षोपायतया स्वीकृतश्च। प्रथमं ऋग्वेदे प्राशस्त्यमभजन्नपि रुद्रः पश्चाद् यजुर्वेदे ''एको रुद्रो न द्वितीयाय तस्थे'' इत्यद्वितीयतया समस्तूयत। शिवपशुपत्यादिभिर्भव्यैर्नामभिरपि पर्यभूष्यत। तदिदं शिवप्राबल्यमसहमानाः पुराणकालीना दक्षादयो वैदिका ब्राह्मणाः शिवस्य यज्ञेषु भागमलोपयन्। वीरभद्रेण च तेषां यज्ञे ध्वस्ते ध्वस्तमभूत् सममेव याज्ञिक प्राबल्यम्। अतो वेदोषरा वेदान्ता इति याज्ञिकैर्दर्निन्दिता अपि उपनिषदः उन्नतं स्थानमभजन्। यज्ञकार्येष्वनुपयुक्त इति त्रय्या बहिष्कृतोऽथर्ववेदोऽप्याप सुप्रतिष्ठाम्। आथर्वणे हि व्रात्यनाम्ना प्रसिद्धो रुद्रो ''महादेवो'' जातः। अन्येऽपि च व्रात्याः ''श्रेयांसो'' जाताः -

व्रात्य आसीदीयमान एव...।
सोऽवर्धत स महानभूत् स महादेवोऽभवत्।
(अथर्व. १५.१.४)

तद्यस्यैवं विद्वान् व्रात्यो राज्ञोऽतिथिर्गृहानागच्छेत्
श्रेयांसमेनमात्मनो मानयेत् (अथर्व.१५.१०.१)

अत एवाथर्वणी मुण्डकोपनिषत् यज्ञमनिन्दत् -

प्लवा ह्येते अदृढा यज्ञरूपाः (२.७) इति।

अतएव च भगवद्गीताऽपि यज्ञपरान् वेदवादरतान् अनिन्दत्। ततः प्रभृति यज्ञाधिकार लक्षणभूतं यज्ञोपवीतं विसृजन्तो व्रात्या विजिग्युः। पराजिग्युश्च वर्णाश्रमधर्मिणः'' इत्यादि। य इमां वेदनिन्दाभावनां पुरस्कुर्वन्ति, न तेषां वैदिकनारायणशब्दस्य शिवपरत्वाग्रहः शोभां बिभर्ति।

ये वैदिकंमन्याः शैवा इति

यदा पशुपतिं जगतो निमित्तकारणं ब्रुवन्तः पाशुपता ब्रह्मसूत्रेषु निरस्ताः, यज्ञकर्माणि वैदिकाचाराश्चोज्जीवितास्तदा कालक्रमेण लकुलीश पाशुपत माहेश्वराः शैवं पाशुपतं धर्मं वैदिकं कृत्वा श्रीशैलसोमनाथादि शिवालयेष्वर्चका राजगुरवश्च भूत्वा विरेजुः। अत एव लकुलीश कृतेषु पाशुपत सूत्रेषु लिंगवतां यज्ञादि कर्माण्यपि विधीयन्ते। अत [illegible],

शिवलिंगोद्वहन परितुष्ट शिव समुत्पादित
राजवंशानां दशाश्वमेधावभृथ स्नानानां....

इत्यादीनि शासनान्युपलभ्यन्ते। श्रृंगेरीपीठाधीशेन ब्रह्मानन्द-भारतीनाम्ना रचिते पुरुषार्थप्रबोधे शुद्धवैदिकशैवानां वीरशैवाभिमतं लिंगार्चनाद्युपदिश्यते-

इष्टलिंगार्चनारम्भे जस्वेदं श्लोकपंचकम् ।
शनैर्भक्त्यैव हस्ताभ्यां मुखवस्त्रं निवारयेत् । इति ।
जंगम प्राणलिंगैक्यं शिवलिंगार्चनम्... इति च ।

एतेषां वैदिकम्मन्यानां शैवानां हरिविष्ण्वादि नामभिः शिवार्चनस्य सूतसंहितादिषु निषिद्धत्वेन तैर्विधिकोटिपरिग्रहणासम्भव इति भावः ।

कामाच्च नानुमानापेक्षेति -

ब्रह्मसूत्रमिदं (१.१.१८) अत्र शांकरभाष्ये "आनन्दमयाधिकारे च सोऽकामयत बहु स्यां प्रजायेयेति कामयितृत्व निर्देशात् नानुमानिकमपि सांख्यपरिकल्पितमचेतनं प्रधानमानन्दमयत्वेन कारणत्वेन वाऽपेक्षितव्यम्" इत्युक्तत्वेन केवल तर्कस्य वैदिकेऽर्थे प्रयोक्तुमयोग्यताऽभिमतेति प्रतीयते । स्पष्टं चेदमुक्तं शांकरभाष्ये -

तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्ष प्रसंगः
(ब्र.सू.२.१.११)

इत्यत्र– "इतश्च नागमगम्येऽर्थे केवलेन तर्केण प्रत्यवस्थातव्यम् । यस्मिन्निरागमाः पुरुषोत्प्रेक्षामात्र निबन्धनास्तर्का अप्रतिष्ठा भवन्ति । उत्प्रेक्षाया निरंकुशत्वात् । अथोच्येतान्यथा वयमनुमास्यामहे यथा नाप्रतिष्ठा दोषो भविष्यति । नहि प्रतिष्ठितस्तर्क एव नास्तीति शक्यते वक्तुम् । एतदपि हि तर्काणामप्रतिष्ठितत्वं तर्केणैव प्रतिष्ठाप्यते । इति चेदेवमप्यनिर्मोक्ष प्रसंगः । यद्यपि कचिद्विषये तर्कस्य प्रतिष्ठितत्वमुपलक्ष्यते । तथापि प्रकृते तावद् विषये प्रसज्जत एवाप्रतिष्ठितत्वदोषादनिर्मोक्षस्तर्कस्य । न हीदमतिगम्भीरं भावयाथात्म्यं मुक्तिनिबन्धनमागममन्तरेणोत्प्रेक्षितुमपि शक्यम् ।" इति ।

अत्र भामत्यामुक्तं - "न वयमन्यत्र तर्कमप्रमाणयामः । किन्तु जगत्कारणसत्त्वे स्वाभाविक प्रतिबन्धवन्न लिंगमस्ति । यत्तु साधर्म्यवैधर्म्यमात्रं तदप्रतिष्ठादोषान्न मुच्यत इति" ।

नैषा तर्केणेति -

काठकवाक्यं (२.९)- "नैषा तर्केण मतिराऽऽपनेया
प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठे"ति ।

यथाकामाऽनुमेति

कामाच्च नानुमानापेक्षेति सूत्र (ब्र.सू.१.१.१८)भाष्ये श्रीमदाचार्यैरुदाहृतं स्कान्दवचनं -

यथाकामाऽनुमा यस्मात् तस्मात् साऽनपगा श्रुतेः ।
पूर्वापराविरोधाय चेष्यते नान्यथा क्वचित् ।। इति ।

श्रुतेरनपगाऽनुकूलाऽनुमा श्रुतेः पूर्वोत्तर विरोध परिहारायापेक्ष्यते केवलम् । न केवलमनुमानमतीन्द्रियार्थ तत्वनिर्णयायालमिति भावः ।

ऋते नारायणादीनीति

नानुमानमतच्छब्दादिति सूत्र (ब्र.सू.१.३.३) भाष्ये श्रीमदाचार्यै रुदाहृतं स्कान्दवचनं -

ऋते नारायणादीनि नामानि पुरुषोत्तमः ।
प्रादादन्यत्र भगवान् राजेवर्ते स्वकं पुरम् ।। इति ।

इत्यादिप्रमाणेत्यादिशब्देन तत्रैवोदाहृतं वामनपुराणवचनं -

न तु नारायणादीनां नाम्नामन्यत्र सम्भवः ।
अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः ।। इति ।

उपक्रमादि षड्विधलिंगेति -

समन्वयाधिकरण भाष्योक्त बृहत्संहितावचनं षड्विधं तात्पर्य-लिंगमुपक्रमादि निर्दिशति -

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये ।। इति ।

शिवलिंगन्यायमनुसरतीति -

सैकत शिवलिंगोपरि यथा यथा जलाभिषेकः क्रियते तथा तथा लिंगमदर्शनतामुपैतीति दृष्टान्तेन नारायणशब्दस्य शिववृत्ति जलशायित्वावच्छिन्न प्रतिपादकत्वस्य श्रुतिस्मृत्यादिप्रमाणशून्यत्वेन सैकत लिंगवददृढस्य यथायथा विचारः क्रियते तथातथैव तदप्रामाणिकतामुपैति ।

वाचं धेनुमुपासीतेति

बृहदारण्यकोपनिषद् वाक्यम् । "वाचं धेनुमुपासीत । तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः ।" (५.८.१) अत्र वाचः "स्वाहा वषट् हन्त स्वधा" इति शब्द चतुष्टय युक्तत्वेनेष्टार्थप्रदत्वेन च स्तनचतुष्टययुक्त धेनुरूपारोपिताकारेणोपासना प्रमिताऽद्वैतिनाम् ।

विरोधे त्वनपेक्षं स्यादिति -

विरोधे त्वनपेक्षं स्यादसति ह्यनुमानं (जै.सू.१.३.३) इति जैमिनि सूत्रम् । "प्रत्यक्षश्रुत्या स्मृतेर्विरोधे सति, तु - प्रत्यक्षश्रुति-विरुद्धस्मृतिजातं, अनपेक्षं सद् - मूलानपेक्षं सद् अप्रमाणम् । विरोधे असति हि अनुमानं- स्मृतेः सन्मूलकल्पकमनुमानं प्रवर्तते" इति तस्यार्थः ।

विष्णो र्नु कमिति

विष्णो र्नु कं वीर्याणि प्रवोचं
यः पार्थिवानि विममे रजांसि(ऋ.१.१.१५४.१)

न ते विष्णो इति

न ते विष्णो जायमानो न जातो
देव महिम्नः परमन्तमाप (ऋ.७.९९.२)

अहं कृत्स्नस्येत्यादि

अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा (भ.गी.७.६)
मया ततमिदं सर्वं जगदव्यक्तमूर्तिना (भ.गी.९.४)
पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेष संघान् ।
ब्रह्माणमीशं कमलासनस्थं
ऋषींश्च सर्वानुरगांश्च दिव्यान् (भ.गी.११.१५)
वृकासुराय गिरिशो वरं दत्वाऽऽप संकटम्
(भाग.१०.८८.१३)

रुद्रस्य व्यतनोद् यश इति -

भागवते(७.११.१) रसकूपामृतपानादिना त्रिपुरदहनं शिवस्य सुकरं कृत्वा तस्य त्रिपुरारिरिति पुरहेति कीर्तिं प्रापयामास श्री हरिः ।

मोक्षधर्मे चेति

महाभारत शान्तिपर्वान्तर्गत मोक्षधर्मपर्वणि १७७.१७८ तमावध्यायौ तारतम्यविष्णुपारम्ये प्रकटयतः । यथा -

तं प्राग्वंशे यज्ञभावं भजन्ते
अहं ब्रह्मा चाद्य ईशः प्रजानाम् ।
तस्माज्जातस्त्वं च मत्तः प्रसूतो
मत्तो जगज्जंगमं स्थावरं च ।

इति शिवं प्रति ब्रह्मवचनं विष्णोर्ब्रह्मा, ब्रह्मणश्च शिवो जात इति ।

त्वं च रुद्र महाबाहो इति

एष मोहं सृजाम्याशु यो जनान् मोहयिष्यति
त्वं च रुद्र महाबाहो मोह शास्त्राणि कारय ।
अतथ्यानि वितथ्यानि दर्शयस्व महाभुज
प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु ।।

इति वाराहे रुद्रं प्रति विष्णुवचनं शैवपुराणानां मोहकत्वावेदकम्।

सत्यव्रतेन प्रलयदर्शनप्रार्थनम् -

भागवते (८.२३.२९) सत्यव्रतो राजा मत्स्यरूपिणं हरिं प्रार्थयते -

ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् । इति ।

ततो हरिः प्रलयं दर्शयामास(८.२३.४४)

मन्वन्तर प्रलयोऽयम् । न मायामात्रम् ।

मार्कण्डेयेन प्रलयदर्शनप्रार्थनम् -

भागवते (१२.८.१६) तथा महाभारतवनपर्वणि १९२ तमेऽध्याये बदरीनारायणो मार्कण्डेयेन प्रार्थितो ब्रह्मप्रलयं मायया सृष्ट्वा दर्शयति ।

तायदस्येतीदमेति

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः (मनु १.१०)
अत्र अस्येति'इदमा' षष्ठ्यन्तेनेदंशब्देनेत्यर्थः ।

ब्रह्मजनकत्वेन पूर्वप्रसक्तेति -

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु बीजमवासृजत् ।
तदण्डमभवद्धैमं सहस्रांशु समप्रभम् ।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोक पितामहः ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ।
(मनु. १.८.१.१०)

इति मनुवचने ब्रह्मजनकत्वेन पूर्वप्रसक्तस्यैव विष्णोरस्येती-दंशब्देन परामर्शादित्यर्थः ।

ततः स्वयंभूर्भगवानिति -

ततः स्वयम्भूर्भगवान् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमवासृजत् ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ।
हिरण्यवर्णमभवत् तदण्डमुदकेशयम् ।
तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भूरिति नः श्रुतम् ।

इति हरिवंश वचनम् । (१.१.३५,३६,३७)

पुरुषोऽण्डं विनिर्भिद्येति -

भागवत वचनम् (२.१०.१०)

पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः ।
आत्मनोऽयनमन्विच्छन् अपोऽस्राक्षीच्छुचिः शुचीः..... ।
इत्यादि ।

योगतल्पात् समुत्थित इति -

भागवतवचनम्-

एको नानात्वमन्विच्छन् योगतल्पात् समुत्थितः ।
वीर्यं हिरण्मयं देवो मायया व्यसृजत् त्रिधा ।।(२.१०.१३)

नाभिह्रदादिति

भागवतवचनम् (३.९.२४) अत्र पद्मनाभत्वलिंगं प्रदर्श्य प्रलयजलशायिनो विष्णुत्वमुक्तम् । तस्यैव च पूर्वम् ''आत्मनोऽयन-मन्विच्छन्नि''त्यादिना स्वसृष्टजलशयनेन नारायणशब्दवाच्यत्व-मप्युक्तम् ।

लोकाधार पद्म जनक नाभ्युपेतत्वेनापीति -

नारं सरोरुहं प्रोक्तं जगद्योनि तु यत् पुरा ।
यस्य नाभौ समुत्पन्नं स नारायण उच्यते ।।

इत्यनेन नारस्य नाभिकमलस्य अयन आश्रयो नारायण इति नारायणशब्द निर्वचनं सूचितम् ।

शिशुरुवाचेत्यादि

महाभारते वनपर्वणि १९२ तमे अध्याये द्रष्टव्यम् ।

ब्रह्मणि ब्रह्मरूपोऽसाविति -

वामन पुराणवचनमिदम् । भागवत तात्पर्योदाहृतम्(१.२.२४)

रुद्रो रुद्रश्च दन्तिश्चेति

इदमनुक्रमणिकावचनम् ''अम्भसि'' अम्भस्यपारे इत्यादि महा-नारायणोपनिषदि रुद्रादि द्वादश गायत्रीमन्त्राः पठिता इत्याह ।

पूर्वपदात् संज्ञायामग इति -

पाणिनि सूत्रमिदम् (८.४.३)

अग्रनासिकायाः संज्ञायां नसं चास्थूलात् इति

पाणिनिसूत्रम् (५.४.११८)

अन्यारादिति सूत्र इति

अन्यारादितरर्तेदिक्शब्दांचूत्तरपदाजाहि युक्ते (पा.सू. २.३.२९) अत्र वृत्तिः "एभिर्योगे पंचमी स्मात्। इतरग्रहणं प्रपंचार्थम्। अन्यो भिन्न इतरो वा कृष्णात्" इति।

स्वं रूपं शब्दस्याशब्दसंज्ञा

(पा.सू.१.१.६८) शब्दस्य स्वं रूपं संज्ञि। शब्दशास्त्रे या संज्ञा तां विना।

अग्नेर्ढक् (पा.सू.४.२.३३) आग्नेयमित्युदाहरणम्।

पद्दन्नितीति

पद्दन्नोमास् हृन्निशसन् यूषन् दोषन् यकञ्छकन्नुदन्नासञ्-छस्प्रभृतिषु (पा.सू.६.१.६३) पाद दन्त नासिका मास हृदय निशा असृङ् यूष् दोष् यकृत् शकृत् उदक आस्य एषां पदादय आदेशाः स्युः शसादौ वा। पादः पादौ पादाः। पादं पादौ पदः पादान्। पदा पादेनेत्यादि।

दिशः सपत्नी भवेति

रघुवंशे इन्दुमतीस्वयंवरे इन्दुमतीं प्रति सख्या वचनम्(६.६३)-

अनेन पाणौ विधिवत् गृहीते महाकुलीनेन महीव गुर्वी।
रत्नानुविद्धार्णव मेखलाया दिशः सपत्नी भव दक्षिणस्याः॥
इति।

अत्र दक्षिणस्या इति षष्ठ्याः स्याडादेशः "सर्वनाम्नः स्याड् ह्रस्वश्चे"ति सूत्रात् (७.३.११४) भवति सर्वनामसंज्ञायाम्।

पूर्वपरावर दक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् -

(पा.सू.१.१.३४) "एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात् सर्वत्र या प्राप्ता सा जसि वा स्यात्। पूर्वे पूर्वाः। व्यवस्थायां किं? दक्षिणा गाथकाः कुशला इत्यर्थः। असंज्ञायां किं? उत्तराः कुरवः" इत्यनेन सूत्रेण संज्ञायां सर्वनामसंज्ञा निषिद्धा। असंज्ञात्वं चाधुनिक संकेताभावादित्येव वक्तव्यम्।

यथा दन्त्यादिरिति

तन्नो दन्तिः प्रचोदयादिति गणपतिगायत्रीस्थदन्ति शब्दादि-रित्यर्थः।

कूर्मपुराण शिवसहस्रनामादाविति -

ततः स भगवान् प्रीतः कपर्दी वृषवाहनः।
संहृत्य परमं रूपं प्रकृतिस्थोऽभवद् भवः।

ते भवं भूतभव्येशं पूर्ववत् समवस्थितम् ।
दृष्ट्वा नारायणं देवं विस्मिता वाक्यमब्रुवन् ।

इति कूर्मपुराणे शिवे नारायणशब्द प्रयोगो दृश्यते । तदभिप्रायस्तत्रैव शिवेनोच्यते-

ममैषा परमा मूर्तिर्नारायणसमाह्वया ।

एषेति पार्श्वस्थो नारायणो निर्दिश्यते । तस्य शिवमूर्तित्वमभेद व्यपदेशाभिप्रायेणोच्यते । न तु शिवस्यैव नारायण शब्दवाच्यत्व-मुच्यते ।

कोशादेरिवेति -

कोशादीत्यनेन व्याकरणादीनष्टौ शक्तिग्रहोपायानाह । ते च -

शक्तिग्रहं व्याकरणोपमान कोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

इति ।

आकशादि पदानामिति -

आकाशस्तल्लिंगात् (ब्र.सू.१.१.२२) इत्यादि ब्रह्मसूत्रेषु आकाशादि पदानां श्रौतप्रयोगानुसारेण परब्रह्मणि शक्तिर्निर्णीता ।

वृद्धिर्यस्याचामित्यादि

वृद्धिर्यस्याचामादिस्तद् वृद्धम् (पा.सू.१.१.७) यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद् वृद्धसंज्ञं स्यात् । शाला माला सा ।

वृद्धाच्छः -

(पा.सू.४.२.११४) शालीयः मालीयः तदीयः ।

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् -

(पा.सू.७.१.) प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः । गार्ग्यायणी ।

वा नामधेयस्य वृद्धसंज्ञा वाच्या -

इति वार्तिकम् । दैवदत्तः देवदत्तीयः ।

तस्येदम् -

(पा.सू.४.३.१२०) उपगोरिदं औपगवम् ।

तस्य ह वा एतस्येति

तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति (छां.८.३.४) अत्र परब्रह्मरूपसंज्ञिनमनूद्य सत्यमिति संज्ञा विधीयते । ब्रह्मादीन्यस्येति वाक्ये विष्णुरूपं संज्ञिनमनूद्य नारायणसंज्ञाविधिः ।

शिवः सुखात्मकत्वेनेति

नानुमानमतच्छब्दादिति (ब्र.सू.१.३.३) ब्रह्मसूत्रभाष्ये श्रीमदाचार्योदाहृतं ब्रह्माण्डपुराणवचनमिदम्

वायुक्षेपिष्ठादि वाक्यवदिति -

"वायुर्वै क्षेपिष्ठा देवता । वायुमेव स्वेन भागधेयेनोपधावति । स एवैनं भूतिं गमयति" इति तैत्तिरीयसंहिता वाक्यम् (२.१.१) वायोः क्षिप्रगतित्वेन शीघ्रफलदायकत्वेन वायुदेवताक श्वेत पशुयागः प्रशस्तोऽतः करणीय इत्याह । स्तुतिरियम् । अनया स्तुत्या यागस्य प्राशस्त्यमात्रं बोध्यते । न पुनर्वायुर्नाम काचन क्षिप्रगतिर्देवता । मीमांसकमते यज्ञफलदातृत्वं यज्ञस्यैव, न देवतायाः । अतोऽर्थ-वादमीदृशमवलम्ब्य नाम्नां शक्तिनिर्णयोऽशक्यः । अन्यथा ह्यग्नौ इन्द्रविष्णवादि शब्दशक्तिरस्तीत्यापद्यते अर्थवादेन शक्तिबोधनादिति।

अट् कुप्वाङ् नुम् व्यवायेऽपीति -

पाणिनिसूत्रम् (८.४.२) 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन 'रषाभ्यां नो णः समानपदे' इत्येकवाक्यतात्र द्रष्टव्या ।

टाङसिङसामिनात्स्याः

इत्यपि णणिनिसूत्रम् (पा.सू.७.१.१२) अकारान्ताद् टादीनां क्रमात् इनादय आदेशाः स्युरित्यर्थः ।

आद्गुणः -

(पा.सू.६.१.८७) अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् संहितायाम् । उपेन्द्रः रमेशः गंगोदकम् ।

शब्दरत्ने द्रष्टव्येति

भट्टोजिदीक्षितेन स्वकृताया वैयाकरण सिद्धान्त कौमुद्याः प्रौढमनोरमाख्या टीका कृता । तदुपरि भट्टोजि पौत्रेण हरि दीक्षितेन बृहच्छब्दरत्नं नाम व्याख्यानं कृतम् । हरिदीक्षित शिष्येण नागेश भट्टेन पुनर्लघु शब्दरत्नं नाम व्याख्यानमपि कृतम् । शब्दरत्नेत्युभयं सामान्येन व्यवह्रियते ।

प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि-

(पा.सू.८.४.५)एभ्यो वनस्य णत्वं स्यात् । प्रवणं कार्ष्यवणम् ।

अग्र ग्रामाभ्यां नयतेर्णो वाच्यः -

इति वार्तिकम् । अग्रणीः ग्रामणीः ।

उत्तरपदत्वे चेति

वार्तिकम् । अस्य प्रवृत्तिरेवं - दिव उत् (पा.सू.६.१.१३१) अहर्विमलद्यु । अत्रान्तर्वर्तिनीं विभक्तिमाश्रित्य पूर्वपदस्येवोत्तरखण्ड-स्यापि पदसंज्ञायां प्राप्तायां "उत्तरपदत्वे चापदादि विधौ प्रतिषेधः" इति प्रत्ययलक्षणं न । विमलदिवी, विमलदिवि । अपदादि विधौ किं? दधिसेचौ । इह षत्वनिषेधे कर्तव्ये पदत्वमस्त्वेव । कुत्वे तु न ।

'नार अयने'त्यत्र 'अयने'त्युत्तरपदस्य पदत्वप्रयुक्ते णत्व विधौ वार्तिकस्यास्य न प्रवृत्तिः । णत्वविधेः पदप्रयुक्तत्वाभावात् । प्रत्युत पदत्वाभावे सति समानपदत्वेन णत्वं प्राप्नोति । किंचापदादिविधा-

वित्यस्य पदान्तविधावेवेत्यर्थः। पदान्तविधावेव प्रत्ययलक्षण-प्रतिबेधः। णत्वस्य पदमध्यकार्यत्वेन प्रतिषेधो न प्राप्नोति। किंच सात्पदाद्योरित्यत आरभ्य यो विधिः स सर्वः पदादि विधिः। अडिति सात्पदाद्योरित्यनन्तरं पठ्यते। अतो णत्वस्यापदादि विधित्वाभावात् न प्रतिषेधप्रवृत्तिः।।

क्षुभ्नादिषु च -

(पा.सू.८.४.३९) एषु णत्वं न स्यात्। क्षुभ्नादिराकृति गणः।

सात्पदाद्योः -

पा.सू.८.३.१११ सस्य षत्वं न स्यात्। अग्निसात् भवति। दधि सिंचति।

पदव्यवायेऽपि -

(पा.सू.८.४.३७) पदान्तस्य नस्य णत्वं न स्यात्। रामान्।

दुर्घटवृत्ताविति -

पाणिनि सूत्रोपरि शरणदेवेन बौद्धवैयाकरणेन (क्रि.श.११७३) रचिता वृत्तिः दुर्घटवृत्तिः। महाकविप्रयोगानां साधुत्वप्रदर्शनपरा।

रक्षितेनोक्तमिति -

रक्षितो नाम तन्नामा वैयाकरणः।

षात् पदान्तात् -

(पा.सू.८.४.३५) नस्य णो न। निष्पानं सर्पिष्पानम्। षात्

किं? निर्णयः। पदान्तात् कि? पुष्णाति। पदे अन्तः पदान्तोऽयमिति सप्तमी समासोऽयं। तेनेह न - सुसर्पिष्केण।

भष्भावादीति

एकाचो बशो भष् झषन्तस्य स्ध्वोः (पा.सू.८.२.३७) धातोरवयवो य एकाच् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे पदान्ते च। धुक् दुहौ दुहः।

गतिकारकोपपदानामित्यादि -

परिभाषेयम्।

सुप्तिङन्तं पदम् -

(पा.सू.१.४.१४) सुबन्तं तिङन्तं च पदसंज्ञकं स्यात्।

आचार्यादणत्वं चेति

वार्तिकम्। आचार्यस्य स्त्री आचार्यानी इन्द्रवरुणेत्यादिना आनुगागमः। ङीष् च। पुंयोग इत्येव। आचार्या स्वयं व्याख्यात्री।

इरिकादिभ्यः प्रतिषेधो वक्तव्यः -

इदं वार्तिकम्। विभाषौषधिवनस्पतिभ्यः (पा.सू.८.४.६) एभ्यो वनस्य णत्वं वा स्यात् इति प्राप्तं णत्वमनेन वार्तिकेन निषिध्यते। इरिकावनम्। मिरिकावनम्।

दोषत्रय दुष्ट नियमेति

"सामान्यशास्त्रस्य संकोचेऽन्यत्र तदभावस्याप्यर्थतः सिद्धेः अर्थसिद्धं तमादाय नियमशास्त्रेषु प्रतिषेधत्वव्यवहारः । पंच पंचनखा भक्ष्या इति शास्त्रेणापि प्रापकप्रमाणप्राप्तभक्षणस्य तदितराविषयत्व-रूप संकोच कल्पनम् । तेनान्येषां भक्षणाभावो गम्यते नियमशास्त्रस्य निषेध रूपेण प्रवृत्तरिति पक्षे । सुबादिपदस्य स्वव्यतिरिक्त विधौ लक्षणया, भवतीत्यस्य च न भवतीत्यर्थे लक्षणयेति भावः । अत एवात्र "स्वार्थहानि प्राप्तबाध परार्थकल्पना"रूप दोषत्रयं मीमांसकैरुच्यते । परिसंख्यापदेन चायं व्यवह्रियत हति बोध्यम् । इति पक्षे त्विति । अनेनारुचिर्बोधिता । तद्बीजं तु लक्षणायां गौरवं फलाभावश्च । तदभावे लक्षणाया अनौचित्यं चेति ।" - इति शब्दरत्ने उक्तम् । एवं च नियमशास्त्रस्य विधिरूपेण प्रवृत्तिरेव प्रौढमनोरमाकारस्य स्वपक्षः । निषेधरूपेण प्रवृत्तिरिति पक्षान्तरम् । तत्र लक्षणागौरवफलाभावानौ-चित्यरूपं दोषत्रयमुक्तम् । स्वार्थहानि प्राप्तबाध परार्थकल्पनारूपं दोषत्रयमपि मीमांसकोक्तं तत्पक्ष एवोक्तम् । न तु विधिरूपेण प्रवृत्तिरिति स्वपक्षे । अतो नियमपरत्वकल्पने नानौचित्यमिति मन्तव्यम् ।

विभाषा दिक्समासे बहुव्रीहौ -

(पा.सू.१.१.२८) अत्र सर्वनामता वा स्यात् । उत्तरपूर्वस्यै उत्तरपूर्वायै ।

दिङ्नामान्यन्तराले

(पा.सू.२.२.२६) दिशो नामान्यन्तराले वाच्ये समस्यन्ते । स च बहुव्रीहिः । दक्षिणस्याश्च पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा ।

सुप्तिङुपग्रहेति

व्यत्ययो बहुलं (पा.सू.३.१.८५) इत्यत्र कौमुद्यामुदाहृतं वचनम् । भागवत तात्पर्ये (१.१२.५३) महाव्याकरण सूत्रत्वेनोदा-हृतम् । अत्रोपग्रहो नाम परस्मैपदात्मनेपदे । नरः पुरुषः । कालः कालवाची प्रत्ययः । कर्तृशब्दः कारकमात्रपरः । यङिति यङो यशब्दादारभ्य लिङ्याशिष्यङिति ङकारेण प्रत्याहारः ।

यथाश्मानमाखणमृत्वा विध्वंसेतेति -

"एवं ह्येव विध्वंसमाना विश्वञ्चो विनेशुः । ततो देवा अभवन् परासुरसुरा" इति वाक्यशेषः (बृह.१.३) "स यथाश्मानमाखणमृत्वा विध्वंसेत एवं ह वै स विध्वंसते य एवंविदि पापं कामयते यश्चैनमभिधासति स एषोऽश्माखणः ।" इति छान्दोग्योपनिषदि (१.२)

यतो यस्मात् सर्वाणि भूतानीत्यादि -

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ।।

इति विष्णुसहस्रनामस्तोत्र शांकरभाष्यवचनमिदम् ।

यं कामये तंतमुग्रं कृणोमीत्यादि -

अम्भ्रणीसूक्तवचनं (ऋ.१०.१२५.५) अहं रुद्रायेत्याद्यपि तथा। अत्र रुद्रादि पददात्री लक्ष्मीरित्युच्यते।

अस्य देवस्य मिळ्हुष इत्यादि -

ऋग्वेदे (७.४०.५) अत्र विष्णूपासनया प्राप्तविभवत्वं रुद्रस्योच्यते।

सोरोदीद् यदरोदीत् तद् रुद्रस्य रुद्रत्वम् -

(तै.सं.१.५.१) अत्र चतुर्मुखात् प्राप्तरुद्रपदत्वं रुद्रस्योच्यते। तथाहि। जातमात्रो रुद्रः स्वीयपदप्राप्त्यर्थमरोदीत्। ततो ब्रह्मा पदमदात्। ततो रुद्रस्य रुद्रत्वं, रोदनादपीति। नन्वयमर्थवादः। ''बर्हिषि रजतं न देयं''इति बर्हिर्नामके यागे रजतदक्षिणानिषेधः श्रूयते। तस्य शेषोऽयम्। ''यदश्रु व्यशीर्यत तद् रजतमभवत्। पुराऽस्य संवत्सराद् गृहे रोदनं भवति। तस्माद् बर्हिषि रजतं न देयमि''ति। रोदनप्रभव रजत दानाद् गृहे रोदनं भवतीति रजतदान निन्दा क्रियते। मैवम्। लिंगदर्शनाच्चेति शब्दनित्यत्वाधिकरणगुणसूत्रे (जै.सू.१.१.२३) वाचा विरूप नित्ययेत्यर्थवादे वाचो नित्यत्व लिंगदर्शनादपि नित्यः शब्द इति सिद्धान्तितत्वाद् अर्थवादानामपि सति प्रमाणान्तराविरोधे स्वार्थतात्पर्यं न निवार्यते। किंच ''यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः'' इत्यादि भागवतवचनोपबृंहितत्वेनापि स्वार्थ-तात्पर्यं सिध्यति।

नवस्वपि वर्षेषु भगवान् (भाग.५.१७)
कोपकालो युगान्तस्ते (भाग.७.८.४१)
इति ब्रुवाणो भगवान् (भाग.८.१२.१७)
स्कन्ने रेतसि सोऽपश्यत् (भाग.८.१२.३५)
वयं न तात प्रभवाम (भाग.९.४.५६)
तस्य विश्वेश्वरस्येदं (भाग.९.४.५९)
वरं दत्वाऽऽप संकटम् (भाग.१०.८८.१३)
हरिस्तु निर्गुणः साक्षात् (भाग.१०.८८.५)

भगवद्गीता गूढार्थप्रकाशिकायामिति -

अद्वैतसिद्धिकार मधुसूदनसरस्वती विरचितायां गीतागूढार्थ दीपिकायामित्यर्थः।

परमशिववाद प्रक्रियाऽपीति -

पत्युरसामञ्जस्यादित्यधिकरणे (ब्र.सू.२.३३७) श्रीकर भाष्ये श्रीकण्ठभाष्ये च परमशिववाद प्रक्रिया दृश्यते। तस्मिन्नधिकरणे शांकरभाष्ये केवल निमित्तकारणतावादो निरस्तः। इमावपि तं वादं निरस्य अभिन्ननिमित्तोपादानत्वं सिद्धान्तयतः। तथाहि।

श्रीकरभाष्ये -

शिवस्य परब्रह्मणो जगदुपादानादि प्रेरकत्वेन निमित्तकारणमात्रत्वं न सम्भवति। कुतः? असामंजस्यात्। परमेश्वरस्य जगदुभयकारणत्व विधायकानां यथोर्णनाभिः सृजते गृह्णते चेत्यादि वेदान्तानां

समन्वयाभावात् । यथोर्णनाभिर्जन्तुः स्वकार्यं तन्तुचक्रं कारणावस्थायां नामरूपविभागानर्हं सूक्ष्मरूपेण स्वस्मिन्निधाय कार्यावस्थायां नामरूप-विभागार्हं स्थूलरूपेण प्रकटीकरोति तथा परमेश्वरश्चिदचिदात्मकं प्रपंचं प्रलयावस्थायां सूक्ष्मरूपेण स्वस्मिन् संस्थाप्य सृष्टिकाले स्थूलात्मकत्वेन प्रकाशयति ।

श्रीकण्ठभाष्ये—

पूर्वं स्वाभिन्न नामरूपविभागानर्हं सूक्ष्मचिदचिद्रूप परशक्ति गर्भितो हि शिवः केवलो भवति । पुनः स्वात्मिकां तादृर्शीं शक्तिं पूर्वदशाविरोधि स्थूलत्वयुक्त नामरूपविभागार्ह चिदचिद्रूपां बहिर्विस्तारयति । तत्र शक्तिमतः शिवस्य संकोचावस्था प्रलयः । विकासावस्था सृष्टिरिति ।

यस्त्वां द्वेष्टि स मां द्वेष्टीति -

हरिवंशे श्री कृष्णकैलासयात्रायां शिवः कृष्णमाह -

त्वदुपासा जगन्नाथ सैवास्तु मम गोपते ।
यश्च त्वां द्वेष्टि भो देव स मां द्वेष्टि न संशयः ।
यदासीद् वर्तते यच्च यच्च भावि जगत्पते ।
सर्वं त्वमेव देवेश विना किंचित् त्वया न हीति ।।

परिशिष्टम् - २

णत्व तत्व विभूषणस्य टिप्पण्यः

- के. हयवदन पुराणिकः

यत्पाद निःसृतात् तीर्थादिति-

यच्छौच निःसृत सरित्प्रवरोदकेन
तीर्थेन मूर्ध्न्यधिधृतेन शिवः शिवोऽभूत् ।
ध्यातुर्मनशमलशैल निसृष्टवज्रं
ध्यायेच्चिरं भगवतश्चरणारविन्दम् ।। (भाग.३.२६.२२)

इति भागवत श्लोकाभिप्रायेणेदमुक्तम् ।

प्रोद्गात्रधिकरण इति

उद्गातृ चमसमेकः श्रुतिसंयोगात् (जै.सू.३.५.२३) इत्यधिकरणे चिन्तितम् । ''प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातृणां प्र यजमानस्य प्रैतु सदस्यानामि''ति श्रुतिवाक्ये उद्गीथ प्रस्ताव प्रतिहारान् सामभागान् उद्गातृ प्रस्तोतृ प्रतिहर्तारः प्रयोगकाले उत्कर्षेण गायन्तीत्यवयवयोगेन वचनवृत्त्यैव त्रयाणां ग्रहणे सति प्रातिपदिक प्रत्यययोर्द्वयोरपि मुख्यार्थ सम्भवे लक्षणाऽयोगात् छन्दोगानां त्रयाणां भक्ष इति पूर्वपक्षे, योगाद् रूढेर्बलीयस्त्वेन रूढ्या उद्गाता एक एवोद्गातृपदेन प्रतीयत इति बहुवचनोपपत्तये लक्षणाया अवश्यंभावे प्रस्तोतृप्रतिहर्त्रोः प्रत्यासत्तिरिव सुब्रह्मण्यस्यापि सामवेदाध्यायित्वेन, सुब्रह्मण्याह्वाने

तदीय कर्मण्यपि उद्गातृत्वसमाख्यायाः सत्वाच्च प्रत्यासत्तिभावेन ससुब्रह्मण्यानां चतुर्णां भक्ष इति भाष्यकारसिद्धान्तः ।

अत्र उद्गातॄणामिति प्रातिपदिक बहुवचनप्रत्ययोभयसार्थक्यस्य योगसमाश्रयणेन वा रूढिपूर्वकलक्षणाश्रयणेन वा उभयथा सम्भवे योगं परित्यज्य रूढिपूर्वकलक्षणैवादृता प्राचीन मीमांसकैः तथा अद्वैतिभिश्च । अतः सा बलवतीति व्यवस्थापिता भवति । नन्वत्र योगाद् रूढेरेव बलवत्वमुक्तम् । योगप्रतिबन्धकत्वाद्रूढेरिति । न तु लक्षणाया अपि । सत्यम् । प्रबलरूढिसहकारेण लक्षणाया अपि बलवत्वमित्यभिप्रायः । अत एव योगापेक्षया लक्षणायाः बलीयस्त्वमनुक्त्वा रूढिपूर्वकलक्षणाया बलीयस्त्वमुक्तम् ।

जगद्वाचित्वादित्यधिकरणस्येति -

जगद्वाचित्वात् (ब्र.सू.१.४.१७) इत्यधिकरणे "यो वै बालाके एतेषां पुरुषाणां कर्ता, यस्य वै तत् कर्म" इत्यत्र कर्मशब्देन रूढ्या चलनादृष्टयोः, क्रियत इति कर्मेति योगेन जगतश्च प्रतीतौ सत्यां, रूढिपूर्वक लक्षणया अदृष्टजन्यजगत्प्रतिपादनसम्भवेऽपि तां त्यक्त्वा योगेन जगत्प्रतिपादनं स्वीकृतं श्रीभाष्ये । अतो रुढिपूर्वकलक्षणाया योगापेक्षया बलवत्वं न भाष्यकारस्य सम्मतम् । न वा सूत्रकारस्य । सूत्रकारस्य लक्षणाप्राबल्याभिप्राये "यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः" इत्यत्र यथाऽशेषस्यापि चराचरस्य ब्रह्मक्षत्रपद लक्ष्यत्वाभि-प्रायेण चराचरग्रहणादित्येवोक्तं, न तु चराचरवाचित्वादिति, एवमेव

कर्मशब्दस्यापि लक्षणाभिप्राये जगद्ग्रहणादित्येव वक्तव्यमासीत् । सूत्रं तु ज्जगद्वाचित्वादिति स्पष्टं योगेन वचनवृत्त्यैव जगत्प्रतिपादनमभिप्रैति ।

शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि -

(ब्र.सू.१.३.३४) छान्दोग्ये जानश्रुतिः क्षत्रियो राजा "शूद्रे"ति रैकमुनिना सम्बोध्यते । तत्र शूद्रेति शूद्रसदृशाभिप्रायेणोक्तिः सम्भवति । क्षत्रियस्यापि राज्ञो ब्रह्मज्ञानशून्यत्वरूपेण शूद्रसादृश्येन शूद्रेति सम्बोधन सम्भवात् । तथापि सूत्रे "शुचाद्रवतीति शूद्रः" इति योग एव शुगस्येति स्पष्टमुच्यते । न तु रूढ्या शूद्रत्वजाति प्रतिपादनपूर्विका शूद्रसदृशे लक्षणा ।

आकाशाधिकरण पूर्वपक्ष इति -

आकाशस्तल्लिङ्गात् (ब्र.सू.१.१.२२) इत्यत्र शांकरभाष्ये पूर्वपक्षे उक्तं "ब्रह्मणि गौण आकाश शब्दो भवितुमर्हति । विभुत्वादिभिर्हि बहुभिर्धर्मैः सदृशमाकाशेन ब्रह्म भवति । न च मुख्यसम्भवे गौणोऽर्थो ग्रहणमर्हति । सम्भवति चेह मुख्यस्यैवाकाशस्य ग्रहणम्" इति ।

विशिष्टाद्वैतवादिनस्तादृशाभिप्राय परिज्ञान कुशला इति -

ननु भवद्भिरपि आकाशप्राणादिशब्दानां ब्रह्मणि योग एवांगीकृतः । न रूढिपूर्वकलक्षणा । अतो "योगासंभवस्थल एव लक्षणाकल्पनं, न तु योगसम्भवस्थले" इति वदतो मम कोऽपराध इत्याशंक्येदमुच्यते । सत्यमस्माभिर्विशिष्टाद्वैतवादिभिर्योग एव समाश्रितः । परं तु भवदीयाः

सर्वत्र भाष्यादौ योगसम्भवेऽपि रूढिपूर्वकलक्षणामेव स्वीचक्रुः। अतस्तद्विरोधेन भवतो योगसमाश्रयणमपसिद्धान्तदोषमावहतीत्युच्यते। परन्यायेन परं प्रति दूषणाभिधानमिदमिति ।

विशिष्टाद्वैतवादिनस्तादृशाभिप्राय परिज्ञानकुशलाः ''योगासम्भव-स्थल एव लक्षणाकल्पनं, न तु योगसम्भवस्थले'' इत्यभिप्राय परिज्ञानकुशलाः। एतेनाद्वैतिनामकुशलत्वं, अत एव च रूढिपूर्व-कलक्षणादरण व्यसनित्वम् इति सूचितम् ।

ब्रह्मणि योगमेवांगीचक्रुरिति -

अनेनैव ग्रन्थकारेण आकाशाधिकरणविचारे - ''आकाशपदं महाभूतविशेषे रूढमिति रूढिज्ञानस्य आकाशान्य विशेष्यकावयवशक्ति ज्ञानजन्य प्रकाशमानत्वरूप योगार्थबोधं प्रति प्रतिबन्धकत्वा-वश्यकतया योगेन ब्रह्मबोधासम्भवात् ब्रह्मण्याकाश पदस्य लक्षणाऽऽवश्यकी । अत एव प्रोद्गात्रधिकरणे उद्गातृपदस्य योगेन प्रस्तोत्रादि बोधकत्वसम्भवेऽपि ऋत्विग्विशेषे रूढिज्ञानस्य प्रतिबन्धकत्वाभिप्रायेणैव लक्षणा समाश्रिता । तस्मात् श्रीभाष्ये आकाशपदस्य ब्रह्मणि योगवर्णनमयुक्तम् ।''-इत्याशंक्योक्तम् -

''प्रोद्गात्रधिकरणे भाष्यकारादिभिर्लक्षणया उद्गातृ प्रस्तोतृ प्रतिहर्तृ सुब्रह्मण्य रूप ऋत्विक् चतुष्टय परत्वस्य, शास्त्रदीपिकाकृता सुब्रह्मण्यातिरिक्त त्रितय परत्वस्य चांगीकारेऽपि नवीनैर्योगेनैव त्रितय परत्वस्वीकारादपि नोक्तप्रतिबन्धकता सम्भवः। भाट्टदीपिकायां ''प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातृणां प्र यजमानस्ये''ति मन्त्रे उद्गातृपद रूढ्यर्थस्य बहुत्वासम्भवात् बहुवचनस्यैकत्वे लक्षणा। न चास्य मन्त्रस्य सर्वतोमुखादावुत्कर्षः, प्रातिपदिकस्य वा लिंगसमवायेन त्रितयपरत्वं, योगेन वा उत्कृष्टगानकारित्वेन तत् त्रितयपरत्वं कल्प्यतामिति वाच्यम्। गुणभूत प्रत्ययानुरोधेन प्रधानभूत प्रातिपदिके त्रिविधाया अपि अन्याय्यकल्पनाया अनुपपत्तेः'' इत्याशंक्य, ''उद्गातृशब्दो यौगिक एव। उत् पूर्वक गै धातोः ''उद्गायतीनामरविन्द-लोचनम्'' इत्यादावुत्कृष्टगानमात्रे प्रयोगेण सामविशेषे रूढिविरहात् ऋत्विग्विशेषे प्रयोगस्य निरूढलक्षणयाप्युपपत्तेः। तस्मात् उद्गातृशब्दो योगेन त्रितयपर'' इति सिद्धान्तितम्। तथा च योगजन्यबोधस्य सर्वसिद्धत्वात् शाब्दप्रत्यक्षयोर्युगपदुत्पत्त्यंगीकारेण एकसामग्र्या अपरबुद्धिप्रतिबन्धकताविरहाच्च योगपक्षे न गौरवमिति दिक्'' इति ।

एवं च ''योगाद्रूढिपूर्वकलक्षणाया बलीयस्त्वस्य व्यवस्थापि-ततया'' इति पूर्वोक्तवाक्ये भवदीयैरिति शेषः। अतो न स्वस्यापसिद्धान्तदोषप्रसक्तिः ।

अजामन्त्रेऽपीति -

चमसवदविशेषात् (ब्र.सू.१.४.८) इत्यधिकरणे श्रीभाष्ये,

अजामेकां लोहित शुक्लकृष्णां
बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः । (श्वेता.४.५)

इति वाक्यमुदाहृत्य ''न जायत इत्यजेति अजत्वमात्रप्रतिपादनात् तन्त्रसिद्धाब्रह्मात्मकाजाग्रहणे विशेषाप्रतीतेः'' इति योग एवाश्रितः ।

छागत्व परिकल्पनमिति

पूर्वोक्ते चमसाधिकरणे श्रीभाष्ये उक्तं, ''यत् पुनरस्याः प्रकृतेरजाशब्देन छागत्वपरिकल्पनमुपदिश्यत इति, तदप्यसंगतम् । निष्प्रयोजनत्वात्'' इति । अत्राद्वैतिनां यः प्रकृतेश्छागत्वपरिकल्पनोपदेशाभिप्रायः स निराकृतः ।

यस्मिन् प्रयुज्यमाने त्वित्यादि -

गारुडपुराणवचनस्य संग्रहोऽयम् । अनेनैव ग्रन्थकारेण स्वीये ब्रह्मपदशक्तिवादे वचनस्यास्य पूर्णः पाठ उदाहृतो यथा -

वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि ।
तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने ।
यस्मिन् प्रयुज्यमाने तु गुणयोगः सुपुष्कलः ।
तत्रैव मुख्यवृत्तोऽयमन्यत्र ह्युपचारतः ।। इति ।

अव्यवहितोत्तरत्व सम्बन्धावच्छिन्नेत्यादि -

नारायणशब्दस्य शिववाचकत्वपक्षे नारायणेति शब्दनिष्ठायां शिववाचकतायां शक्तिरूपायां नारायणेत्यानुपूर्वी अवच्छेदिका । आनुपूर्वी च ''न्-आ-र्-आ-य्-अ-ण्-अ'' इत्येवमाकारा, अन्तिमेऽकारे वर्तमाना, तन्निष्ठायां शिववाचकतायामवच्छेदिका

भवतीति यावत् । आनुपूर्व्याः नारायणेत्याकारत्वं च नकारोत्तराकारोत्तर रकारोत्तराकारोत्तर यकारोत्तराकारोत्तर णकारोत्तरात्वरूपम् । अव्यवहितोत्तरत्वसम्बन्धेन नकारविशिष्टो य आकारः अव्यवहितोत्तरत्वसम्बन्धेन तद्विशिष्टो यो रकारः अव्यवहितोत्तरत्वसम्बन्धेन तद्विशिष्टो य आकारः इत्यादिरीत्या नकारादि विशिष्टांतिमाकारत्वमेव । एवं च अन्तिमाकारनिष्ठायां शिववाचकतायां समवायसम्बन्धेन अत्वं तावदवच्छेदकमस्ति । अव्यवहितोत्तरत्वसम्बन्धेन णकारोऽप्यवच्छेदकोऽस्ति । णकारनिष्ठावच्छेदकतायामपि समवायसम्बन्धेन णत्वं, अव्यवहितोत्तरत्वसम्बन्धेन यकारोत्तराकारश्च अवच्छेदकौ । एवं रीत्या पृष्ठतोगमने पूर्वपूर्ववर्णस्य उत्तरोत्तरनिष्ठावच्छेदकतायां अवच्छेदकत्वेन नकारोत्तराकारनिष्ठावच्छेदकतायां अव्यवहितोत्तरत्वसम्बन्धेन नत्वरूपेण च आद्यो नकारः अवच्छेदकः । अतः अव्यवहितोत्तरत्वसम्बन्धावच्छिन्न नत्वावच्छिन्न नकारनिष्ठावच्छेदकतायाः तदुत्तराकारनिष्ठ अवच्छेदकता निरूपिका भवति । तन्निरूपिका च यकारनिष्ठावच्छेदकता । एवंरीत्या अव्यवहितोत्तरत्व सम्बन्धावच्छिन्न णत्वावच्छिन्न णकारनिष्ठावच्छेदकतापर्यन्तं गत्वा तादृशावच्छेदकतानिरूपिका अन्तिमाकारनिष्ठा शिववाचकता इति वक्तव्यम् । इदमेव विशिष्टानुपूर्व्यवच्छिन्न शक्तिमत्वमिति व्यवह्रियते ।

अत्र मूलमातृकायां ''तादृशावच्छेदकतानिरूपितत्वावच्छिन्न शिववाचकतारूपे''ति निरूपकत्वस्थाने निरूपितत्वावच्छिन्नत्वं पठ्यते । तदधिकमिति मत्वा त्यक्तम् ।

न तृतीय इति -

नारायणशब्दस्य शिववाचकत्वमिति तृतीयो यः पक्षः सः विधौ सिद्धसाधनस्य निषेधे बाधस्य च प्रसंजकः । यतो नारायणशब्दस्तावत् नारेति, अयनेति च पदद्वयघटितः । नारपदविशिष्टायनपदरूपे तस्मिन् विशेष्यभूतमयनपदं अधिकरणार्थकं, अधिकरणत्वरूप सामान्यधर्म-पुरस्कारेण शिवत्वादिधर्माधिकरणभूतं शिवमपि वदत्येव । एवं च विशेष्यभूतेऽयनपदे शिववाचकत्वसत्वे विशिष्टे नारायणपदे तदभावायोगः । न हि विशेष्यवृत्तेर्विशिष्टानुयोगिकोऽभावोंऽगीक्रियते ।

न चतुर्थ इति -

पूर्वोक्तविशिष्टानुपूर्व्यवच्छिन्ना शक्तिरेव समुदायशक्तिरिति, रूढिरिति, संज्ञेति च व्यवह्रियते. नारायणशब्दस्य शिवे संज्ञाभावपक्षे खल्विदानीं अवयवशक्तिरूपं योगमाश्रित्य शिवपरत्वं सिषाधयिषितम्। अतः संज्ञापक्षे सुवचं समुदाय वाचकत्वं तदभावपक्षे वर्ण्यते चेत् विधौ बाधः स्मात् । निषेधे तु न दोषः ।

न पंचम इति -

नारायणाद् रुद्रो जायत इत्येका श्रुतिरस्ति। तद्वाक्यात् नारायणशब्दविषयक ज्ञानेन शक्तिभ्रमं वा लक्षणाग्रहं वाऽनाश्रित्य शक्तिप्रमयैव ''नारायणजन्यः शिवः'' इत्याकारकः शिवविषयक शाब्दबोधो जन्यते। एवं च शक्तिभ्रम लक्षणाग्रहानधीनो योऽयं शिवविषयक शाब्दबोधः तन्निष्ठ शिवविषयित्वावच्छिन्न

जन्यतानिरूपित जनकता नारायणशब्दविषयक ज्ञानेऽस्ति । ज्ञाननिष्ठ जनकातायां नारायणशब्दविषयत्वं अवच्छेदकम्। अवच्छेदकीभूत विषयताश्रयत्वं नारायणशब्देऽस्ति । अतः सिद्धसाधनम् ।

न षष्ठ इति -

पंचमपक्षे केवल शिवविषयक शाब्दबोधो निविष्टः। अतो नारायणजन्यत्वाकारेण शिवविषयकबोधो नारायणशब्दज्ञानेन भवत्येवेति सिद्धसाधनमुक्तम्। इदानीं षष्ठे पक्षे जलशायित्वाकारेण शिवविषयकबोधो निवेश्यते। ततश्च नारायणशब्दज्ञानेन जलशायित्वाकारेण शिवविषयकबोधो न वैष्णवानां सिद्ध इति न सिद्धसाधनदोषप्रसंगः। तथापि बाधो भवति । जलशायित्वाकारेण शिवबोधो हि नारायणशब्दज्ञानेनेव जलशायीति पर्यायशब्दज्ञानेनापि भवति । ततश्च यदा नारायणशब्देन शिवबोधस्तदा न जलशायीति पदमस्ति। यदा जलशायीति पदेन शिवबोधस्तदा न नारायणशब्दोऽस्तीति चालनीन्यायेन पर्यायपदानां सर्वेषामपि शिवबोधरूप कार्यव्यभिचारित्वमायाति। तदर्थं तदव्यवहितोत्तरबोधं प्रति तत् कारणमिति वक्तव्यम्। बोधनिष्ठ जन्यतायां तदव्यवहितोत्तरत्वमवच्छेदकतया विवक्षणीयम्। तेनैव व्यभिचारवारणे जलशायित्वावच्छिन्न शिवविषयत्वं बोधे विशेषणं मास्तु । एवं च बोधनिष्ठ जन्यतायां तत्तत्पदज्ञानाव्यवहितोत्तरत्वमेव अवच्छेदकं, न पुनः जलशायित्वावच्छिन्न शिवविषयत्वमपि। अतो न

तदवच्छिन्नजन्यतानिरूपित जनकतावच्छेदक तिषयताश्रयत्वं नारायणशब्दस्य प्राप्नोतीति तत्साधने बाधः ।

पृथिव्यामेव रस इत्यापत्तेरिति -

यद्यपि पृथिव्यां वा रसस्तेज आदौ वेति जिज्ञासायां पृथिव्यामेव रस इति प्रयोग इष्ट एव। पृथिवीभिन्न तेज आदि वृत्तित्वाभाव बोधतात्पर्ये सति एवकारार्थसंकोचस्यादोषत्वात्। लोके सामान्यतः संकुचितार्थकस्यैव एवकारस्य प्रयोगदर्शनात्। त्वं तिष्ठ, अहमेव गमिष्यामीत्युक्ते एवकारेण न असंकुचितास्मदर्थव्यतिरिक्त सर्वजन गमनाभावो बोध्यते। अतः प्रकरणादिना तात्पर्यानुसारेण सर्वत्र एवकारार्थ संकोचकल्पनं भवति। तथापि प्रकृते न तथा। पदादिविधेरिव पदमध्यविधेरपि पदान्तविधिभिन्नत्वेन एवकारेण तस्यापि व्यवच्छेदे प्रतीयमाने संकोचः किंनिमित्तः? वस्तुतस्तु न केवलं संकोचो निर्निमित्तः। अपि तु असंकुचितार्थत्वमेव एवकारस्याभिमतम्। यतो हि वार्तिकेन सामान्यतः पदादिविधि-भिन्नविधौ प्रत्ययलक्षणप्रतिषेधे उक्तेऽपि, ग्रन्थकृद्भिः पदान्तविधा-वेवेति विशिष्योच्यमानं पदादिविधाविव पदमध्यविधावपि न प्रतिषेध इत्यवगमयति ।

पदादिविधौ न भवतीत्यर्थालाभादिति

ननु प्रत्ययलोपे प्रत्ययलक्षणमिति परिभाषासिद्धं प्रत्ययलक्षणं पदान्तविधौ अनेन वार्तिकेन प्रतिषिध्यते । पदादिविधौ अयं प्रतिषेधो

न प्राप्नोति । पुनः ''प्रतिषेधो न भवती''त्यर्थलाभः किमर्थः? मैवम् । ''उत्तरपदत्वे चापदादिविधौ प्रत्ययलक्षणप्रतिषेधः'' इत्यत्र ''उत्तरपदत्वे प्रत्ययलक्षणप्रतिषेधः'' इति सामान्यतः पदादि पदमध्य पदान्तविधिषु सर्वत्र प्रत्ययलक्षणप्रतिषेधः प्राप्नोति । तस्य च केवलेन पदान्तविधावित्यनेन शब्देन पदादिविधौ निवर्तनायोगेन तदर्थं एवकारो घटनीयः । सति चैवकारे पदान्तविधावेव, न पदादिविधौ इत्यर्थलाभो भवति, नान्यथा इत्यभिप्रायात् ।

पाणिन्यादि संकेताप्रयोज्येति

विभक्तीतरानपेक्षयार्थ प्रत्यायक वर्णसमुदायत्वरूपं पदत्वमेवात्र स्पष्टतार्थमेवं परिष्कृतम्। विभक्तीतरानपेक्षत्वस्य विभक्तीतराव्य-वधानाघटिताकांक्षावत्वरूपत्वात्। यद्यपि विभक्तीतर प्रातिपदिकापेक्षयार्थप्रतिपादकत्वेन टाङसिङसादीनां न पदत्वप्रसक्तिः। तथापि ''टाङसिङसामिनात्स्याः'' इत्यादि सूत्रेषु ''स्वं रूपं शब्दस्याशब्दसंज्ञे''ति परिभाषासहकृतेषु टादीनां विभक्तीतरा-नपेक्षयार्थप्रत्यायकत्वं सम्भवति। तद्व्यावृत्तये पाणिन्यादि संकेताप्रयोज्येति विशेषणम्।

स्वोत्तर सुबुत्तरेति -

''रषाभ्यां नो णः समानपदे'' इत्यत्र समानपदे इत्यस्य भिन्नपदवृत्तित्वाभावः स्वोत्तर सुबुत्तरत्वाभावरूपोऽर्थो विवक्षितः। नकारः स्वोत्तर सुबुत्तरत्व सम्बन्धेन रेफषकारान्यतरवान् न भवेदिति

यावत्। अत्र भेदस्य रेफषकारान्यतरवान् प्रतियोगी। रेफषकारान्यतरत् प्रतियोगितावच्छेदकं तन्निष्ठावच्छेदकतायां स्वोत्तरसुबुत्तरत्वरूपः सम्बन्धोऽवच्छेदकः। तदवच्छिन्नावच्छेदकताक प्रतियोगिताको यो भेदस्तद्वत्वं नकारस्य स्यादित्यर्थः।

स्थानं चाव्यवहित पूर्वत्वेत्यादि

''रषाभ्यां नो णः समानपदे'' इति सूत्रेण नकारस्य स्थाने णकारो भवतीत्युच्यते। तस्यार्थः अव्यवहित पूर्वत्वाव्यवहितोत्तरत्वान्यतर-सम्बन्धेन नकारविशिष्टो वर्णः तेनैव सम्बन्धेन णकारविशिष्टो भवतीति। यथा रामेनेत्यत्र असाधुशब्दे स्वाव्यवहितोत्तरत्वसम्बन्धेन नकारविशिष्टो वर्णः अकारः। स तेनैव सम्बन्धेन साधुशब्दे णकारविशिष्टो भवतीत्युक्ते नकारस्थाने णकारादेशो भवतीति विज्ञायते।

ननु रामेनेत्यत्र एकारोऽप्यन्यतरसम्बन्धेन नकारविशिष्टोऽस्ति। तस्य नकाराव्यवहितपूर्वत्वात्। तस्य अन्यतरसम्बन्धेन णकारवैशिष्ट्यं यथा नकारस्थाने णादेशे कृते भवति तता मकारस्थाने णादेशे कृतेऽपि भवति। एवं च णादेशो मस्य नस्य वेति संदिह्यते। मैवम्। अन्यतरसम्बन्धेनेति लक्षणद्वयाभिप्रायेणोक्तम्। अव्यवहित पूर्वत्व-सम्बन्धेन नकारवैशिष्ट्यग्रहणे तेनैव सम्बन्धेन णकारवैशिष्ट्यं वक्तव्यम्। अव्यवहितोत्तरत्वसम्बन्धेन नकारवैशिष्ट्यग्रहणे तेनैव-सम्बन्धेन णकारवैशिष्ट्यं वक्तव्यम् इति अन्यतरसमबन्धोऽन्यतर-लक्षणघटको भवतीति।

एतेन स्थानपदस्य देशपरत्वमित्यादि

नकारस्य स्थाने इति कोऽर्थः? नकारस्य देशे इति वा, काले इति वा? नोभयमपि। सर्वगतस्य नित्यस्य च वर्णस्य देशकाल-परिच्छेदाभावात्। वर्णानित्यत्वपक्षे एकवर्णदेशेऽपरवर्णस्य कालभेदेन सम्भवेऽपि युगपदसंभवात्। नकारोच्चारणमकृत्वा णकारोच्चारणेन णकारदेशस्य नकारदेशत्वं न प्राप्नोति।

एतेन ''उच्चारणाधीनो देशो वर्णानां भविष्यति। अन्यथा भवतोऽव्यवहित पूर्वत्वाव्यवहितोत्तरत्व घटित परिष्कारस्याप्यनुप-पत्तिरि''त्यपि प्रत्युक्तम्। एतेनैव वर्णविषयक बुद्ध्युपाधिकोऽपि देशस्तादृशः कालश्च प्रत्युक्तः। एकस्मिन् देशे नकारणकारावनुसन्धीयेते इति ह्यलौकिकम्। अतो विकल्पासहत्वमिति शम्॥

●●●



श्रीमत्सुबुधेन्द्रतीर्थाः

प्रस्तुतपीठाधिपतयः श्रीराघवन्द्रस्वामिमठः मन्त्रालयः